# Chapter-3

## भारतचम्पूकाव्यस्य
## साहित्यदृष्ट्या समीक्षणं
## तृतीय खण्डम्

## (१) भारतचम्पूकाव्ये छन्दःप्रयोगस्य विमर्शः

---

सम्प्रति भारतचम्पूकाव्ये प्रयुक्तानां छन्दसामौचित्यानौचित्यविचारः क्रमप्राप्त उपक्रम्यते । छन्दसां प्रयोगो यदि क्वापि रसभाववस्तूनामन्यतमस्य वर्णने यदि औचित्यानुसारी भवति, तर्हि तत्र रसभावादिवर्णनकौशलेनोत्पादिता विच्छित्तिः कमप्युत्कर्षभूमानमारोहति(१)यदि च मनागपि तत्र कविना प्रमाद्यते, तर्हि तत्र कवेश्छन्दःप्रयोगादन्यथाऽलंकारादिभिरुत्पादितापि विच्छित्तिः सहृदयजनहृदयावर्जने अकिंचित्करी सिध्यन्ती तत्कौशलं खर्वमेव साधयेत्। विषयेऽस्मिन् क्षेमेन्द्रेण स्वकीये सुवृत्ततिलक ग्रन्थस्य तृतीयविन्यासे लिखितमस्ति । तत्र कतिचिच्छन्दसां विषये यदुक्तम्, तत् चतुर्दशसु छन्दःसु सीमितत्वेनाऽपर्याप्तम्, महाकविसूक्तिष्वसंगच्छमानं च । अतः छन्दसामौचित्यानौचित्यनिर्णयाय- तदुक्तसिद्धान्ताऽतिरिक्तैव काचित् सरणिरत्र शरणीकरणीया भवेत्। अस्तु।

छन्दसामाधारास्तावत् लघवो गुरवश्च वर्णा एव । तत्र गुरवो द्विधाः स्वरूपसिद्धाः आ ई ऊ ए ऐ ओ औ इत्याकाराः, संयोगपूर्वस्थितत्वेन सानुस्वार विसर्गत्वेन च गुरुत्वं प्राप्ता लघवश्च(२)।तत्र स्वरूपसिद्धा गुरवः सर्वेष्वपि रसेषु लभन्ते स्थितिं निर्विरोधम्, किन्तु संयोगपूर्वत्वेन सविसर्गत्वेन च गुरुत्वप्राप्तलघवः कृत्रिमा गुरवस्तु केवलवीरबीभत्सरौद्रेष्वेव निवेशनार्हा मन्यन्ते मनीषिभिः(३)। यतो हि तादृशा वर्णा एव ओजो व्यञ्जका भवन्ति । ओजसो व्यञ्जना वीरबीभत्सरौद्ररसेषु तदुत्कर्षकत्वेनोपकारित्वात् नितरामनिवार्या भवति(३)।ते च

---

१ प्रबन्धः सुतरां भाति यथास्थानं निवेशितैः ।
 निर्दोषगुणसंयुक्तैः सुवृत्तैर्मौक्तिकैरिव।।' १।३। इत्युक्तं क्षेमेन्द्रेण सुवृत्ततिलके ।

२ सानुस्वारो विसर्गान्तो दीर्घो युक्तपरश्च यः ।
 वा पादान्ते त्वसौ ग्वक्रो ज्ञेयोऽन्यो मात्रिको लृजुः ।।' ६।१। वृ० र० केदारभट्टः।

३ तदुक्तं साहित्यदर्पणे विश्वनाथकविराजेन-
 ' ओजश्चित्तस्य विस्ताररूपं दीप्तत्वमुच्यते ।।' ४

कृत्रिमा गुरवो यदि छन्दःसुकेषु चिदपि स्थानं लभन्ते, तर्हि येषु छन्दःसु गुरुवर्णानां स्थितेर्नियमो भवति, तेष्वेव स्थानं लब्धुं शक्नुवन्ति, न केवललघुस्थिति नियमवत्सु छन्दःसु । अतः केवल लघुवर्णघटितानि स्वल्पलघुवर्णघटितानि च छन्दांसि न कदाचिदपि वीरबीभत्सरौद्ररसानुगुणानि भवितुं शक्नुवन्ति, तेषु त दुत्कर्षकौजोव्यञ्जकानां कृत्रिमगुरूणां पर्याप्तत्वेन स्थितेरसंभवत्वात् । ये च प्रचुरतरगुरुवर्णस्थितिनियमवन्ति भवन्तिछन्दांसि, तेषु वीरबीभत्सरौद्ररसोपकारकस्य ओजोगुणस्यव्यञ्जकानां कृत्रिमगुरूणां पर्याप्तत्वेन स्थापयितुं शक्यत्वात् तानि छन्दासि वीरबीभत्सरौद्ररसानां नितरामनुकूलानिभवन्ति । अत एतन्निष्पन्नम्, यत्- संयुक्तपूर्वस्थत्वेन सविसर्गत्वेन च गुरुत्वं प्राप्ता लघवः अर्थात् तादृशाः कृत्रिमगुरवः पर्याप्तरूपेण येषु गुरुवर्णस्थितिनियमवत्सु छन्दःसुस्थानं लब्धुं शक्नुवन्ति तादृशान्येवछन्दांसि वीरबीभत्सरौद्ररसानुगुणानि । इतररसानां तु सर्वाण्यपि छन्दांसि अनुगुणानि , यदितेषु सविसर्गत्वेन संयुक्तपूर्वस्थत्वेन च निष्पन्नगुरुभावालघवः श ष ट ठ ड ढ वर्णाश्च न स्थाप्यन्ते, तेषां तत्राऽननुकूलत्वात् । तत्र तु तदितरवर्णानामेव(४) आनुकूल्यात् । एतदनुसारं वीरबीभत्स-

---

वीरबीभत्सरौद्रेषु तस्याऽऽधिक्यं क्रमेण तु ।।
वर्गस्याऽऽद्यतृतीयाभ्यां युक्तौ वर्णौ तदन्तिमौ ।। ५
उपर्यधो द्वयोर्वा सरेफौ टठडढैः सह ।।
शकारश्च षकारश्च तस्य व्यंजकतां गताः ।। ६
तथा समासो बहुलो घटनौद्धत्य शालिनी ।। ७।८ ॥

४- तदुक्तं साहित्यदर्पणे विश्वनाथकविराजेन -
'चित्तद्रवीभावमयो ह्लादो माधुर्यमुच्यते ।।
संभोगेकरुणे विप्रलम्भे शान्तेऽधिकं क्रमात् ।। २
मूर्ध्नि वर्गान्त्यवर्णेन युक्ताष्टठडढान् विना ।।
रणौ लघू च तद्व्यक्तौ वर्णाः कारणतां गताः ।। ३
अवृत्तिरल्पवृत्तिर्वा मधुरा रचना तथा ।। ४।८।।

रौद्ररसेषु तान्येव छन्दांस्यनुकूलानि भवन्ति, येषु मयरतगणानां प्राचुर्यं भवति, यतो हि मगणस्य गुरुवर्णमयत्वात् यरतगणानां च प्रचुरगुरुवर्णमयत्वात् तान्-त्स्थापनेन छन्दःसु गुरुवर्णाधिक्यं भवत्येव । अस्तु ।

एतत्सिद्धान्तानुसारं यदि भारतचम्पूकाव्यस्य सर्वाण्यपि छन्दांसि परीक्ष्येरन् तदा तु 'भारतचम्पू' काव्यादपि त्रिचतुर्गुणाकारो ग्रन्थस्तद्विषयको-ऽपि निर्मितो भवेत्, किन्तु प्रतिपद्यपरीक्षणानिबन्धनमनावश्यकमेव । अतः । स्थालीपुलाकन्यायेन सर्वविधछन्दःसु कतिचित् पद्यानि अत्रोपस्थाप्यन्ते, येषां समीक्षणेनैवविदितं भवेद्, यत् कविना छन्दसां प्रयोगे कियदौचित्यं निर्व्यूढमिति। तत्र

(१) स्रग्धरा

---

स्रग्धराच्छन्दसि-

'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्' १०४।३।वृ०र०

तदीयलक्षणानुसारं प्रचुरगुरुवर्णघटितानां मगण-रगण-यगणानां प्राचुर्येण गुरुवर्णानामाधिक्यम्, तेन छन्दस एतस्य उपर्युक्तनिर्णयानुसारं विकटोद्भटवर्णने वीरबीभत्सरौद्ररसेषु चानुकूल्यम्मन्तव्यम्, तत्र तद्व्यञ्जकौजः प्रकाशकवर्णनिवेशनावसरप्रदत्वात्। तत्र विकटोद्भटवर्णने यथा -

'कल्याणं वो विधत्तां करटमदधुनीलोलकल्लोलमाला-
खेलल्लोलम्बकोलाहलमुखरितदिक्चक्रवालाऽन्तरालम् ।
ग्रत्नं वेतण्डरत्नं सततपरिचलत्कर्णतालप्ररोह-
द्वाताकूराजिह्मीषादिरविकृतफणाग्रभूषाभुजङ्गम् ।। १।१

अत्र भगवतो गणपतेर्विकटतरस्वरूपस्य वर्णने स्रग्धरायाः सुतरामानुकूल्यम् प्रचुरसंयुक्तपूर्वलघुवर्णनिवेशनाऽवसरप्रदत्वात् ।

वीररसवर्णने यथा-

---

'द्यावाभूमी निरुन्धन् यदुबलरजसां श्रेणिभिः सीरपाणि-

वेगात्कागात् स वीरः स्वविनयगुरुणा शौरिणाऽन्वीयमानः ।
आहारश्चाऽऽयुधं च द्विषदवमतये येन संसेव्यमाने
ते द्वे हालाहलत्वं रणभुवि वहतो नामतः कृत्यतश्च ।।' ७२।२

अत्रापि वीररसानुभाववर्णने कतिचित् संयुक्तपूर्वस्थलघुसविसर्गवर्णविन्यासाव सरदानात् स्रग्धराया आनुकूल्यम् । शौरेर्विनयविशिष्टत्वप्रदर्शने लघुविशिष्टरकारणकारयोर्द्विः प्रयोगोऽपि तदनुकूल एव ।

रौद्ररसवर्णने यथा-

--------------

'इत्थेनां भाषमाणां रजनिचरपतिः क्रोधलिङ्गैः स्फुलिङ्गै-
र्दग्ध्वेवारुणोरमीदर्णां स्फुटघटितभुजास्फोटवाचाटिताशः ।
बिभ्राणो बभ्रुकेश्यं त्वमिह वससि को मृत्युवक्त्रार्धजग्धो
दुर्बुद्धे तिष्ठ यासि क्व पुनरिति गिरा मेदुरः प्रादुरासीत् ।।'

यथा वा -

'एवं को वा पराध्नोत्यमुमविगणयन् बाहुमत्रेति शुष्यन्
व्यक्तोरोरक्तरेखाकृतविरुदजगत्धातकत्व प्रशस्तिः ।
क्रोशन् मर्त्याङ्गखादस्वरणपरिचलत्ख्क्कलग्नास्थिदण्ड-
स्थूले दंष्ट्रे दधानः पवनभुवमभिप्राद्रवद् यातुधानः ।।'

अत्रोभयत्रापि रौद्ररसानुगुणा स्रग्धरा प्रचुरतरसंयुक्तपूर्वस्थलघुवर्णनिवेशनावसरप्रदत्वात् । पूर्वोक्तवीररसोदाहरणादत्रसंयोगपूर्वस्थलघुवर्णानामधिकत्वादत्र ओजोगुणाभिव्यञ्जनस्याऽऽधिक्यं स्पष्टमेव ।

क्षेमेन्द्रेण स्वकीये 'सुवृत्ततिलके' यद्यपि स्रग्धरायाः 'सावेगपवनादीनां वर्णने स्रग्धरामता' २२।३ इति नियमः सूचितः, किन्तु उपर्युक्तवीररौद्रोदाहरणेऽपि स्रग्धरा अधिकं चमत्कारिणी जातास्तीति न तिरोहितं भवेत् सहृदयानाम् ।

(२) शार्दूलविक्रीडितम्-

-------------

शार्दूलविक्रीडितच्छन्दस्यपि-

'सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्' १०१।३।वृ०र०

तदीयतल्लक्षणानुसारं गुरुवर्णानामाधिक्यम्, तेन छन्दस एतस्याऽपि उपर्युक्तसिद्धान्तानुसारं वीरबीभत्सरौद्रेष्वप्यानुगुण्यं संभवति, तदुत्कर्षकौजोव्यंञ्जकवर्णनिवेशनसरदातृत्वात् । वीररसवर्णने यथा -

'बिभ्राणो मणिदीप्रकुण्डलभरं कर्णत्रयं पार्श्वयो-
रभ्रे चाति मनोज्ञरूपमखिलैर्व्यूह्येषु दुर्योधनः ।
सेनादुन्दुभिनादतुन्दिलनभाः स्वस्याऽनुबिम्बायिते-
राशीवत्स नवाधिकैः परिवृतप्रान्तो नवत्याऽनुजैः ।।'

यथा वा -

'दृष्ट्वा तं मधुरस्मितोऽथ विजयः कृत्वाऽऽसनादुत्थितिं
नत्वाऽङ्घ्री समवेद्य भृत्यमिह मां ब्रह्मन् सहस्व क्षणम् ।
गावस्ते स्वयमाव्रजेयुरघुनेत्याश्वास्य दस्यून् पुरः
प्राविक्षन् मनसा ततस्तु नृपतेः शस्त्राय गेहं स्वयम् ।। १८।३'

अत्रोभयत्रापि वीररसानुकूलंशार्दूलविक्रीडितम्, उपध्मानीयजिह्वामूलीय संयोगपूर्वस्थलघुवर्णविन्यासस्य तदुत्कर्षकौजोव्यञ्जकस्याऽवसरप्रदत्वात् ।

भयानकविभाव-वीरानुभावयोर्यथा -

'कङ्कालोच्चयकल्पितान्तकचमूकुटीविभ्रमे
तत्र क्रुद्धसदोपबाहुयमहिष श्वासोग्रचण्डानिले ।
गृध्रध्वाङ्क्षशृगालघोषविकसद्रक्षोपदानस्तवे
भुञ्जानः शकटस्थ एव स तदा चक्रे महत्क्ष्वेलितम् ।। ४६।२।'

अत्र भयानकविभावस्य प्रथमद्वितीयतृतीयपादेषु चतुर्थपादे च वीरानुभावस्यानुगुणं शार्दूलविक्रीडितम्, तदुत्कर्षकौजोगुणव्यञ्जकसंयुक्ताक्षरपूर्वस्थलघुवर्ण-विन्यासावसरदायित्वात् ।

शृङ्गारेऽपि तन्निबद्धमुपलभ्यते । यथा -

------------------

' जाग्रत्सोमककीर्तिसोमनिमिषत्पद्मावकाशात्यय-
प्राप्तेन्दीवरवासनित्यघटनाश्यामप्रभा श्रीरिव ।
पाञ्चालस्य सुता ततः परिजनैः सार्धं पुरः पश्यतां
राज्ञां बुद्धिमिवाऽधिरुह्य शिविकां रङ्गस्थलीं प्राविशत् ॥' ७४।२

अत्र शृङ्गारालम्बनविभावस्याऽपि परिवृत्या वर्णने निबद्धमपि शार्दूलविक्रीडितं चमत्कारकमेव । स्वयंवरमण्डपे वीराणां स्थित्याऽत्र वीररसमयवातावरणात् अत्र कतिचित् संयुक्तपूर्वलघुवर्णानामुपध्मानीयस्य च स्थितिर्न विरुद्धा ।

यथा च -

' चञ्चाङ्गीमदपश्यतो हरवलच्छम्पा समुन्मेषणैः
पुष्यत्केतकगन्धसिन्धुविलुठत्पुष्पन्धयान्धीकृतैः ।
भेदस्वीकृतकेकिनीकलकलैर्मेघैकराशामुखैः
पान्थानामपमृत्युभिः कतिपयैः प्रादुर्बभूवे दिनैः ॥' ५३।३।

अत्र शृङ्गारोद्दीपनविभावे वर्णने निबद्धमपि शार्दूलविक्रीडितं चमत्कारकमेव । वर्षर्तौराटोपमयत्वात् ओजोव्यञ्जकानां कतिचित्संयुक्तपूर्वस्थलघुवर्णजिह्वामूलीयोपध्मानीयानां निबन्धनमनुकूलमेव ।

पण्डितराजजगन्नाथेन तु मधुरतरे विप्रलम्भरसे पि शार्दूलविक्रीडितं निबद्धं दृश्यते रसगङ्गाधरे यथा -

' आयातैव निशा निशापतिकरैः कीर्णं दिशामन्तरं
भामिन्यो भवनेषु भूषणगणैरुल्लासन्ति श्रियम् ।
वामे मानमपाकरोषि न मनागद्याऽपि रोषेण ते
हाहा बाल मृणालतोऽप्यतितमां तन्वी तनुस्ताम्यति ॥'

अत्र विप्रलम्भशृङ्गारेऽतितरां मधुरे सुकुमारमधुराक्षरैर्निबद्धमपि शार्दूलविक्रीडितं नितरामेव चमत्कारकम् । तेन क्षेमेन्द्रस्य शार्दूलविक्रीडितविषयको ' शौर्यस्तवे नृपादीनां शार्दूलक्रीडितं मतम्' २२।२ इति नियमोऽसंगत एव ।

(३) शिखरिणी

----------

शिखरिणीच्छन्दसि-

" रसैरुद्रैश्छिन्ना यमनसभलागः शिखरिणी " ।। ६।३। वृ०र० ।

तदीयेतल्लक्षणानुसारं लघुवर्णानामाधिक्यम् , अतः सुकुमारमधुरे रसे भावे चास्य नितरामानुगुण्यम्, किन्तु एतद्घटक बहुसंख्यक गुर्वक्षराणामव्यवधाने न स्थितत्वाद् संयोगपूर्वस्थवर्णानां जिह्वामूलीयोपध्मानीयानां टठडढानां च विन्यासेन वीराद्यनुगुणा ओजस्विनी रचनाऽप्यस्यां भवति , प्राप्यते तथा चम्पूभारतेऽपि ।

तत्र हर्षे यथा -

" ततस्तेशेषाद्रिं चिरमधिवसन्तः कुरुवराः

सिताश्वस्य प्राप्त्या मुदमनुबभूवुर्निरवधिम् ।

कथा शेषीकाराञ्त्रिदशरिपुवर्गस्य बहुधा

धनुर्ब्रह्मोज्झत्वं शतमखभुजे स्थापितवतः ।। " ४४।५।

अत्र मधुरे हर्षभावे शिखरिण्या नितरामानुकूल्यम् । उत्तरार्धे वीरानुभावस्य त्रिदशरिपुवर्ग विनाशनस्य निबन्धनात् ओजोव्यञ्जकसंयुक्तपूर्वलघुवर्णविन्यासेऽपि चमत्कारित्वमेव शिखरिण्याः ।

वीरे यथा -

-------

" रणोत्साहैशान्ते यदुजडिम कीर्तिध्वजलतां

मुहुः स्मारं स्मारं कपटयतितां वल्गितकुचम् ।

हसन्त्याः प्रेयस्या दशनरुचिमिश्रीकृतयशाः

शताङ्गेनाऽविक्षद् सुरपतितनूजो निजपुरीम् ।। ७८।३

अत्र पूर्णमनोरथतया प्रवृद्धोत्साहस्यार्जुनस्य निजपुरीप्रवेशवर्णने पूर्वसार्धपादद्वयव्यङ्ग्येन हास्यरसेन अवशिष्टसार्धपादव्यङ्ग्यो वीरस्थायी उत्साहः समुत्कृष्यतेतराम् । अतोऽत्र शिखरिणी नितरामेव चमत्कारिणी जाताऽस्ति । वीरोत्कर्षकओजोव्यञ्जक कतिचित्संयुक्तपूर्वस्थलघवः सन्त्येव । यथा च -

" अथ स्मित्वा तुन्दं परिमृशति मन्दायितगतौ

समापृच्छ्य प्रीत्या त्रिदिवमुपयाते हुतवहे ।
रथाभ्यां मौनिभ्यां घनसलिलसेकेन महता
विजेत्री तौ कृष्णौ विविशतु रुपान्तं नरपतेः ।। १३२।३

अत्र परिपूरितविप्रलम्भाऽग्निमनोरथयोः कृष्णार्जुनयोः युधिष्ठिरसमीपप्राप्तिवर्णने अग्निप्रसादेन समुत्कृष्यमाणस्यवीरस्थायिन उत्साहस्योत्कर्षकौजोगुणव्यञ्जक कतिचित्संयुक्तपूर्वस्थलघुवर्णविन्यासोऽस्त्येव । तेन च रुचिरतरैवेयं शिखरिणी । यथा च -

'घटीचेटी नौऽमूद् बहुपति वधूटी द्रुपदजा
वराकीं तामैत्राऽऽनय परिषदीत्यग्रजगिरम् ।
हरन् द्वैतीयीकः सुबलतनया सूनुषु जवा -
त्समुदस्थौ साक्षादवनिमवतीर्णो यम इव ।। ३६।४

अत्र परपराभवप्रवृत्तयोर्दुर्योधनदुःशासनयोर्गर्वचापल्यभावाभ्यां परिपुष्यमाणस्य तदुभयगतोत्साहस्योत्कर्षकौजोगुणस्य व्यञ्जकानां टकारत्रय- सविसर्ग-संयुक्तपूर्वस्थलघुवर्णानां स्थित्या वीररसेऽप्युपयुज्यमाना शिखरिणी चमत्कारिण्येव । यमोपमाऽपि उत्साहाश्रयस्य दुःशासनस्योत्कर्षण द्वारा वीररसोत्कर्षिकैव ।

एवमोजस्विवर्णनेष्विव मधुरसुकुमाररसभावादिष्वपि शिखरिणीभात्येव चमत्कारितया, तदुदाहृतमेव सकृदुपरि चम्पूभारतीयं हर्षध्वनिपद्यम्, अन्यदीयान्यपि भूयांस्युपलभ्यन्ते मधुरसुकुमारवर्णनपराणि शिखरिणी छन्दोबद्धानि पद्यानि गङ्गालहरीकरुणालहरीत्यादिषु, तेष्वेकं पद्यं यथा-

'नगेभ्यो यान्तीनां कथय तटिनीनां कतमया
पुराणां संहर्तुः सुरधुनि ! कपर्दो धिरुरुहे ।
कया वा श्रीभर्तुः पदकमलमक्षालि सलिलै-
स्तुलालेशो यस्यां तव जननि दीयेत कविभिः ।।'

एवं सत्यपि क्षेमेन्द्रेण शिखरिण्या 'उपपन्नपरिच्छेदकाले शिखरिणी मता' (२०१३) इत्युक्त्वा 'सुवृत्ततिलके' उपपन्नपरिच्छेदे नियमनमकारि तदसंगतमेव, विष

भ्रान्तरेऽप्यपि शिखरिण्या चमत्कारस्य दर्शनात् ।

(४) हरिणी

---------

हरिणीछन्दसि-

'रसयुगहयैर्न्सौम्रौस्लौ गो यदा हरिणी तदा' ६६।३।वृ०र०

इति तल्लक्षणानुसारं लघुवर्णानामाधिक्यम्, अतः सुकुमारमधुरे रसे भावे चास्य नितरामानुगुण्यम्, ओजोव्यञ्जकवर्णानामप्यत्र स्थापयितुं शक्यत्वात् वीरादौवस्विवर्णनेऽप्यस्य आनुगुण्यंसंभवति । तत्र वीरे यथा-

'तदनु परितः कीर्णैः पुष्पैस्तरङ्गितसौरभं
मणिमय-महार्घ्याच्छादान्वीन्द्रपरम्परम् ।
अगरुजनितैर्धूपैरालिह्यमानवितानकं
स्वनितपटहं प्रापुः पार्थाः स्वयंवरमण्डपम् ।। ७३।२।

अत्र वीरगणविराजितः स्वयंवरमण्डप आलम्बनविभावः पटहस्वनादिरुदीपनविभावः स्वयंवरमण्डपप्राप्तिरनुभावस्तइव्यग्रयाः पार्थगता धृत्यौत्सुक्यादयो व्यभिचारिणः तैः परिपोष्यमाणो पार्थगत उत्साहो वीररसतां प्राप्नोति, तदुत्कर्षकोजोगुणव्यञ्जक जिह्वामूलीयोपध्मानीय-संयुक्तपूर्वस्थलघुवर्णविन्यासेन वीरवर्णनेऽप्युपयुज्यमाना हरिणी चमत्कारिण्येव ।

लज्जाभावे यथा-

'कुवलय-दृशः कुम्भं जिग्युः कुचैरिति भाषिते
कैरिवरशिरः कर्मैत्येवं प्रहृष्टमनाश्चिरम् ।
द्रुपददुहितुर्दृष्ट्वा तुङ्गौ कुलालपतिः कुचौ
निजमपि घटं निश्चित्यैवं नितान्तमलज्जत ।

अत्र पूर्वसार्धचरणे कुवलयादीकर्तृक कुम्भकर्मकजये ओजोव्यञ्जकजिह्वामूलीयानां त्रिःप्रयोगेण हरिणीवीरेऽपि चमत्कारितया निबद्धा, तदग्रे च कुलालगतहर्षवर्णने द्रुपदजाकुचवर्णने कुलालपतिलज्जावर्णने च तदुपयुक्तसुकुमारमधुरवर्णैर्निबद्धा हरिणी चमत्कारिण्येव ।

औदार्ये औचित्ये च यथा -

'कतिपय दिने काले याते ततो मरुतां पतिः
सदसितनयं भानोरेत्याऽर्थिचाटुशताकुले ।
कवचमतुलं वाचाऽमाचत् सकुण्डलमादरा-
दयमपि तथेत्युक्त्वा शक्तिं ततो जगृहेऽद्भुताम् ।।' ६५।५

अत्र पूर्वपादत्रये याचनानुकूलमार्दवानुसारिणी सुकुमारमधुरैव रचना ,-ततः कर्णस्य शतमखं प्रत्यादरस्य वर्णनेऽपि तदनुकूला तादृश्येव रचना, एवं चमत्कारिण्येव हरिणी ।

(२०।३ सु.ति.)

एतेन 'औदार्यरुचिरौचित्यविचारे हरिणीवरा' इतिवदतः क्षेमेन्द्रस्य हरिण्या औदार्यरुचिरौचित्यविचारमात्रवर्णने नियमनमसंगतमेव, वीरादिष्वपितन्निबन्धनस्य संभवदर्शनात् ।

(५) मन्दाक्रान्ता

---------

मन्दाक्रान्ताच्छन्दसि-

'मन्दाक्रान्ताजलधिषडगैर्म्भौ नतौ ताद् गुरू चेत् ।। ६७।३।वृ०र० ।

इति तदीयलक्षणानुसारं सप्त लघवो दश च गुरवो वर्णा भवन्ति, तेन गुरूणामस्मिन्नाधिक्यात् ओजस्विवर्णनेऽस्य नितरामानुगुण्यम्, ओजोव्यञ्जकवर्णानामाधिक्येन स्थापयितुं शक्यत्वात् । किन्तु यदि ओजोव्यञ्जकावर्णा नाऽत्र प्रयुज्यसुकुमारमधुरा एव प्रयुज्येरन्, तर्हि सुकुमारमधुरवर्णनेष्वपि मन्दाक्रान्ता' निबन्धुं शक्यते ।

वीरे यथा -

'कृतेमल्लैर्धनुषि स गुरुद्रोहिणस्तस्य जीव-
ग्राहे बाहुर्मूलपरिलसत्खड्गवल्ली सहायः ।
पुत्रावल्यां सुबलदुहितुः पूर्वपदीमवन्त्यां
सिद्धान्तोऽमूर्द्धिवि भुवि बुधैः श्लाघितः सव्यसाची ।।' १०।२

अत्र द्रुपदस्य जीवग्राहे पराक्राम्यतोऽर्जुनस्य वर्णने वीररसे प्रयुक्ता म-

न्दाक्रान्ताचमत्कारिण्येव । वीरेतन्निबन्धनाय ओजोव्यञ्जकवर्णानां प्राचुर्यं-निवेशितमेवात्र ।

यथा च -

'पारेसिन्धु प्रथितमथतं प्रत्यहं वर्धमानं
सोढुं पार्थाभ्युदयमपटोः स्वात्मजस्यानुरोधात् ।
प्रीतो राजाऽप्यनुजतनय प्रेममार्गे प्रयातुं
मातुर्दोषादिव बहिरगादन्तरप्यन्धभावन् ।।' १६।२

अत्रापि पूर्वार्धे पार्थप्रभावस्य वर्णने उत्तरार्धे च तद्विषयकद्वेषेण अपथ प्रवृत्त-दुर्योधनधृतराष्ट्रयोर्निन्दावर्णने च चित्तदीप्तत्वरूपस्यौजसो व्यञ्जकानां वर्णानां प्राचुर्यनिवेशनेन सह प्रयुक्ता मन्दाक्रान्ता चमत्कारिण्येव ।

यथा च -

'आलंकायास्तदनु सहजैराहिमाद्रेर्जितः श्रीः
शौरेर्दोष्णा घटितनिजदोर्धर्मवेदिपार्श्वे ।
साहस्रीणां शतमखदुशामादधानोऽभ्यसूया
मन्यादृतां नियमैषरधीराजहाराश्वमेधम् ।। ३१।१२'

अत्र धर्मवीरवर्णने तदुत्कर्षकौजोव्यञ्जकवर्णविन्यासेन सह प्रयुक्तामन्दाक्रान्ता चमत्कारिण्येव ।

यथा च -

'वीरख्यातैस्त्रिभुवनतले विश्रुते नः कुलेऽस्मि-
न्नुत्पद्य त्वं बहुभिरनुजैरास्थितोऽप्याधिपत्यम् ।
एवं भृत्यः किमिह भजसे वत्स । नीचैः प्रणीतं
राजन्यानां परपरिभवो राजयक्ष्मा हि कीर्तेः ।। ६६।५'

अत्रापि युधिष्ठिरस्य दुर्योधनभर्त्सनेन तदुत्कर्षव्यञ्जनात्मकव्यतिरेकालंकारध्वनिना तद्गतागूढाधृतिमतिगर्वभावाध्वन्यमाना युधिष्ठिरगतमुत्साहं परिपोषयन्तो वीररसत्वेन तं परिणमयन्ति । तदुत्कर्षकौजोव्यञ्जकवर्णानां सन्निवेशन-सह प्रयुक्तात्राऽपि चमत्कारिणी मन्दाक्रान्ता ।

तेन कालिदासस्य मेघदूतमेवाभिलक्ष्यीकृत्य 'प्रावृट्प्रवासव्यसने मन्दाक्रान्ता विराजते' (११।३।सु० ति०) इति यदुक्तं क्षेमेन्द्रेण तत्तुच्छम् ।

(६) पञ्चचामरम्

---

'लघुर्गुरु निरन्तरं भवेच्च पञ्चचामरम्' (६३।४ रामचन्द्रबुधेन्द्र च०भा०-व्या०)

एतल्लक्षणानुसारं पञ्चचामरच्छन्दसि लघूनां गुरूणां च वर्णानां संख्या समैव । किन्तु लघुगुरुवर्णयोः क्रमशोऽत्र आसमाप्तिस्थितत्वात् इदं छन्द ओजस्वि वर्णन्यास्याधिकमनुकूलम्, सुकुमारमधुरवर्णैः तु यदि मधुरसुकुमारवर्णविन्यासे सावधानेन भूयेत, तर्हि तत्राप्यनुकूलं भवेदेव । पञ्चचामरनिबद्धे 'शिवताण्डवस्तोत्रे रावणो भगवद्विषयकरतिभावानुकूलसुकुमारमधुरवर्णनिवेशने प्रमाद्यतिस्म ।

यथा-

'कदा निलिम्पनिर्झरी निकुञ्जकोटरे वसन्
    विमुक्तदुर्मतिः सदा शिरःस्थमञ्जलिं वहन् ।
विमुक्तलोललोचनो ललामभाललग्नकः
    शिवेतिमन्त्रमुच्चरन्कदा सुखी भवाम्यहम् ।।' १२

अत्र विमुक्तशब्दस्य पुनरुक्तिः झ-ट-कः-स्थ-च्चेत्योजोवर्णानां प्रवेशश्च इतरसुकुमारमधुरवर्णव्यक्तं माधुर्यमपहृतमिव विदधाति । यदि-

'कदा दिवौकसां धुनी निकुञ्जगह्वरे वसन्
    जहन्मलीमसामतिं विहाय लोललोचनाम् ।
निधाय मूर्ध्नि चाञ्जलिं ललामभाललग्नकम्
    शिवेति मन्त्रमीरयन् कृती सुखी भवाम्यहम्', इति विधीयते परिवर्तनं तदा निर्बाधा स्यात् भगवद्विषयकरतिभावानुकूलात्र माधुर्याभिव्यक्तिः )

चम्पूभारते तु एतच्छन्दो निबद्धमेकमेव पद्यं प्राप्यते यथा-

'तपो विधौ स पावकेन सर्वदिक्षु वासवि-
    स्तदा बभूव वेष्टितो धनञ्जयत्वबान्धवात्
अजीजनच्च धर्मसूनुराजधर्मसू वैरिणां भवा-

नितीव दोषतोदिनेश एव चद्गु रदिपत् ।।' ६३।४

अत्रार्जुनतपश्चर्यावर्णने धर्मवीरे तदुत्कर्षकोजो व्यंजकवर्णनिवेशनेन सह-निबद्धं पृथ्वीचामरं चमत्कारकमेव । उत्तरार्धेऽपि सूर्यविषयकासूयाऽमर्षातिरेकानि-बन्धनात् ओजस्विनीरचना अनुकूलैव ।

(७) मालिनी

--------

'ननमयययुतेयं मालिनी भोगिलोकैः' ८७।३।वृ०र०

एतल्लक्षणानुसारं मालिनीछन्दसि लघुवर्णानां प्राचुर्यम्, तेन सुकु-मारमधुरवर्णनेऽस्याऽधिकमानुकूल्यम्, किन्तु ओजो व्यंजकवर्णनिवेशनेनास्य ओज स्विवर्णनेऽपि प्रयोगः कर्तुं शक्यते ।

तत्र वात्सल्ये यथा -

'नवतरुणिमलक्ष्मी नन्दनीयं शरीरं
कुरुवृषभसुतानां कुर्वती नेत्रपात्रम् ।
मुनिततिरिति मेने मोहनाय त्रिलोक्याः
स्वविशिख इव कामःसोऽपि किं पृथग्भूत् ।।' ६७।१

यथा वा -

'प्रद्युम्नरतनुभासा प्रावृषेण्यान् स मेघान्
दिशि दिशि विदधानो दीर्घदर्शी तदानीम् ।
कुरव इति महान्तं शब्दमाबिभ्रतोऽपि
स्ववचननिपुणिम्ना तानशोकानकार्षीत् ।।' ५४।४

यथा वा -

'अहमहरधिनाथोऽनुग्रहान्मे पृथाया-
मयिजननमगास्त्वं वत्स कोशो गुणानाम् ।
तदिदमिह रहस्यं शासनं गृह्यतां मे
तनय कुशल योगे तातपादा भतन्तो ।।' ८२।५

अत्र प्रथमद्वितीयपद्ययोः पाण्डुराजपुत्रविषयकस्य क्रमशो मुनितति निष्ठ

स्य भगवद्व्यासनिष्ठस्य च तथा तृतीयपद्ये कर्णविषयकस्य सूर्यनिष्ठस्य च वात्सल्यरसतया परिणमतो रतिभावस्य उत्कर्षकमाधुर्यगुणव्यञ्जकसुकुमारमधुरवर्णविनिवेशनेन सह निबद्धा मालिनी चमत्कारिण्येव ।

वैभववर्णने -

'तुहिनकिरणवंशस्थूलमुक्ताफलानां
विपुलभुजविराजद्वीरलक्ष्मीविभूम्नाम् ।
हसित सुरपुरश्रीरस्ति सा हस्तिनाख्या
रिपुजनदुरवापा राजधानी कुरूणाम् ॥' २।१

अत्र नगरीवर्णनगुणीभूततया कुरुवीरवैभववर्णने ओजोव्यञ्जकवर्णविन्यासेन सह निबद्धा मालिनी चमत्कारिण्येव ।

निद्राभाववर्णने यथा -

'रहसि नलिनतल्पे रत्नपर्यङ्ककल्पे
दिनविरतिसमीरैः सेव्यमानः स भीमः ।
तटभुविकुसुमानां तादृशैर्गन्धपूरै-
रधिकमलसतायां हा निदद्रौ निदद्रौ ॥' १।२।

अत्र निद्राभाववर्णने सुकुमारमधुरवर्णानां विन्यासेन निबद्धा मालिनी चमत्कारिण्येव । दकार-रकारसंयोगस्य द्विरुपात्तस्यापि स्वल्पत्वात् यमकचमत्कारमिलितत्वाच्च नाऽरुचिकरः । इदं छन्दः द्वितीयस्तबकस्य प्रारम्भे एवोपात्तमस्ति, चमत्कारकं च । तेन रघुवंशस्य षष्ठसर्गान्तस्थ 'शशिनमुपगतेयं कौमुदी मेघमुक्त'मित्यादि मालिनी पद्यमप्यालक्ष्मीकुर्वता क्षेमेन्द्रेण 'कुर्यात् सर्गस्य पर्यन्ते मालिनीं द्रुततालवत्' (३६।३) इति 'सुवृत्ततिलके' नियमनमकारि तदुच्यते ।

(८) वसन्ततिलका

------------

वसन्ततिलकाच्छन्दसि-

'उक्ता वसन्ततिलका तभजा जगौ गः' ॥ ७६।३।वृ०र०

इति तदीयलक्षणानुसारं गुरूणां लघूनां च वर्णानां संख्या समैव ।-

तेनेदं सुकुमारमधुराक्षरैः निगुम्फितं शृङ्गारवात्सल्यादि सुकुमारमधुरवर्णने ओजोऽभिव्यञ्जकवर्णैश्च निबद्धं वीराद्योजस्विवर्णने प्रयोक्तुं शक्यते । दृश्यते च तत्प्राचुर्येण तथैव चम्पूभारतेऽपि । तत्र -

वात्सल्ये यथा -

"आपादनेन समिधामभिषेकवारा-
मभ्यर्चना सुमनसामपि तापसेन्द्रः ।
मय्येव शिष्यजनता ममितां वितन्व-
न्नन्तो वसन्तमपि कौपमपाचकार ॥" ४०।१

अत्र पूर्वार्धे पृथागतमुनिविषयकरतिभावानुभावनिबन्धने उत्तरार्धे च मुनिगतपृथाविषयकवात्सल्यनिबन्धने प्रयुक्तैः सुकुमारमधुराक्षरैः वसन्ततिलकाऽतीव चमत्कारिणी जाताऽस्ति ।

यथा वा -

"प्रायायमानमखिलानथ पाण्डुपुत्रान्
द्रोणाविमानतुजिघृक्षुरुदारभूमा ।
एणाजिनेन घटितोद्गमनीयकृत्यो
वीणाविनोदरसिको मुनिराविरासीत् ॥"

अत्रापि नारदगतवात्सल्यवर्णने सुकुमारमधुराक्षरैः निगुम्फिता वसन्ततिलका चमत्कारिण्येव ।

शृङ्गारे यथा -

"तस्मिन्नभःसरणिमुत्पतिते मुनीन्द्रे
सा तेषु पञ्चसु समं ववृते मृगाक्षी ।
साङ्क्रन्दनेषु विटपिष्विव दानलक्ष्मी-
र्मानोभवेषु जयसिद्धिरिवाऽऽशुगेषु ॥" १६।३४

अत्र द्रौपदीनिष्ठपाण्डवबन्धुविषयकरत्यनुभावसमानवर्तनरूपे सुकुमारमधुराक्षराक्षरैर्निबध्यमाना वसन्ततिलका चमत्कारिण्येव ।

यथा वा -

"एलालवङ्गतरुपिप्पलिकापटीर-
ताम्बूलिकाक्रमुकदम्पतिभावरम्याम् ।
उद्यानभूमिमुपगम्य तया स पार्थः
सुख्यन् पितुःपदममन्यत बल्वजेभ्यः ।। ४१।३

अत्रापि अर्जुनस्य संभोगशृङ्गाररहर्षसंवारिभाववर्णने सुकुमारमधुरादारैर्निबद्धा वसन्ततिलका चमत्कारिण्येव ।

वीरे यथा -

"तीव्रोदयानविनयान् वधतां क्रमेण
दुर्योधनाद्यसुहृदां दुरहं कृतीनाम् ।
पट्टाभिषेकमनिलष्यति फालदेशे
कुट्टाकभावकुतुकं कुरुतेस्म भीमः ।।" ८३।१

अत्र भीमगतो दुर्योधनाद्यालम्बनक उत्साहो गर्वाग्र्यादिभिः कुट्टनादितच्चेष्टाव्यक्तैर्भावैः परिपुष्यमाणश्च वर्धते सहृदयैः । तदुत्कर्षकौजोव्यञ्जकवर्णैर्निबद्धा वसन्ततिलका चमत्कारिण्येव ।

यथा वा -

"तामागमन्नथपुरीं शतशः ससैन्याः
क्ष्मार्द्रं युगोदयमिवाऽद्भुतमावहन्तः ।
भूपाः स्तुता भुजमुदस्य पठद्भिरग्रे
पद्यं निबद्धविरुदं पटुबन्दिवृन्दैः ।। ७७।२

अत्रापि राजन्यवर्गगतोत्साहस्य वर्णने ओजोव्यञ्जकवर्णैः निबद्धा वसन्ततिलका चमत्कारिण्येव ।

तेन "वसन्ततिलका भाति संकरे वीररौद्रयोः" (१८।३।सुवृत्ततिल०) इति क्षेमेन्द्रकृतं वसन्ततिलकाया नियमनं न संगतम् ।

(६) प्रहर्षिणी

------------

"म्नौज्रौ गस्त्रिदशयतिः प्रहर्षिणीयम् ।।" ७०।३।वृ०र०

इति वृत्तरत्नाकरोक्तलक्षणानुसारं प्रहर्षिणीछन्दसि यद्यपि गुरुवर्णानां संख्या अधिका, तथापि "यथा नाम तथा गुणाः" इति लोकोक्तिं चरितार्थयन्तीऽयं प्रहर्षिणी सुकुमारमधुरेषु रसभावेषु प्रयुक्ताऽधिकं चमत्कारानुवर्षयति, तथैव च निबद्धा दृश्यते चम्पूभारतेऽपि । तत्र

शृंगारे यथा-

"नालीकात् कुवलयसंक्रमे स्खलित्वा
मग्नाधः पयसि रमैव तत्र काचित् ।
तं दृष्ट्वा भुजगसुता मिथो रिरंसुः
संतुष्टा हृदयमिवाऽऽनयत् स्वगेहम् ।। २२।३"

अत्र अर्जुनालम्बनक-भुजगसुतानिष्ठशृंगारसंचारिहर्षौत्सुक्यादिव्यञ्जकतत्स्वगेहानयनरूपानुभाववर्णने प्रयुक्ता प्रहर्षिणी रमणीयैव किन्तु "मग्नाधः पयसि रमैव" इति स्थाने "मग्नाधोऽम्बुनि कमलेव" इति पाठं "नयत्स्वगेहम्" इति स्थाने च "नयन्निकेतम्" इति पाठं परिकल्प्य उपध्मानीय-परुषतरतकारसकारसंयोगो निराकृतोऽभविष्यत्, चेत् तर्हि प्रहर्षिणी अत्यधिकं चमत्कारिणी अभविष्यत् ।

यथा वा -

"-न ताटङ्के तरलमणिप्रभातरङ्गैः तन्वङ्ग्या मुखमभितस्तदाव्यमाताम् ।
मूर्तत्वं प्रकटमुपेत्य जागरूके वर्णेङ्नयन विपाठ्योरिवान्ते ।।६१।२"

अत्र शृंगारालम्बनरूपद्रौपदीवर्णने प्रयुक्ता प्रहर्षिणी चमत्कारिण्येव। कतिचित् संयुक्ताक्षराणां निवेशोऽत्र सह्य एव, अत्र शृंगारस्य विप्रलम्भत्वाभावात् ।

रुचिरवस्तु वर्णने -

"भूदेवेष्वतिनिबिडेषु मध्यभाजां
पञ्चानामपि युगपत्पृथासुतानाम् ।
पुस्फोर द्रुपदपुरं पुरःप्रदेशे
वस्त्रं क्राव्जे सरभसमक्षिदक्षिणं च ।। ६८।२"

अत्र प्राप्य द्रुपदपुरदर्शनस्य इष्टसिद्धिसूचकशुभशकुनस्य च हर्षौत्सुक्यविभावरूप-मनोनुकूलरुचिरवस्तुनो वर्णने प्रयुक्ता प्रहर्षिणीचमत्कारिण्येव । अत्रापि कतिचित् संयुक्तोपध्मानीयाः दाम्या एव वर्ण्यस्याऽकरुणाविप्रलम्भशान्ताऽन्यतममधुरतरत्वाभावत् । स्फुरधातोः श्लेषानुरोधेन परिवर्तयितुमशक्यत्वाच्च ।- तथापि अत्र ओजोव्यञ्जकवर्णेषु किंचिन्न्यून्यंकर्तुं शक्यम् । यदि उत्तरार्धम् -

'अस्फोरीद् द्रुपदपुरं पुरो विभागे
वामान्यन्नयनमरं तथा ननाबुर्वे' एवं

निर्मीयेत, तर्हि स्यान्न्यून्यमोजोव्यञ्जकवर्णानाम् ।

यथा वा -

'अन्येद्युर्गृहमुपनीय पूजितांस्तान्
व्यासोक्त्या विदितवरः पुरामरातेः ।
पञ्चाऽपि क्षितिपतिनन्दनान् सुतायाः
पाञ्चालो निशिपरिणीतयेऽनुमेने ।। ८६।२'

अत्र पाञ्चालराजस्य मतिभावानुभावे स्वसुताविवाहाय पञ्चानामपि पाण्डवबन्धूनां स्वीकारात्मके सुकुमारमधुरादारैर्निबद्धा प्रहर्षिणी चमत्कारिण्येव।

(१९) मत्तमयूरम्

----------

'वेदैरन्ध्रैर्म्तौ यसगा मत्तमयूरम् ।।' (७२।३)

इति वृत्तरत्नाकरीयलक्षणानुसारं मत्तमयूरच्छन्दसि लघुवर्णानां संख्या नितरां न्यूनैव, गुरूणां च सुतरामधिका, अतः ओजस्विवर्णैऽस्य नितरामानुकूल्यम्, अधिकाधिकौजस्विवर्णनिवेशावसरदायित्वात्, किन्तु तादृशवर्णविन्यासपरिवर्जनेन सहेदं सुकुमारमधुरादारैर्घटितं सुकुमारमधुरवर्णेष्वपि प्रयोक्तुं शक्यते । धर्मोत्साहे यथा -

'तावत्पार्थास्तेऽपि पुनः काम्यकसीमां
हित्वा सर्धैर्भूविबुधानामनुयाताः ।
तीर्थव्रातान् विस्मृतपूर्वानवगाढुं

बध्वासाकं द्वैतवनारण्यमवापुः ।। १००।५

अत्र पाण्डवबन्धुगत तीर्थस्नानविषयकोत्साहवर्णने तदुत्कर्षकौजो व्यञ्जक जिह्वामूलीय-संयोगपूर्वस्थलघुवर्णैश्च निबद्धं मत्तमयूरं चमत्कारकमेव । भारतचम्प्वामेतच्छन्दसि इदमेवैकं पद्यम् ।

(११) अतिरुचिरा

-----------

'चतुर्ग्रहैरतिरुचिरा जभस्जगैः ।।' (७१।३)

इति वृत्तरत्नाकरीयलक्षणानुसारमतिरुचिराच्छन्दसि गुरुवर्णाऽपेक्षया लघुवर्णानां नितरामाधिक्यम् । तेन सुकुमारमधुरवर्णनेषु छन्दसोऽस्यनितरामानुकूल्यम्, किन्तु ओजोव्यञ्जकवर्णैरोजस्विवर्णनेष्वपि निगुम्फितुं शक्यमिदम्। अस्मिन् छन्दसि एकं पद्यं भारतचम्प्वां दृश्यते ।

उत्साहे यथा-

'दरीषु वा शिखरितटीभरीषु वा
पुरीषु वा घनवनवल्लरीषु वा ।
तिरोभवेदयमिति तं स मार्गितुं
रणस्थलात् पवनसुतोऽथ निर्ययौ ।।' ७।१२ ।

अत्र दुर्योधनान्वेषणानिर्गतस्य भीमसेनस्य तर्कद्युतिसंचारिसंवलितोत्साहवर्णने कतिचिदोजोव्यञ्जकवर्णैर्निगुम्फितं चमत्कारकमेवैतवृत्तम् ।

(१२) मञ्जुभाषिणी

--------------

'सजसा जगौ भवति मञ्जुभाषिणी ।' (७४।३)

इतिवृत्तरत्नाकरीयलक्षणानुसारं मञ्जुभाषिणीच्छन्दसि लघुवर्णानांसंख्या नितरामधिका, लघुषुमध्येमध्ये गुरोः प्रयोगेण तत्र गीतिष्विवरागस्वरवर्धनेन माधुर्यातिशयव्यञ्जकत्वात् , तेन 'यथानाम तथा गुणाः' इतिलोकोक्त्यनुसारं छन्दसि एतस्य सुकुमारमधुरेषु वर्णनेषु नितरामानुकूल्यम्, ओजोव्यञ्जकसंयुक्ताक्षराणां प्राचुर्येणाऽवसराऽदायित्वात् ।

भये यथा-

'अयि ! किं ब्रवीमि परिपाकमंहसामतिभीषणो बक इति पापाचरः ।
श्वशुरादरात्स्वयमिवागतो यमो यमुनावनान्तमवलम्ब्य वर्तते ।।' ४१।२

अत्र विप्रपत्नीगतभयस्य रक्षा आलम्बनं तद्भयंकरत्वनिकृष्टत्वादिकमुद्दीपनं तत्संनिधानस्य स्वीयांहःपरिपाककथनव्यंग्यदैन्यं संचारिभावः । तत्र दैन्यानुभावस्य स्वीयांहसांपरिपाकस्य वर्णने सुकुमारमधुरैव रचना, अग्रे च रक्षसो वर्णने कतिचिद्वर्णा ओजोव्यञ्जकाः ।

विवाहे यथा-

'अथजातुबाल्यसमर्पणात्कृतं परिपोषमस्य वपुषोऽभिवीक्षितुम् ।
स्पृहयालवः क्षितिपृथासुताः क्रमात् परिषस्वजुस्तुभुजं वधूसखाः ।।' १००।२।

अत्र शृंगारानुरूपविवाहमंगलवर्णने नितरामुपयुक्तैव मंजुभाषिणी । संयोगशृंगारे कतिचिदोजोव्यञ्जकवर्णाः सह्या एव ।

चन्द्रोदये यथा -

'मनुजावलीनयननन्दनैर्गुणैर्मघवादिदेवममभावगोचराः ।।
ककुभो विभेजुरमृतांशुभानवः क्षणमेवतंप्रथमशैलरोहिणः ।।' ३१।४।

अत्र चन्द्रोदयस्यलोकानन्दकारस्य वर्णनेऽपि प्रयुक्ता मंजुभाषिणी नितरामुपयुक्तैव । तत्र रचना सुकुमारमधुरैव ।

युद्धेऽपि कृतो दृश्यते अस्याः प्रयोगो यथा-

'अथ भिल्लमल्ल कुरुवल्लभावुभौ
परिफुल्लमल्लकुलशल्यपल्लवैः ।
स्थगितावलोकसरणिं दिवौकसां
समरं भयंकरमवं वितेनतुः ।। ८३।४।

अत्र युद्धवर्णने प्रयुक्ताऽपि मंजुभाषिणी न पुनः परुषतरसंयुक्तवर्णघटिता, भक्तेन सह शिवयुद्धस्य वास्तविकत्वाभावात्, तस्य केवलकौतुकरचनारूपत्वात् । वात्सल्यमूलस्य भगवतो भक्तेन सह समरकेलिकौतुकवर्णने प्रयुक्ता मंजुभाषिणी उपयुक्तैव ।

(१३) सुमङ्गलिका
------------

'सजसा सगौ यदि सुमङ्गलिकेयम् ।' इति रामचन्द्रबुधेन्द्रकृतचम्पूभारतीय व्याख्योल्लिखितलक्षणानुसारं मञ्जुभाषिणीवत् 'सुमङ्गलिका' छन्दस्यापि लघु वर्णानां संख्या नितरामधिका, तेन सुकुमारमधुरवर्णनेऽस्यापि नितरामानुकूल्यम्, अधिकाधिकमधुराक्षरावसरदायित्वात्, लघुषु मध्ये मध्ये गुरोः स्थापने तत्र गीति वत् रागस्वरवृद्ध्या माधुर्यातिशय व्यञ्जकत्वात् च, ओजस्विवर्णनेषु च न तथानुकू ल्यम्, ओजो व्यञ्जक वर्णानां प्राचुर्येणाऽत्र स्थापयितुमशक्यत्वात् ।
मतिभाव वर्णने यथा -

सततं सदर्थिसदसे बहुदातुं
सकुतूहलस्य पुरुषस्य जगत्याम् ।
उदकोर्मिका करधृता हि विभूषा
कनकोर्मिका तु परमङ्गुलिभारः ।।' ६७।५ ।
'दिवसेश ! यः ^शयः प्रतिकर्तुं
घृतलालसो भवति नार्थिषु दैन्यम् ।
प्रतिपादयेत्स तु कथं पुरुषस्य
प्रतिकूलवर्णं निजनामपदार्थम् ।।' ८८।५।

अत्र दानवीरस्य कर्णस्य सूर्यं प्रति विनीतप्रार्थनायां दानमाहात्म्य वर्णनव्यज्यमान मतिभाव वर्णने सुकुमारमधुराक्षरनिबद्धा सुमङ्गलिका नितरामुपयु-क्ता चमत्कारिणी च ।

(१४) द्रुतविलम्बितम्
--------------

'द्रुतविलम्बितमाह नभौ भरौ' (४६।३। वृ०र०) इति लक्षणानुसारं द्रुतविलम्बितच्छन्दसि गुरुवर्णापेक्षयालघुवर्णानां संख्या नितरामधिका, तेन छ-न्दसोऽस्य सुकुमारमधुरवर्णने नितरामानुकूल्यम्, अधिकाधिकसुकुमारमधुराक्षरवि-न्यासावसरदायित्वात् लघुषु मध्ये मध्ये गुरोर्विन्यासेन तत्र गीतिवद्रागस्वरवृ-

दृष्ट्या माधुर्यातिशयव्यञ्जकत्वाच्च । अत एव शृङ्गारमयेषु श्रव्यतु वर्णनेषु महाकविभिराद्रियतेतरामिदम् । चम्पूभारतेऽपि सुकुमारमधुरेष्वेषु शृङ्गारवात्सल्यादिष्वेवास्य प्रयोगो दृश्यते ।

तत्र शृङ्गारे यथा -

'कुरबकैरवकेलिभृतः सुधा समधुरं मधुरं मधु षट्पदाः ।
पपुरवापुरवार्यमपिस्मयं नृपवने पवनेरितपादपे ।।' ६६।६

अत्र शृङ्गारोद्दीपनविभावस्य वसन्तस्य वर्णने -

'स्मृतिपथस्थितयाऽपि सुमद्रया जनसमदामिवाऽसितुमाक्तभीः ।
द्विजकुलानि स तत्र समत्यजत् सहचराणि रतीशवशंवदः ।। ५१।३

अत्र तत्र च शृङ्गारानुभावस्य एकान्तसेवनोद्यमस्य वर्णने प्रयुक्तं द्रुतविलम्बितं मुपयुक्तमेव ।

वात्सल्ये यथा -

'मुनिसुतैरविशेषजुषो वने मुहुरमीनवशैशवकेलिषु ।
मलिनतामनयन्त कलेवरं मदकलाः कलभा इव धूलिभिः ।। ६१।१

अत्र वात्सल्यालम्बनविभावानां पाण्डुकुमाराणां वर्णने प्रयुक्तं द्रुतविलम्बितमुपयुक्तमेव ।

हर्षे यथा -

'भवनमेत्य तदा गृहमेधिनः पवनजप्रवणीकृतमूर्धनि ।
प्रयुयुजे समभाशिषमदातैः प्रमुदितः पुरि तत्र महाजनः ।।' ५५।२

अत्रापि हर्षानुभावे विप्राणां सादाताशीदाने मृदुमधुरवर्णैः सह प्रयुक्तं द्रुतविलम्बितं चमत्कारकमेव ।

रतिभावे यथा-

'अवभृथाम्बुकणैरिव नूतनैरधिगतामथ जालकमौक्तिकैः ।
स्वकबरीं द्रुपदस्य सुतापि सा सुबलजापदयोः समनीनयत् ।। २६।४

अत्र गान्धारीविषयकद्रुपदजानिष्ठरतिभावानुभावस्य तच्चरणावन्दनात्मकस्य वर्णने सुकुमारमधुरादारैर्निगुम्फितं द्रुतविलम्बितं कमपि चमत्कारमुर्व-

स्यति ।

(१५) पुष्पिताग्रा

' अयुजिनयुगरेफतो यकारो
युजि च न जौ जराश्च पुष्पिताग्रा ' ।। १०।४।वृ०र०

इति लक्षणानुसारं ' पुष्पिताग्रा ' वृत्ते लघुवर्णानां संख्या नितरामधिका, तेन वृत्तमिदं सुकुमारमधुरवर्णने नितरामनुकूलम्, अधिकाधिकसुकुमारमधुराक्षर विन्यासावसरदायित्वात्, लघुगुमध्ये मध्ये गुरोर्विन्यासेनगीतिष्विव रागस्वरवर्घनेन माधुर्यातिशयव्यञ्जकत्वात् च । किन्तु यदि ओजो व्यंजकवर्णैरिदं रचितं स्यात् चेत् तर्हि ओजस्वि वर्णनेष्वपि प्रयोक्तुं शक्यमिदं वृत्तम् । अतः शृंगारादि मृदुमधुरवर्णनेष्विव वीराद्योजस्विवर्णनेष्वपि प्रयुक्तं दृश्यते सफलतयेदं वृत्तम् ।

तत्र शृंगारे यथा-

' मृगमदतिलकं रराजतन्व्या मुखशशिना महसा बलाहृतायाः ।
चिकुरमिषगुणोऽपराधशान्त्यैनमितमपत्यमिवाऽन्धकारबन्धाः ।।' ८८।२

अत्र शृंगारविभावद्रुपदजायामृगमदतिलक वर्णने -

' सकलमपि वपुर्विमृष्य तन्व्याः सपदि सखी विपुलेक्षणाम्बुजाऽपि ।
चिरतरमनवेक्ष्य मध्यदेशं करधृतकाञ्चिन काञ्चिरेव तस्थौ ।।' ६३।२।।

अत्र च तस्या एव मध्यदेशस्य वर्णने मृदुमधुराक्षरैः सह प्रयुक्ता पुष्पिताग्रा चमत्कारिण्येव ।

हर्षे औत्सुक्ये च यथा-

' इति वचनमयीं सुधां किरन्तीं यदुनृपतेस्तनयां प्रशंसमानः ।
पतिरनुमनुते स्म पौरवाणां प्रकृतमहोत्सव पारदर्शनाय ।।' ४५।१

अत्र पाण्डुगतहर्षानुभावस्य पृथा प्रशंसायाः तद्गतौत्सुक्यानुभावस्य च पुत्रावाप्त्युपायाचरणानुमतेश्च वर्णने मृदुमधुरैर्वर्णैर्गुम्फिता पुष्पिताग्राचमत्कारिण्येव ।

वीरे यथा-

' सशकटमधिरुह्यमीमसेनो दधिकलशीकुलशीभरान्नराशिम् ।
बकभुवनं (वनं) विवेश शाखानगरमिवाऽन्तकवीरराजधान्याः ।। ४८।२।'

अत्र भीमसेनगतधृतिभावानुभावस्य बकवनेतत्प्रवेशस्य वर्णने शकारादिक तिचिदोजोव्यञ्जकवर्णैः सह प्रयुक्ता पुष्पिताग्रा चमत्कारिण्येव ।

यथा वा-

' सदसि न विकृतोमदच्युतोऽभूत् स तु परुषादारमण्डलेन शत्रोः ।।
वहिरवसदुपेत्यतच्छ्रवोभ्यां बहुतरकुण्डलनीलरत्नलक्ष्यात् ।। १५।४।।'

अत्रापि भगवद्गतधृतिभावानुभावस्य शिशुपालपरुषादारश्रवणेऽप्यविचलितत्वस्य वर्णने षकार-शकार-संयुक्तवर्णैरोजोव्यञ्जकैर्घटितापुष्पिताग्रा चमत्कारिण्येव ।

(१६) स्वागता

-----------

' स्वागतेति रनभाद् गुरुयुग्मम्' (३६।२ वृ०र०।)इतिलक्षणानुसारं स्वागताच्छन्दसि गुरुवर्णापेक्षया लघुवर्णानां संख्या अधिका । लघुवर्णेष्वपि मध्ये मध्ये गुरुवर्णस्य स्थितिः, अतो गीतिष्विवरागस्वरवृध्यामाधुर्यव्यञ्जनेन मृदुमधुर वर्णनेषु नितरामुपयुक्तम् । तेन चम्पूभारतेऽपि वृत्तमिदं शृंगारवात्सल्य-कारुण्यादि सुकुमारमधुरेष्वेव रसभावेषु निगुम्फितं दृश्यते । तत्र शृंगारे यथा-

' किंशुकस्य वदने रुचिरत्वं किंशुकस्य हृदयेऽपि वशित्वम् ।
किंशुकस्य कुसुमेषु नदन्ती शंसतिस्ममधुपालिरितीव ।। ६८।१

अत्र शृंगारोद्दीपनविभावस्य वसन्तस्य वर्णने प्रयुक्तास्वागता ।

यथा च -

' तत्रकाऽपि तरुणी तडिदाभा तं ययौ जतुगृहे सुहितेन ।
चूषणाय तमसां वनमार्गे प्रेषिता हुतवहेन शिखेव ।।' २५। २

अत्र शृंगारालम्बन-विभावस्य तरुण्या वर्णने प्रयुक्ता स्वागता ।

यथा च -

' अर्जुनेषु सकलेषु विकासिष्वद्रिसीम्निवृततादृश शब्दः ।

एक एव विशुशोषविशेषादेतदम्बुभृदनेहसि चित्रम् ।। ५६।३।'

अत्र ~~शृंगमसौदाहरणमेकेस्मि~~ शृङ्गारोद्दीपनाश्रययोः वर्षर्तुपार्थयोर्वर्णने प्रयुक्ता स्वागता ।

वात्सल्ये यथा -

'पड्भिरात्मपितृयोषिति भूमौ स्पर्शनं परिहरन्त इवैते ।
जानुभिः करसरोजसहायैश्चङ्क्रमं चमदकुर्वत बालाः ।।' ५७।१।।

'तत्र तत्र मृदुपांसुषु पाण्डोः पुत्रपादतलविन्यसनेन ।
छत्रकेतुकुलिशैः स्फुटरेखैश्चित्रवत्यभवदाश्रमभूमिः ।।' ६१।१।।

अत्रोभयत्रापि वात्सल्यालम्बनानां पाण्डुकुमाराणां वर्णने प्रयुक्ताऽस्ति स्वागता ।

करुणे यथा -

'तन्निशम्य समभेत्य कुमारैस्तादृशं पतिमवेक्ष्य रुदत्याः ।
भीमपुष्करभुवोऽश्रुनिपातैर्भूरपि स्वयममुञ्चतबाष्पम् ।। ७८।१

अत्र पृथागतकरुणरसानुभावोऽश्रुनिपातवर्णने प्रयुक्ता स्वागता ।

दैन्ये यथा-

'तादृशः प्रलयकालकठोरो वासरः सखिममाऽऽलयभूमेः ।
द्वारितिष्ठति बलात्परितुष्टात् पारितोषिकमिवाऽऽयधृद्गुः ।। ४३।२

अत्र विप्रपत्नीनिष्ठमयसंचारिदैन्यवर्णने प्रयुक्ताऽस्ति स्वागता ।

शृङ्गारसंचारिविस्मये यथा-

'द्रौपदीमुखशशिद्युतिसंपत्कौमुदीमहसि खुतटाके ।
पक्ष्मचक्रयुगलं नृपतीनां तत्क्षणं विजघटे बहुदूरम् ।।' ७५।२

अत्र द्रौपदीविषयकराजकगतरतिसंचारित्वप्राप्तविस्मयानुभावस्य सनयनविस्फारसदृर्शनस्य वर्णने प्रयुक्ता स्वागता रुचिरैव ।

(१७) रथोद्धता

-----------

'रान्नराविह रथोद्धता लगौ' (वृ०र० ३८।३) इति लक्षणानुसारं रथो

द्धताच्छन्दसिलघूनांसंख्या किंचिदधिका, अतो वृत्तमिदं माधुर्यव्यञ्जकवर्णैर्मृदुमधुरवर्णनेषु ओजो व्यञ्जकवर्णैश्च ओजस्विवर्णनेषु प्रयोक्तुं शक्यम् । तेन क्षेमेन्द्रेण सुवृत्ततिलके 'रथोद्धता विभावेषु भव्या चन्द्रोदयादिषु' (१८।३) इति यदुक्तम्, तदपर्याप्तमेव मन्तव्यम् ।

'अङ्गुलीभिरिव केशसंचयं संनियम्य तिमिरं मरीचिभिः ।
कुड्मलीकृतसरोजलोचनं चुम्बतीव रजनीमुखं शशी ॥'

इति चन्द्रोदयवर्णनवत् -

'अर्घ्यमर्घ्यमिति वादिनं नृपं सोऽनवेक्ष्य भरताग्रजो यतः ।
क्षात्रकोपदहनार्चिषं ततः सन्दधे दृशमुदग्रतारकम् ॥'

इति रौद्राश्रय-परशुरामवर्णनेऽपि कालिदासस्य रथोद्धता भव्यैव । -चम्पूभारते मृदुमधुरवर्णनेष्विव ओजस्विवर्णनेष्वपि प्राचुर्येण प्रयुक्ता रथोद्धता-दृश्यते । तत्र विषादे यथा -

'साध्वयेयमिह धर्मसंग्रहं संदधाति मिथुनं परस्परम् ।
अंधिये परमनेकजन्मनो राँवयो रजनि द्रापसंग्रहः ॥' ४०।२ ।

अत्र विषादध्वनौ मृदुमधुराक्षरैर्निबध्यप्रयुक्ता रथोद्धता रुचिरैव । रतौ क्रीडायां च यथा -

'पार्थमेव पुरतो निधायते कौरवास्तदनु सन्निधौ गुरोः ।
भक्तिभिर्व्यनमयन्निजंशिरः पार्षतस्तु परिभूतिलज्जया ॥' ११।२।

अत्र पूर्व सार्धपादे कौरवाणां पार्थविषयकसंमाननायाः तदनुसार्धपादेच तेषामेव गुरुविषयकरतिभावस्य वर्णने तदनुरूपा मृदुमधुरवर्णैर्निगुम्फिता त तश्च पराभूतपार्षतनिष्ठक्रीडाया वर्णने तादृङ्माधुर्याभावात् अमधुरैरेव वर्णैर्निबद्धा रथोद्धता चमत्कारिण्येव ।

करुणे यथा -

'निद्रया किलनिमीलितं मृतैर्मुद्रया निजमुदीक्ष्य वल्लभम् ।
उद्रवाकमुदस्य विह्वला भद्रराजतनया रुरोद सा ॥' ७७। १

अत्र करुणरसेऽपि मृदुमधुरवर्णगुम्फिता रथोद्धता रुचिरैव ।करुणे

पाचभाग प्रयुक्त ' द्र' वर्णसंयोगोमनाक्परुषो यमकप्रयोजको (करुणो) सह्य एव। एवमेव अनर्थपातवर्णने-

' मर्मदत्तदशना भुजङ्गमा मारुतेर्वपुषि सुप्तिभूरुहः ।
मुष्टिमेयतनवो विरेजिरे मूलिका इव बहिर्विनिर्गताः ।।' ४।२।

' तत्र ते विदुरभृत्यभाषितैः सौबलेयशतमन्युहेतुना ।
पूतामपि परां धनंजयप्रापणेन जतुधाम्नि मेनिरे ।। २०।२।

' तत्र तेन जगृहे तरस्विना चक्षुषा नृपतिरर्जुनासखः ।
पाणिना च सशरं शरासनं भूतये सपदि विप्रवासयोः ।।' १६।३।

इत्यादावपि अनन्तकविना रथोद्धतैव प्रयुक्ता कुपर्युक्ते ' अर्घ्यमर्घ्यमि त्यादि कालिदासीयपद्य इव अतीवोपयुक्तत्वेन चमत्करोति ।

वीरे यथा -

' अस्त्रमात्मसमनाम दैवतं संप्रयुज्य समरे धनंजयः ।
तत्र तस्य रथमग्रवर्तिनं जातुषालय सहाय मातनोद् ।।' ६२।२ ।

' तन्नचित्रमवनीपतेस्ततश्चन्द्रहासपतनं चकारयत् ।
पोषितेषु वनमध्यवर्यया पुण्डरीकनिवहेषु मीलनम् ।।' २४।१

' वृद्धतापसः पुरः प्रसारितं वेणुदण्डमवलम्ब्य शैशवे ।
भावयन्निव गदापरिग्रहं भाविनं पवनभूश्चचार सः ।।' ५६।१

' इत्यादावपि वीरानुभाववर्णने प्रयुक्ता रथोद्धता उपयुक्तवर्णनिबद्धा-वर्णनस्योजस्वितां वर्धयन्ती चमत्करोत्येव ।

(१८) शालिनी

-----------

' शालिन्युक्ताम्तौ तगौ गोऽब्धिलोकैः' (वृ०र० ३४।३ )

इति लक्षणानुसारं शालिनीछन्दसि एकादशवर्णेषु लघुवर्णौ केवलौ द्वा वेव गुरवो वर्णाश्च नव । तेन वृत्तमिदं ओजस्वि वर्णनेषु नितरामनुकूलम् , अधिकाधिकौजोव्यञ्जक वर्णविन्यासावसरप्रदत्वात्, किन्तु कुक मृदु मधुरादारैर्नि गुम्फ्य वृत्तमिदं मृदुमधुरवर्णनेष्वपि प्रयोक्तु शक्यम् । चम्पूभारते वृत्तमिदमुभयत्र प्र

युक्तं दृश्यते । तत्र वीरे यथा -

'शंखान् दध्मुरताड्यन्तिस्म भेरी
श्चक्रुः श्वेलांश्चापनादान् विबुधाः ।
सिद्धादीनां घोसदां लालनीये
युद्धारम्भे ते द्वयेऽपि प्रवीराः ॥' (१०७।२)

यथा च -

'आरुह्याथार्कबिम्बे परेद्युः साकं सैन्यैः सार्वभौमः कुरूणाम् ।
पार्थादेकां बिभ्रदाहृत्य गोत्रां मात्स्यादन्यां तत्पुरं हर्तुमागात् ॥' ११७

इत्यादौ ओजो व्यञ्जकवर्णगुम्फनेन सह वीरे प्रयुक्ता शालिनी चमत्कारिण्येव ।

वात्सल्ये यथा -

'आकर्ण्येदं जृम्भितानां यदूनां पार्थोद्दिशात्क्रोधनत्वस्य जातैः ।
म्लानिं दातुं माधवो माधवीऽभूयत्रायता कौरवी सा समृद्धिः ॥' ७७।३

अत्र पार्थविषयकभगवन्निष्ठवात्सल्ये मृदुमधुरवर्णैर्निगुम्फ्य प्रयुक्ता शालिनी रुचिरैव । चतुर्थचरणे यदि मनाक् परिवर्तनं 'यस्याऽधीनं कौरवं वैभवं तद्' एवमकरिष्यत, तर्हि मधुरस्य वात्सल्यस्याधिकमनुकूलाऽभविष्यत् शालिनी ।

यथा वा -

'दत्वाचरत्प्रत्यहं यद्यदिष्टं यावत्स्वेषामात्मजानां शतेऽपि ।
पाण्डोः पुत्रेष्वम्बिकासूनुरेतेष्वेकैकस्मिन् प्रेमतावद्बबन्ध ॥' ८२।१।

अत्रापि पाण्डुपुत्रविषयक-धृतराष्ट्रनिष्ठवात्सल्ये प्रयुक्ता शालिनी-यदि प्रथमचरणे 'तेभ्यो नित्यं वाञ्छितार्थान् वितीर्य' एवं अथवा 'तेषां नित्यं वाञ्छितार्थान् वितन्वन्' एवं मनाक् परिवर्तिता व्यधास्यत, तर्हि नितरां रुचिराऽभविष्यत् ।

(१६) वैतालीयम्

------------

'षड्विषमेऽष्टौ समेकलास्ताश्च समेस्युर्नोनिरन्तराः ।

न समाऽत्र पराश्रिता कला, वैतालीयेऽन्ते रलौ गुरुः ।।' १२।२।वृ०र०

इति लक्षणानुसारं वैतालीयच्छन्दसो बहुषु भेदेषु कविभिः प्राचुर्येण प्रयुक्तेभेदे विषमचरणयोस्त्रयोदशमात्रासु समचरणयोश्च षोडशमात्रासु गुरुवर्णापेक्षया लघुवर्णानां संख्या अधिकैव । किन्तु आर्याजातीयस्य गीत्यात्मकस्यास्य छन्दसः सुकुमारमधुरेष्वेव वर्णनेषु आनुकूल्यम् , लघुषु मध्ये मध्ये गुरोर्विन्यासेन तत्र गीतिष्विवरागस्वरवर्धनेन माधुर्यातिशयव्यञ्जकत्वात् ।अतो महाकविना कालिदासेन अजस्य इन्दुमत्या सह वनविहारात्मकशृङ्गारवर्णने तस्या मरणानन्तरं तन्निष्ठकरुणवर्णने च तथा महाकविनाश्रीहर्षेण हंसमुखेन दमयन्तीवर्णने च इदमेवच्छन्दः प्रयुक्तमस्ति । तथैव भारतचम्पूकारेणापि वैतालीयस्य प्रयोगः-शृङ्गारादिषु मृदुमधुरेष्वेव वर्णनेषु कृतोऽस्ति साफल्येन ।

शृङ्गारे यथा-

' कुरुकेलिवनेषु मल्लिका कुसुमेषु भ्रमरावलिर्बभौ ।
ऋतुनाथपुगन्धगुप्तये जतुनाग्रे निहितेव मुद्रिका ।।' ८३।३

अत्र शृङ्गारोद्दीपनविभाववनीवर्णनं मधुरादारैर्निबद्धम् ।

यथा वा

' वपुषामधुरेण सुभ्रुवो धनुषा चित्तभुवश्च तर्जितः ।
तपसेव दिने दिने तनोस्तनिमानं जगृहे स मस्करी ।।' ६५। ३

अत्र शृङ्गारालम्बनोद्दीपनविभावयोः सुभद्रातत्सौन्दर्ययोस्तदनुभावस्य च पार्थतनिम्नो वर्णनं मधुरादारैर्निगुम्फितमस्ति ।

दैन्ये यथा -

' परिपालयतोऽपि मे महीं परिपूर्तिर्न तनूजदुर्गतेः ।
प्रजया हि मनुष्य इत्यसौ प्रथते हि श्रुतिवर्णपद्धतिः ।।' ३१।१

अत्र सन्तत्यभावप्रयुक्तं पाण्डोर्दैन्यं मधुरादारैर्न्यगुम्फ्यत ।

यथा वा -

' सविधज्वलनोष्मवीचिभिः सपदिम्लानकपित्थशाखिनाम् ।
परिपाकसिताः फलव्रजाः प्रबभुः स्फोटकबुद्बुदा इव ।।' १२०।३।

अत्र दवानलकृतवनदुर्दशा वर्णनियुक्तं वैतालीयं समुपयुक्तमेव । किन्तु प्रथमपादे ' सविधानलताम पवीचिभिः ' इति ' प्रबभुः ' इत्यत्र च ' विबभुः ' इति कृते परिवर्तने परुष संयुक्तोपध्मानीयवर्णसंख्यानिमून्यं माधुर्यानुगुणं स्यादेव ।

इष्टश्रवणे यथा-

' न हि तत्र भवेदपार्थता विजयः सिद्धिमुपैष्यति स्फुटम् ।
युगपत्सुखमस्तु वो महद् द्रुतमागच्छत तन्महौजसः ।। ' ५६।२

अत्र द्रौपदी स्वयंवरे पार्थानां सफलताविजयस्य च सिद्धिः मधुराक्षरनिबद्धवैतालीयेन सूचिता ।

इष्टदर्शने यथा-

' पयसा परिपूरितौ घटौ परिपश्यन् पथि पाकशासनिः ।
कमलाक्षकनीयसीकुचौ कलयामास करस्थिताविव ।। ' ५२।३

अत्र सुभद्राप्राप्त्यैचलितस्यार्जुनस्य सिद्धिसूचना सुकुमारमधुराक्षरमयवैतालीयनिबद्धशुभशकुनदर्शनेन निगुम्फिता ।

रतिभावे यथा-

' यदवः खलुपुण्यराशयो यतिनामिन्द्रतवाङ्घ्रिसेवनात् ।
शिरसैकमवाप्य यद्रजो मनसाऽन्यत् परिवर्ज्यते च यैः ।। ' ७०।३

अत्र सुभद्राया यतिविषयकभावे सविनयस्तुतौ सम्यगेव प्रयुक्तं वैतालीयम् ।

औत्सुक्ये यथा -

' भगवन्नखिलं विबुध्यसे परमार्थं वद भावि मे शुभम् ।
प्रयता यतयो भवद्विधा प्रणिधानेन हि दिव्यचक्षुषः ।। ' ७१।३।

अत्र सुभद्रायाः स्वभाविजिज्ञासारूपमौत्सुक्यं यतिस्तुतिं च वर्णयिता सम्यगेव प्रयुक्तं वैतालीयम् ।

(२०) औपच्छन्दसिकम्

---------------

' पर्यन्तेयौ तथैव शेषमौपच्छन्दसिकं सुधीभिरुक्तम् ।। १३।२।वृ०र०

वैतालीयच्छन्दस । उपर्युक्तलक्षणानन्तरमुक्तेनाऽनेनौपच्छन्दसिकच्छन्दसो लक्षणवाक्येन वैतालीयच्छन्दसः समविषमपादोक्तवर्णान्तरमेकैकेन गुरुवर्णेन योजितेन औपच्छन्दसिकं छन्दो भवति । तदनुसारं च लघुवर्णानां संख्या छन्दस्यस्मिन् किंचिदधिका । किन्तु वैतालीयवत् इदमपि आर्याजातीयत्वेन गीत्यात्मकत्वात् लघुषु मध्ये मध्ये गुरोः प्रयोगेन गीतिष्विव तत्ररागस्वरवर्धनेन माधुर्यातिशयव्यञ्जकत्वाच्च सुकुमारमधुरेष्वेव वर्णनेषु कविभिः प्रयुज्यते । छन्दसोऽभिप्रायस्याऽऽनुरूप्यम् उपच्छन्दसम्, तत्प्रयोजनमस्य तदौपच्छन्दसिकम्, इत्यानुरूप्येऽव्ययीभावेन तत्प्रयोजनार्थकठका च सिद्धया छन्दःसंज्ञयाऽपि तस्य मृदुमधुरेष्वेव वर्णनेष्वानुकूल्यं बोध्यते, अत एव भारतचम्प्वामपि वृत्तमिदं शृङ्गारवात्सल्यादिषु मृदुमधुरेष्वेव वर्णनेषु प्रयुक्तं दृश्यते । तत्र शृङ्गारे यथा-

'सुतराजनमोदमादधाते सुतनोर्मौक्तिकरत्नकर्णपद्मे ।
परिचेतुमिवाऽऽननेन्दुसेवां परिवेषस्य शिशू समीपभाजौ ।।' ६०।२।

अत्र शृङ्गारस्य आलम्बनविभाववर्णने प्रयुक्तं मधुराक्षरनिबद्धमौपच्छन्दसिकम् ।

यथा च -

'शुभसौरभसंभृतानि भूमौ शुचिभूतान्यपि यानि पाटलानि ।
कलयेयुरतीव चित्रभावं क्षणपीतानि दृशा कथं न तानि ।।' ८४। ३।

अत्र शृङ्गारस्य उद्दीपनविभाववर्णने मधुराक्षरैर्निगुम्फ्य प्रयुक्तमौपच्छन्दसिकम् ।

वात्सल्ये यथा -

'सरुषीव हरे विकृष्टचापे सशरं शैलसुताऽपि जातशङ्का ।
मघवत्सुतमङ्गलायदेवीमनसा यात इषु श्रुतिं जजाप ।।' ८५।४

अत्र अर्जुनविषयकपार्वतीनिष्ठवात्सल्यस्य वर्णने प्रयुक्तमौपच्छन्दसिकम् मधुराक्षरनिबद्धम् ।

यथ वा -

'अणुमात्रमिदं सहेतवोढुं नहि विश्वम्भरमधमामितीव ।

मनसोऽध्यवरुह्य तस्य दृष्टेः पुरतः प्रादुरभूत् पुमान् पुराणः ।।५६।३

अत्र अर्जुनविषयकश्रीकृष्णनिष्ठवात्सल्यस्य वर्णने मधुराक्षरनिबद्धमौप च्छन्दसिकं प्रायुज्यत ।

धर्मोत्साहे यथा -

'हरिणा सततः कृताभ्यनुज्ञो हविरादातुमिवाऽऽगतेन साक्षात् ।
क्रमवेदिपुरोधसां समूहैः क्रतुमाहर्तुमुपक्रमं प्रचक्रे ।।' ७।४।

अत्र पूर्वार्धे युधिष्ठिरस्य भगवत्प्रसादयात्रत्वस्य तृतीयचरणे पुरोधसा मार्जवस्य च व्यञ्जने मदुमधुरवर्णरचितं चतुर्थचरणे च युधिष्ठिरस्य क्रतुसमारम्भोत्साहव्यञ्जने ओजस्विवर्णघटितमौपच्छन्दसिकं सुतरां दीप्यतेतराम् ।

यथावा -

'नरदेवमगाज्जये प्रतीच्यानकुलेनैव वसूनि विस्तृतानि ।
दधदानकदुन्दुभिस्वनैर्यां दलयन्नानकदुन्दुभेः कुमारः ।।' ६।४

अत्र युधिष्ठिरविषयकस्नेहेन तदीययज्ञसमारम्भसाहाय्यसंपादने श्रीकृष्णस्योत्साहव्यञ्जने मधुरौजस्विमिश्रितवर्णघटितमौपच्छन्दसिकं राजतेतरासुतराम् ।

यथा वा -

'फलपर्णजलानिलाशनानि प्रविहाय क्रमशस्तपस्यतोऽस्य ।
विषयेषु न लोलतां प्रपेदे विजयस्याऽऽशुगुणः कराग्र एव ।।' ६५।४

अत्र अर्जुनस्य भगवद्विषयायारतेस्तत्प्रयुक्ततपश्चर्योत्साहस्य च व्यञ्जनाय मधुरौजस्विवर्णरचितमौपच्छन्दसिकम् भातितरांसुतराम् ।

औत्सुक्ये यथा-

'इति वाचमुपश्रुतिद्विजातेर्हृदिकृत्वा सुधयेव निर्मितां ताम् ।
पथिभूसुरसंघमध्यभाजः प्रतिपञ्चालपुरं प्रतस्थिरे ते ।।' ६०।२।

अत्र इष्टश्रवणस्य तल्लाभार्थकयत्नस्य च वर्णने मधुरवर्णरचितं रुचिरमेवौपच्छन्दसिकम् ।

यथावा -

'जननान्तरनेत्रवारिसृष्टत्रिपथाहैमपयोजगुम्फितेव ।

बलवैरिभुवस्तया ऽधिकण्ठं वरणे चम्पकमालिका वितेने ।।' ८३।२

अत्र अर्जुनविषयकद्रौपदीनिष्ठौत्सुक्यस्य वर्णने मधुराक्षरगुम्फितमपि छन्दसिकं रमणीयमेव ।

(२१) प्रमिताक्षरा

---

'प्रमिताक्षरा सजससैरुदिता' ६०।३। वृ०र० इति लक्षणानुसारं प्रमिताक्षराच्छन्दसि गुरुवर्णापेक्षया लघुवर्णानां संख्या अत्यधिका । तत्र च लघुषु मध्ये मध्ये गुरोर्विन्यासेन गीतिष्विव तत्र रागस्वरवर्धनेन माधुर्यातिशयव्यञ्जकत्वात् सुकुमारमधुरवर्णनानामधिकमनुकूलमिदं वृत्तम् । अत एव शृङ्गारादि मृदुमधुरेष्वेव वर्णनेषु प्रयुक्तमिदं दृश्यते चम्पूभारते ऽपि ।

तत्र शृङ्गारे यथा-

'अधिनासिका शिखरमाकलितं नवमौक्तिकं नरपतेर्दुहितु: ।
शुशुभे मुखाम्बुरुहमध्यचरस्मितहंसिकाजनितमण्डमिव ।।' ६६।२

अत्र शृङ्गारविभाववर्णने मृदुमधुरवर्णगुम्फिता प्रायुज्यत प्रमिताक्षरा।

यथा च -

'कठिनत्वसंपदवलेपभरात् कुचकुड्मलस्य कुरुवीरवधू: ।
कृतनिर्णयेव पतिपाणिघृतं पदमश्मन: शिरसि सान्निधे ।।'

अत्र रत्यनुभावो मधुराक्षरगुम्फितया प्रमिताक्षरया साधुवर्णित: ।

यथा च-

'दिवसे शुभंयुगुण कौरविकैर्दयितं हृदिस्थितमिवार्तिमती ।
अवतार्य सा भुविकुमारमथादधबभ्रुवाहन इति प्रथितम् ।।' ४२।३

अत्र कृत्रिमङ्गलमयो हर्षभावस्य विभावो मदुमधुराक्षरगुम्फितयाप्रमिताक्षरया वर्णित: ।

मतिभावे यथा-

'यश एव जन्मफलमात्मवतामिदमेव भूषितव्यमतियत्नभरात् ।
अपि भूषितं गुणगणैरपरैरयशस्विनं न जगदाद्रियते ।।' ८६।५ ।

अत्र मतिभावव्यञ्जकं वाक्यं सुकुमारमधुराक्षरमयं प्रमिताक्षरया निबद्धम् रुचिरमेव ।

(२२) तोटकम्

----------

'इह तोटकमम्बुधिसैः प्रथितम्' ४८।३।वृ०र० इति लक्षणानुसारं तोटकच्छन्दसि लघुवर्णानां संख्या नितरामधिका, किन्तु प्रतिलघुद्वयानन्तरं च गुरोरुपलब्ध्यास्य हास्यादिवर्णनेष्वानुकूल्यम् , किन्तु ओजोव्यञ्जकवर्णमयरचनया ओजस्विवर्णनेष्वपि प्रयोक्तुं शक्यमिदम् । अत एव युद्धवर्णने ओजस्विवर्णमय्यारचनया सह प्रयुक्तमपीदं दृश्यते चम्पूभारते ।

यथा-

'द्विरदं द्विरदस्तुरगं तुरगो रथिकं रथिकं पदगं पदगः ।
इतरेतरमित्थ रणं विदधे दिवि नारदविस्मयनाकतरम् ।। ११०।२

(२३) वंशस्थम्

----------

'जतौ तु वंशस्थमुदीरितं जरौ' (वृ०र० ४६।३) इति लक्षणानुसारं वंशस्थे छन्दसि गुरुवर्णानां संख्या अधिका, येन ओजस्विवर्णनेषु अस्याऽऽनुकूल्यम्, अधिकाधिकौजोव्यञ्जकवर्णविन्यासावसरदायित्वात् । किन्तु मृदुमधुरवर्णैः शृङ्गारवात्सल्यादिष्वपीदं प्रयोक्तुं शक्यम् । अत एव दृश्यते रघुवंशस्य तृतीयसर्गे शृङ्गारवात्सल्यवीरादिषु यथायुक्तवर्णैर्गुम्फितं साफल्येन प्रयुक्तं वंशस्थम् । अतः क्षेमेन्द्रेण 'सुवृत्ततिलके' षाड्गुण्यप्रगुणानीतिर्वंशस्थेन विराजते' (१८।३) इति--किरातार्जुनीयप्रथमसर्गं दृष्ट्वोदाहृतायदुक्तम्, तदपर्याप्तम् । चम्पूभारतेवीरवर्णने यथा-

'उपेत्य तां पाण्डुरुदारविक्रमः प्रजामनः पल्लवमन्त्रशासनात् ।
यशः प्रकाशैर्यमुनासखी सखैर्निनायलोकं निजनामवाच्यताम् ।। १२।१

अत्र वीररसाश्रयस्य पाण्डोर्वर्णने ओजोव्यञ्जकवर्णैर्विरच्यप्रयुक्तं वंशस्थम्।

वात्सल्ये यथा-

'अहं किमम्बा किमभीष्टतापदे तवेति माधुरितातपृच्छया ।
प्रलोभतुल्यं प्रवदन्तमर्भकं मुदा हसञ्ज्रिप्रतिमूर्भिपुण्यभाक् ।।' ३४।१
अत्र वात्सल्ये मदुमधुरादारमयं वंशस्थं प्रायुज्यत ।

मुनिविषयकरतिभावे यथा-

'यथा यथा सेवनयत्नजन्मना निदाघतोयेन निषिक्तमर्मकम् ।
तथातथावर्धततापसान्तिके महाविकासामभ्रमक्तिवल्लरी ।।' ३६।१
अत्रापि रतिभावानुकूला वंशस्थस्यमदुमधुरवर्णमय्येव रचना ।

(२४) दोधकम्

----------

'दोधकवृत्तमिदं भभभागौ' ।। ३३।३।वृ०र० इति लक्षणानुसारं दोधकवृत्ते लघूनां संख्या किंचिदधिका, किन्तु छन्दस आरम्भो गुरुवर्णेन भवति, अतो प्रारम्भ एव उद्भटस्वरवृद्ध्या ओजोव्यञ्जकवर्णानां निवेशस्य च आधिक्येन कर्तुं शक्यतया इदमोजस्विवर्णनानामधिकमनुकूलम् । पद्यमेकं चम्पूभारते खाण्डवदाहे वह्निवर्धनवर्णनपरं प्राप्यते ओजस्विन्यां रचनायाम् ,यथा-

'शोणरुक्चशिखयाऽतिमहत्या बाणपुरावृत्विवासनयेव ।
चण्डरोऽस्य वनस्य समन्तात् कुण्डलनां कलयन् ववृधेऽग्निः ।।' ११४।३।

(२५) उपजातिः

------------

'स्यादिन्द्रवज्रा यदि तौ जगौ गः' वृ०र० २८।३
''उपेन्द्रवज्रा जतजास्ततो गौ' (वृ०र० २९।३)
'अनन्तरोदीरितलक्ष्मभाजौ पादौयदीयामुपजातयस्ताः' वृ०र० ३०।३।

इति लक्षणानुसारमिन्द्रवज्रायाम् उपेन्द्रवज्रायाम् तदुभयलक्षणलक्षितचरणघटितायामुपजात्यां वा लघुवर्णापेक्षया गुरुवर्णानां संख्या नितरामधिका । येन छन्दसामेतेषामोजोव्यञ्जकवर्णविन्यासस्य प्राचुर्येणावसरदायित्वात् वीरायौजस्विवर्णनेष्वस्या अधिकमानुकूल्यम् । किन्तु सुकुमारमधुराक्षरैः सुकुमारमधुररसादिष्वप्येतानि प्रयोक्तुं शक्यानि अतएव वीरशृंगारवात्सल्यादिषु इतरमहाकवीनां

काव्यान्तरेष्विव अनन्तभट्टस्यापि चम्पूभारते प्राप्यन्त उपजातयः । तत्र-
वीरे यथा-

"चित्रं चरित्रं जगतीतलेऽस्य नश्लाघयामास नरेषु को वा ।
स यत्स्वयं पाण्डुरपिस्वकेन गुणेनरक्तानकरोत् समस्तान् ।। १३।१।

अत्र पाण्डोः प्रजाप्रशासनोत्साह ओजोव्यञ्जकवर्णैरुपजात्यानिबद्धः ।

"अन्तर्भवत्कृष्णमृगाजिनाङ्कैः सुनिर्मलैः पाण्डोर्दानकीर्तेः ।
खण्डैरमुष्येन्दुरकारि धात्रा मृषायमब्धेरजनीति वार्ता ।।" १४।१।।

अत्र पाण्डोर्दानवीरत्वमोजस्विवर्णैरुपजात्यां गुम्फितः ।

"जग्राहनिग्राहपरः परश्रियान्करैः कराग्रेण करेणुचङ्क्रमः ।
कुन्ती शकुन्तीशरथोयथा समां समुद्रकाञ्चीं च समग्रकन्याम् ।।" १५।१

अत्र परिग्रह- वसुधावशीकरण-राजकन्योद्वहनैः पाण्डोः कोऽप्युत्कर्षप्रकर्ष ओजोव्यञ्जकवर्णरचितयोपजात्या प्रकटीकृतः ।

शृङ्गारे यथा-

"चाटुप्रयोगे चतुरः स पाण्डुः प्रसूनतल्पे प्रविवेशितायाः ।
दामं बिभेद स्मरराजधानीदामं कराम्भोजदलेन तस्याः ।।" ७३।१

अत्र माद्र्यालम्बनकपाण्डुगत-रत्यनुभाववर्णने समुचितवर्णघटितोपजाति दीप्यतेतराम् ।

आवेगे यथा -

"शापं च मृत्युप्रदमग्रजातेस्तापं च पत्युः स्मरजं निरीक्ष्य ।
दूरेतरस्मिन् सुतेऽपि देव्या दोलायमानं हृदयं तदासीत् ।।" ७२।१

अत्र माद्रीगत आवेगभावानुभावो हृदयास्थैर्यं रुचिरवर्णरचितयोपजात्या सानुन्यबध्यत ।

वात्सल्ये यथा-

"एकां समां तत्र वसन् कदाचिदेकां समां पार्श्वगतामवेक्ष्य ।
समाधिवृत्त्या सह मौनमुद्रां समापयामास तपोधनेन्द्रः ।।" ४२।१

अत्र दुर्वाससः कुन्त्यनुजिघृक्षायां मौनसमापने रुचिरवर्णरचितोपजाती रा

जतेतराम् ।

यथा वा -

'तपस्विनीनां स्तनपायिनस्ते दाक्षवणात्कीचकदत्तकर्णाः ।
वने दिनान्ते वसुधेन्द्रपुत्रावलेषु निद्रासुखमन्वभूवन् ।।' ५४।१

अत्र पाण्डुराजपुत्रविषयकतपस्विनीगतवात्सल्यस्य वर्णने रम्यवर्णघटितोपजातिः शोभतेतराम् ।

यथा वा -

'पुत्रेषु तेषु क्रमपोषितेषु विलोकयन्त्या विहरत्सु कुन्त्याः ।
आप्याययामासतुरन्तरङ्गं प्राप्याऽपि माद्रीतनयौ ममत्वम् ।।' ६४।१

अत्र कुन्तीगतमाद्रीपुत्रविषयकवात्सल्यस्य वर्णने समुचितवर्णगुम्फितोपजातिः राजतेतराम् ।

मुनिविषयकरतौ यथा-

'ततो नियोगात् समयेषु लब्धुमया महायत्नजुषा महर्षेः ।
आराममल्लीरपहाय तस्य भुवल्लिकेव प्रतिपाल्य तस्थे ।।' ३८।१

'तपस्विनस्तस्यतपः कृशस्य सरूपतामाप्तुमिवाश्रयद्भिः ।
दिने दिने मे दयनीयरूपैरशेषैरतिकार्श्यं मापे ।।' ४०।१

अत्रोभयत्रापि मुनिविषयक कुन्तीगतभक्तिभावविभावरूपतत्सेवनव्यापारवर्णने समुचितवर्णरचितोपजातिः शोभतेतराम् ।

(२६) अनुष्टुप्

----------

अष्टादशमयानुष्टुप्छन्दसो नैकभेदाः, किन्तु महाकविभिस्वीकृतानामनुष्टुप्छन्दोभेदानां-

'पञ्चमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
षष्ठं गुरु विजानीयादेतत्पद्यस्यलक्षणम् ।।' (श्रुतबोधे)

इति सामान्यलक्षणानुसारमेतस्मिन् सर्वेष्वपिपादेषु पञ्चममक्षरं लघु षष्ठं च गुरु तथा द्वितीयचतुर्थपादयोश्च सप्तममक्षरं लघु भवति । शेषवर्णा

नां लघुत्वगुरुत्वयोरनव्यतावर्जं निर्नियमं विनियोगः कर्तुं शक्यः । तदनुसारं पूर्वार्धे उत्तरार्धे वा षोडशवर्णेषु न्यूनतोन्यूना अष्टौ अधिकतश्चास्त्रय्येकादश धि-- कास्त्रयोदशवर्णा अनुष्टुभि गुरवः प्रयुज्यन्ते कविभिः प्रायेण । येन ओजोव्यञ्जक वर्णैरोजस्विपरुषवर्णनेषु माधुर्यव्यञ्जकवर्णैश्च मृदुमधुरेषुवर्णनेषु च यथेष्टं-- प्रयोक्तुं शक्यमिदम् । अत एव देवगुरुगोराजविषयकरतिभावाः, दम्पत्योःपार स्परिकःप्रेमा वीरादयश्चानुष्टुभा साफल्येन वर्णिता रघुवंशे काव्यान्तरेषु च- प्राप्यन्ते । तदाक्षेमेन्द्रस्य सुवृत्ततिलके -

'आरम्भे सर्गबन्धस्य कथाविस्तरसंग्रहे ।
शमोपदेशवृत्तान्ते सन्तः शंसन्त्यनुष्टुभम् ।।' १६।३।

इति यदुक्तम्, तदैकदेशिकम् । चम्पूभारतेऽपि कविना परुषौजस्वि- षु मृदुमधुरेषु च वर्णनेषु बहुत्रप्रयुक्तमनुष्टुब्वृत्तम् ।

दैन्ये यथा-

'निकृन्यन्ते पितृभिस्तप्तैर्निरपत्यघनः पुमान् ।
अध्वनीनैरतिश्रान्तैरवकेशीव पादपः ।। ३५।१'

'कदापि तातशब्दस्य कल्पभूमिरुहामिव ।
नार्थीभवितुमर्हामि नरवाहन सन्निभः ।।' ३६।१

' अत्र सन्तत्यभावतप्तस्य पाण्डोर्दैन्यवर्णनेऽनुष्टुभःप्रयोगः ।

वात्सल्ये यथा-

'निशाचरैः समं बाल्ये नियोद्धुमिव कौतुकी ।
उत्तानशयनेमुष्टिमुदग्रां मारुतिर्दधौ ।। ५६।१।

अत्र शिशोर्भीमसेनस्य शैशवलीलावर्णनेऽनुष्टुप् प्रायुज्यत ।

शृङ्गारे यथा-

'परिहृत्य तनुस्त्रिवे बाणं कामोमुमोचयत् ।
अन्तरेवाऽतिरक्तोऽभूदव्रणास्तद्बहिर्नृपः ।। ७०।१

अत्र पाण्डोरनुरक्तिरनुष्टुभावर्णिता ।

क्रोधे यथा -

'क्रोधा प्रवहन्तीनां पवनात्मज एव स: ।
कौरवक्रोधसिन्धूनां क्रमात्संगममूरभूत् ।। ८४।१ ।'

' अत्र भीमसेनविषयक कौरवगतक्रोध: स्थायीभावोऽनुष्टुभाप्रोक्त: ।

वीरे यथा-

'कुमारास्तूर्णमारुह्य कुम्भयोनेरनुग्रहात् ।
कौटिकोदण्डसारस्य गुणिनस्तेगुणा इव ।।' ८।२।

अत्र राजपुत्राणां धनुर्विद्यानिष्णातत्वेन प्रभावशालित्वमनुष्टुभोक्तम्।

रतिभावे यथा-

'यथाऽऽतिथ्य विधौ प्रीत: स पुरस्कुरुतेस्म तान् ।
तथाऽध्वगमने तेऽपि तं प्रश्रय वशंवदा: ।। ६६।३ ।

अत्र धौम्यमुने: पाण्डवविषयकरतिभाव: पाण्डवानां च धौम्यमुनिविषयकरतिभावोऽनुष्टुभा वर्णित: ।

शृंगारे यथा-

'रुधिरं पातु कामेन तेन वो हन्तु मीरिता ।
अधरं पातुकामाहमस्मि ते रूप संपदा ।।' २६।२।

अत्र भीमसेन विषयको हिडिम्बागतोऽनुरागोऽनुष्टुभादर्शित: ।

वीरे यथा -

तस्मिन् रक्षासि नेदिष्ठे तादृशापरुषाक्षरे ।
अपमृत्युरिवोदस्थादनिलस्याऽऽत्मसंभव: ।। ३३।२ ।।

अत्र भीमगतो हिडिम्बवधोद्योगोऽनुष्टुभाऽवर्ण्यत ।

हर्षे यथा-

'अनयोरथदम्पत्योरधुहेतो: शुन: पदे ।
आनन्दस्यातिरेकोऽभूदादेश इव तत्क्षणात् ।। ४६। २

अत्र विप्रदम्पत्यो: पृथाश्वासनेन जातो हर्षोऽनुष्टुभाऽदर्शयत ।

वीरे यथा-

'सोमकेष्वपसर्पत्सु सूर्यसूनो: शितै: शरै: ।

कूजयामास कोदण्डं कुलिशायुधनन्दनः ।।' ११३।२

अत्रार्जुनस्य युद्धोद्योगोऽनुष्टुभाऽवर्ण्यते ।

यथा वा -

' विजयात्परमेतेषामृजवोऽप्यतिभीषणाः ।

सद्योगुणाः समुन्मेषुखनेमुस्तु धन्विनाम् ।। ११४।२

अत्र विजयप्राप्त्या पार्थानां प्रभावोत्कर्षोऽनुष्टुभा वर्णितः। एवं प्रायेणासर्वविधेष्वपि मृदुमधुरेषु परुषौजस्विषु च वर्णनेषु यथायुक्तवर्णघटनया सहाऽनुष्टुप्छन्दसःप्रयोगः सफलतया कृतोऽस्ति कविना चम्पूभारतेऽपि ।

(२७) आर्या

---------

' यस्याः प्रथमे पादे द्वादश मात्रास्तथातृतीयेऽपि ।

अष्टादशद्वितीये चतुर्थके पञ्चदश साऽऽर्या ।।' (श्रु०बो०)

' लक्ष्यैतत्सप्तगणागोपेता भवति नेहविषमेजः ।

~~[illegible]~~

षष्ठोऽयं न लघूवा प्रथमेऽर्धे नियतमार्यायाः ।। १।२

षष्ठे द्वितीयलात्परकेन्लेमुखलाच्चसमयति पदनियमः ।

चरमेऽर्धे पञ्चमके तस्मादिह भवति षष्ठो लः ।।' २।२वृ०र०

इति लक्षणानुसारमार्यायां षष्ठो गणः(चतुर्मात्रासमूहः) जगणरूपश्चतुर्लघुरूपो वा भवति, अन्यत्राऽश्वव्यतावर्जं लघवो गुरवो वा वर्णा आर्याच्छन्दसि निवेशयितुं शक्या यथेष्टम् । येनौजो व्यञ्जकानां माधुर्यव्यञ्जकानां वा वर्णानांनिवेशोऽस्मिन् सुकरः , किन्तु छन्दसोऽस्या गीत्यात्मकत्वात् मृदुमधुरेष्वेव वर्णनेषु प्रयोगोऽस्य विधीयते कविभिः । अत एव चम्पूभारतेऽपि आर्याबद्धमधुरं पद्यमेकं - प्राप्यते , यथा-

' धौम्यस्य सुधामधुरिमधौरेयीभिः स्वयंवरकथाभिः ।

द्रुपदपुरसरणिरेषां छिन्नाप्यासन् पदानीव ।।' ६७।२।

अत्र धौम्यमुनिना सह पार्थानां सानन्दयात्रा मधुराक्षरघटितयैवाऽऽर्यया वर्णिता ।

(२८) गीति:

---------

"आर्या प्रथमदलोक्तं यदि कथमपि लक्षणं भवेदुभयो: ।
दलयो: कृतयतिशोभां तां गीतिं गीतवान् भुजङ्गेश: ।।" ८।२।वृ०र०

इति लक्षणानुसारं गीतिच्छन्दस्यपि षष्ठगणं चतुर्लघुरूपं जगणात्मकं वा विधाय शेषा वर्णा: ओजोव्यञ्जका माधुर्यव्यञ्जका वा परुषा मधुरा वा लघवो गुरवश्च वर्णा विनिवेशयितुं शक्या:, तथापि गीतिच्छन्दसो स्वनामानुसारं गीतात्मकत्वात् मृदुमधुरैष्वेव वर्णेषु क्रियते प्रयोग: प्राचुर्येण कविभि:। अत एव चम्पूभारतेऽपि गीतिच्छन्दो बद्धे पद्ये प्राप्यते मधुरयैव गिरा, यथा विषादे-

"गन्धर्वाणां पत्युर्गर्वजुष: सौरसैन्धवे तस्मिन् ।
पाथसि भङ्गः शिशिरो रोधसि भङ्गस्तु तापहेतुरभूत् ।।" ६३।२।

अत्र गन्धर्वराजस्य पराजयहेतुकविषादवर्णने मृदुमधुरवर्णग्रथितैव गीति:-प्रायुज्यत ।

पराजये यथा-

"नभसि कृते शरकूटेनपपाताशुगविनुन्नमम्बुमुचाम् ।
तस्मिन् खाण्डववह्नौ तक्षकपत्न्या: कबन्धमेव परम् ।। १२५।३।

अत्र खाण्डवस्य तक्षकरक्षणाय इन्द्रप्रेरितघनघोरतरधाराधरधाराऽम्बुरमुक्तजलौघस्य कणोऽपि शरकूटपिहितखाण्डवाग्नौ नापतत्, अपितु तक्षकपत्न्याश्छिन्नशिरस्कं कलेवरमेवाऽपतत् , येन इन्द्रयत्नस्य वैफल्यं प्रकटीभवति, तद्वर्णने मृदुमधुरप्रायवर्णघटितागीति: सम्यगेव प्रायुज्यत ।

पर्यालोचनेनैतेन चम्पूभारतीयपद्येषु प्रयुक्तानां छन्दसां रसभावादिवर्णनानुगुण्यमेवाऽस्ति, प्रश्नोऽन इति स्फुटीभवतीत्यलं विस्तरेण ।

## (२) भारतचम्पूकाव्ये क्वचित् त्रुटय:

श्रीमतोऽनन्तभट्टस्य भारतचम्पूकाव्यस्य कृतायां समीक्षायां क्वचित् त्रुटयोऽपि प्रतीतिपथमवतरन्ति । 'गच्छत: स्खलनं क्वापि भवत्यनवधानत:' इत्याभाणकानुसारं यदि क्वचित् कस्यचिदनवधानं भवति, तर्हि तत्र तस्यस्खलनमपि संभवत्येव। एवं महाविदुष:प्रतिभातिशतशालिनश्च श्रीमतोऽनन्तभट्टस्याऽपि यदि क्वचित् त्रुटि:प्राप्येत्,तर्हितत्र तस्याऽशक्तेर्व्युत्पत्तिपरिपाकनैयून्यस्य वाऽकथमपि कारणता मन्तुं न शक्यते। तत्र तत्कारणता तदनवधानस्यैव भवितुं शक्नोति । प्राप्यमाणत्रुटिस्थले यदि सोऽपि मनागवधानमदास्यत्, तर्हि त्रुटे: संभावना खपुष्पयितैवाऽभविष्यत् । किन्तु अनवधानं मानवस्य साधारणो धर्म: । तेन यदि कदाचित् कोऽपि वंञ्चितो भवति,तर्हि तत्र दैवमेव कारणं मन्तव्यम्।

अपरं च अनन्तभट्टस्य यादृशी भाषायां प्रवाह: छन्द:सु चाधिकार: यादृशी च विषयाणां सूक्ष्मतया मार्मिकतया च वर्णने प्रौढि:,यादृशी च नवनवानां कल्पनानां सर्जने प्रगल्भता भारतचम्पूकाव्यस्यानुशीलनेऽनुभवगोचरताभायान्ति , तदनुसारमनन्तभट्ट आशुकविरासीदिति मन्महे। आशुकवयश्च काव्यरचनायां ससंरम्भं प्रवृत्ता द्रुतद्रुतं लिखन्त:पठन्तश्च स्थितां त्रुटिं क्वचिन्नाप्यवदधति। एकदा च या त्रुटि: क्वचित् स्थित्वा चमत्कारिकाव्यसाज्जाता, सा नाऽवधानदानं विना पुन: प्रकटी भवति । अवधानदानम् चाऽऽशुकवीनां स्वभाव विपरीतमेव।अत: एकदा या त्रुटि:काव्येस्थितिं लभते,सा सार्वदिकत्वायैवस्थिता भवति। एवमनन्तभट्टोऽपि संरम्भेण वेगेन च काव्यनिर्माणे प्रवृत्तो यदि स्थितां त्रुटिं क्वचिन्निभालयितुं नाशक्नोत् , तर्हि तत् स्वाभाविकमेवाऽभवत् । अस्तु। उपस्थाप्यन्ते काश्चित् त्रुटयो भारतचम्पूकाव्ये प्राप्यमाणा अधस्तात्।यथा-

(१) धृतराष्ट्रस्य पाण्डुकुमार पोषण वर्णने कविर्लिखति, यत् -

'मत्वा तत्तत्प्रत्यहं यमदिष्टं यावत्स्वेषा मात्मजानां शतेऽपि ।

पाण्डो:पुत्रेष्वम्बिका सूनुरेतेष्वेकैकस्मिन् प्रेमतावद् बबन्ध ।।' १।८२

अत्र प्रथमचरणे वर्णा: संयुक्तपरूषात्वाधिक्येन धृतराष्ट्रगत पाण्डुकुमारविषयकवात्सल्यस्य प्रतिकूला एव,तदनुसारं यदि- तेभ्यो नित्यं वाञ्छितार्थान्

- वितीर्य इति, ' नित्यं तेषां वाञ्छितार्थान् वितन्वन् ' इति वा किमपि परिवर्तनं व्यधास्यत, तर्हि निराकृतोभविष्यदेव प्रतिकूलवर्णत्वदोषः।

(२)

पाण्डवानां द्रुपदपुरदर्शनवर्णनं लिखति कविः, यत्-

' भूदेवेष्वतिनिभिदेषु मध्यमाख्यां

पञ्चानामपि युगपद् पृथासुतानाम् ।

पुस्फोर द्रुपदपुरं पुरः प्रदेशे

वक्त्राब्जे सपदि दक्षिणं च ।।२। ६८

अत्राऽपि मनोनुकूल रुचिरमधुरवस्तुवर्णने माधुर्यव्यञ्जकानामेव वर्णानां प्रयोगो युक्तः। उत्तरार्धसंयुक्तोपध्मानीयपरुषवर्णानां विन्यास स्तस्य प्रतिकूल एव यदि-

' अस्फोरीद् द्रुपदपुरं पुरोविभागे

वामान्यन्नयनमरं तथाननाब्जे ।'

एवं व्यधास्यतकिंचित्परिवर्तनम्, तर्हि परुषवर्णानां न्यूनत्वं भूत्वा प्रत्युतानुसारं माधुर्यमाधिक्येन प्राकाशयिष्यदेव, अभविष्यदेव च दूरीभूतः प्रतिकूलवर्णत्वदोषो ऽत्राऽपि ।

(३)

दुर्योधनस्य द्रौपदी स्वयंवरप्राप्तिवर्णनं लिख्यते, यत्-

' बिभ्राणो मणिदीप्रकुण्डलमरं ~~कर्ण~~ कर्णत्रयं पार्श्वयो

र्गे चाऽति मनोज्ञरूपपरिलिखेष्वङ्गेषु दुर्योधनः ।

सेनादुन्दुभिनादतुन्दिलनगा स्वस्यानुबिम्बायिते-

रायोदद् सनवाधिकैः परिवृतप्रान्तो नवत्याऽनुजैः ।।२।७२

अत्र अनुजैरिति पदे ' नवाधिकैः नवत्या ' इति विभिन्नवचनकसंख्यावाचकविशेषणयोः पृथगन्वयेन संख्यारूपगुणस्य सकृदन्वयाभावादसंष्कुलत्वापत्तिः। एकस्यैव वस्तुनः पुनः पुनरुपस्थित्या चर्वितचर्वणेनैव वैरस्यापातो भवत्येव। परस्परविरुद्धयो धर्मयोरपि कस्मिंश्चिद् वस्तुनि यदि व्यवधानेनाऽन्वयो भवति, तदा तत्रापि वैरस्यापातो भवति, यथा-

' दन्तावलोऽयं लाङ्गूलेनकृशः, दन्तयुगलेन धवलः, उदरेण स्थूलः, शरीरेण च

श्याम:' इत्येवं चेत् पठ्यते, तर्हि परस्परविरुद्धयोर्धर्मयोर्व्यवधानेन धर्मिण्यन्वयात् तिष्ठत्येवाऽसंष्ठुलत्वम् । यदि च परस्परविरुद्धयोरपिधर्मयोर्धर्मिणि अ-व्यवधानेन सहैवान्वयो विधीयते, तर्हि तत्र दीप्यते संष्ठुलत्वम्, यथात्र 'यदि दन्तावलोऽयं देहेन श्याम:, दन्तयुगलेन च धवल:, उदरेण स्थूलो लाङ्गूलेन च कृश:' इति पठ्यते, तर्हि भातितरां सौष्ठवम् । एवं विरुद्धयोरपि धर्मयोर्धर्मिणि व्यवधानेन अन्वये जाते लुप्यते सौष्ठवम्, तर्हि एकस्यैव धर्मस्य धर्मिणि खण्डशो व्यवधानेन च भवेदन्वय:, तर्हि तत्र सौष्ठवस्य कथा दूरापास्तैव । अत: संख्यारूपधर्मस्य खण्डशो व्यवधानेन च धर्मिणि कृतोऽन्वयोऽप्यसंष्ठुलत्वापादक एव ।

अपरं च - पद्येऽस्मिन् कथितं नवाधिकत्वं कुत्र विवक्ष्यते ? यत्र तस्य न्यूनत्वं भवेत्, तत्रैव तस्य पूरणाय प्राधिक्यमापाद्येत । अत्र चानुजेषु न नवत्वस्य न्यूनत्वम्, तेषां नवनवतिसंख्यायां तत्रोपस्थितत्वात् । अत्र तु तेषां पार्थक्येनान्विता यां नवति संख्यायामेव नवसंख्याया न्यूनत्वम्, अनुजानां नवनवति संख्याया:- प्रत्यभिज्ञायितत्वात् । यदि नवतिसंख्यायामेव अनुजेषु पार्थक्येनाऽन्वयं लभमानाया नैयून्यम्, तर्हि तस्यामेव विशेषणविधया नवसंख्याया वर्धनेन नैयून्यमपाकरणीयम् । एवं यदि नवसंख्याया विशेषणविधया नवत्या इति पदेनैवाऽन्वयो युक्त:, तर्हि नवत्या-पदवत् नवाधिकैरितिपदस्य पुंलिङ्ग बहुवचनान्तत्वं निरस्य स्त्रीलिङ्गैकवचनान्तत्वमापादनीयम् । तथा च -

'आसीदन्नवयुक्तया परिवृतप्रान्तो नवत्याऽनुजै: ।'

एतादृश: पाठ: स्वीकार्यो भवेत्, तथा कृते नवसंख्याया नवत्यां नवनवत्याश्च सकृदेवाऽनुजेष्वन्वय संभवात् भवेदपवन्यतसम्बन्धत्वदोषापाकरणद्वारा उक्तासंष्ठुलत्वस्य निरसनम् ।

(४)

अर्जुनस्य उलूपी संगम वर्णने उच्यते यथा-

'नालीकात् कुवलयसंक्रमे स्खलित्वा
　मग्नाध: पयसि रमैव तत्र काचित् ।
तं दृष्ट्वा भुजगसुता मिथो रिरंसु: +
　संतुष्टा हृदयमिवाऽऽनयत्स्वगेहम् ।।'

अत्र द्वितीयचरणे उपध्मानीयः चतुर्थचरणे च तकार सकार संयोगी ऽ नितरां परुषौ रतिभावानुकूलमाधुर्याननुगुणाः । तत्परिवर्तनाय यदि " मकनाघोऽम्बुनिकमलैव " इति द्वितीयचरणे " नयन्निकेतम् " इति च चतुर्थचरणे पठ्येत , तर्हि निर्बाधास्यान्माधुर्याभिव्यक्तिः । दूरीभवेच्च प्रतिकूलवर्णत्वदोषः ।

(५)

पा० ञ्चराजकुमारिकया चित्राङ्गदया सह उद्यानभूमौ विहरतोऽर्जुनस्य वर्णनम्, यथा-

एलालवङ्गतरु पिप्पलिकापटीर-
ताम्बूलिकाक्रमुकदम्पति भावरम्याम् ।
उद्यानभूमिमधिगम्य तया स पार्थः
शुल्यन् पितुः पदममन्यत बल्वजेभ्यः ।। ३।४१।

अत्र " पार्थः पितुरिन्द्रस्य पदं स्वर्गं बल्वजेभ्यः अमन्यत " इति कथनेन स्वर्गस्य बल्वजरूपतृणविशेषतुल्यता प्रकटीकृताऽपि तस्य तुच्छतृणसामान्यतुल्यता न प्रकटी भवति । तेन स्वर्गो बल्वजवत् मतोऽपि तृणान्तरवत् तुच्छोनास्तीति विरुद्धा प्रतीतिरापतति । तृणसामान्यवदतितुच्छता च स्वर्गस्य प्रतिपिपादयिषिता । अतस्तत्प्रकाशनाय " शुल्यन् पितुः पदममन्यत तत् तृणेभ्यः " एवं पठ्यते, तर्हि स्वर्गस्य तृणसामान्यतुच्छता प्रचिकटयिषिता प्रकटी भवेत्, दूरी भवेच्च सामान्यपरिवृत्तित्वदोषः ।

(६)

अर्जुनस्य सुभद्राहरणे युद्धोद्यतानां यदूनां भगवत्कृतनिवारणे वर्णनं उच्यते , यथा-

" आकर्ण्येदं जृम्भितानां यदूनां
पार्थोद्देशात् क्रोधनत्वस्य जाते ।
म्लानिं दातुं माधवो माधवोऽभूत्
यत्राऽऽयत्ता कौरवी सा समृद्धिः ।। " ७७।३

अत्र पार्थविषयकभगवन्निष्ठवात्सल्यस्य विपरीता चतुर्थचरणस्था वर्ण

परिपाटी । तत्र यदि ' यस्याधीनं कौरवं वैभवं तद्' इति क्रियेत पाठ: , तर्हि तत्र वात्सल्यानुगुणमाधुर्यानुसारिणी स्याद् वर्णपरम्परा । दूरी भवेच्चदोष: प्रतिकूलवर्णत्वम् ।

(७)

गन्धर्वैर्बद्ध्वानीयमानस्य दुर्योधनस्यान्त: पुरपुरन्ध्रयो युधिष्ठिरसमीपमागत्य तं प्रार्थयन्ति , यथा-

सं द्रष्टुं तव पादमूलमधुना सर्वै: समं बन्धुभि-
 र्देव ! भ्रातरमागतं वनतले लेशेन हेतोर्विना ।
पाप:कश्चन गायको दिविषदां हा हन्त बद्ध्वा दृढं
 नि:शङ्कं रुपवीणितो निजभटैरग्रं नयत्यम्बके: ।। ५।५७ '

अत्र ' लेशेन हेतो विना' इत्युक्ते ' हेतुलेशो नास्ति,किन्तु हेतुर्विपुल:- कदाचित् स्यात्' इति प्रतीयते, अतस्तादृश प्रतीतिनिरोधाय तत्र अप्यर्थोऽवश्यं-वाच्य:, येन तत्प्रतीति-निरोध: स्यात् । यदि ' वनतलेऽप्यंशेन हेतोर्विना' इति पाठ: क्रियते, तर्हि ' हेतोरंशोऽपि यदि नास्ति , तर्हि विपुलो हेतुस्तु कथमिव स्यात्' इत्यर्थस्य पर्यवसितत्वात् अविवक्षितार्थप्रतीतिनिरोध:स्यादेव । अनुक्त-वाच्यत्वदोषश्च दूरीभवेदेव ।

(८)

गन्धर्वाणां पाण्डवानां च मार्गण प्रचारण शक्त्या इयत्ता वर्णनं य था-

' एतावतीति युधिमार्गणचारशक्ति:
 स्पष्टीबभूव सुरगायकपाण्डवानाम् ।
तेषां ययु: शरकुलानि हि लक्ष्यमात्रं
 लक्ष्यं बिभिद्य पुनरायमुरन्तमेषाम् ।।' ५।६४

अत्र ' इति' पदस्य त्रिदशगायकपाण्डवानां युधिमार्गणचारशक्ति: एतावती' इयतोऽर्थस्य ' इति' पदेन परामृश्यमानत्वात् तदनन्तरमेव तस्य प्रयोगो-युक्त:, न तु तन्मध्य एव , अतो यदि ' एतावती त्रिदशगायकपाण्डवानां बाण-

प्रचारपटुतेत्यवगम्यते स्म' इति पाठः क्रियेत, तर्हि निष्प्रत्यूहा स्यादमन्थरा प्रतीतिः, दूरीभवेच्च अस्थानस्थपदत्वदोषः । यथा स्थिते पाठे तु प्रतीतौ मनाङ्मान्थर्यमेव । न चैवं पाठपरिवर्तने कृते 'युधि' इति पदस्याप्यपेक्षितस्य हानिर्भवेदितिवक्तव्यम्, यतो हि एकवारं द्वित्रवारान् वा मार्गणचारणं तु क्रीडायां परीक्षायां वाऽपि भवितुं शक्नोति, अतस्तत्प्रसक्तिवारणाय यथा स्थितपाठे 'युधि' इति पदस्यावश्यकता, किन्तु नवीनकल्पितपाठे तु 'बाणप्रचारपटुता' इत्युयस्ति, यत्र न 'मार्गणचार' शब्दः, अपितु तत्स्थाने 'बाणप्रचार' शब्दः-प्रयुक्तोऽस्ति, बाणानां प्रकर्षेण चारणं क्रीडायां परीक्षायां वा न कदाचिदपि कर्तुं शक्यते केनापि, तथा तु युद्ध एव शक्यते कर्तुम्, इति हेतोर्नवकल्पितपाठे यदि 'युधि' पदं न प्रयुज्यते, न तर्हि तस्याऽऽवश्यकताऽपि नास्ति।

(६)

सूर्यस्य कर्णं प्रति वचनं यथा-

'वीक्ष्य वन्ध्यवचनोऽपि गुणज्ञो
  विस्मयाऽम्बुनिधिवीचिषु मग्नः ।
पद्मबन्धुरितिवादिनमेनं
  पाटलस्मितरुचिर्गिरमूचे ।। ५।६४।'

अत्र 'इति' पदस्य एतत्पद्य-पूर्वोक्त-पद्यगतवस्तुपरामर्शकत्वात् एतत्पद्य-प्रथमपादादावेव तत्प्रयोगो युक्तः, तत्र तत्स्थित्यभावे तत्परामृश्यमानप्रतीतिमान्थर्यस्यानिवार्यत्वात् । अतो पद्यमेतन्निम्नलेखानुसारं किंचित् परिवर्त्य-

'एवमात्मनतवादिनमेनं
  विस्मयाम्बुनिधि-वीचिषु मग्नः ।
वीक्ष्यवन्ध्यवचनोऽपि गुणज्ञो
  ऽहर्पतिः स्मितकषितां गिरमूचे ।।'

एवं यदि क्रियेत पाठः तर्हि निरन्तरराया स्यादमन्थराप्रतीतिः दूरीभवेच्च अस्थानस्थपदत्वदोषः । पाटलस्मितरुचि' रिति पाठे अधरारुणिमसंक्रमेण स्वतः श्वेतायाः स्मितरुचेः पाटलत्वोक्त्या तद्गुणालंकारः 'स्मित

सितां गिरम्' इति पाठे तु स्मितसितत्व संक्रमेण गिरोऽपि सितत्वात् तद्गुणस्तु अस्त्येव, सहैव गिरि अमूर्तत्वात् तस्यां सितत्वस्याऽसम्बन्धेऽपि तत्सम्बन्धप्रकाशनात् असम्बन्धातिशयोक्तिरपि चमत्करोतितराम् ।

(१८)

कीचकपराभूतायाः सैरन्ध्रीरूपद्रौपद्याः पराभूतिवृत्तं श्रुतवतो भीमस्य कोपोदयो वर्ण्यते कविना यथा-

'श्रुत्वा वधूगिरमिति स्वपनापनीतं
शोणत्वमक्षिणि पुनरुक्तयतो रुषाऽपि ।
तस्याऽधरोष्ठमुदवेपत निर्गमिष्य-
त्क्रूराक्षरावलिविमर्दनशङ्कयेव ।।' ६।५१

अत्र 'इति' पदस्य एतत्पद्यपूर्वोक्तपद्यगतवस्तु-परामर्शकत्वात् एतत्पद्यप्रथमपादादावेव तत्प्रयोगो युक्तः, तत्र तत्स्थित्यभावे तु तत्परामृश्यमान प्रतीतिमान्थर्यस्याऽनिवार्यत्वात् । अतो यदि पद्यमेतत् निम्नानुसारं किंचित्परिवर्त्य, 'एवं श्रुतप्रियतमावचनः सनिद्राशोणत्वमक्षिणि' इत्यादि कृत्वा यदि पठ्येत, तर्हि निरन्तरास्वादमन्थरा परामृश्यमान प्रतीतिः, दूरी भवेच्च अस्थानस्थपदत्व-दोषः ।

(११)

भीमसेनकीचकयोर्बाहुयुद्धं वर्ण्यते, यथा-

'जवं भजन्तौ अमतर्षयन्तौ रुषं वहन्तौ रुधिरं किरन्तौ ।
परस्परं तौ पटुशब्दवन्तौ नियुद्धवन्तौ नितरामतान्तौ ।।' ६।७०

अत्र बाहुयुद्धनिरतयोः क्रुद्धयोर्भीमसेनकीचकयोर्वर्णनेऽनुप्रासलोभिनाऽष्टकृत्वो नकार-तकारयोः संयुक्तयोरोजोगुणप्रतिकूलयोरुपादानमनुचितम्, नियुद्धरत क्रुद्धयोस्तयोर्वर्णने ओजोगुणानुरूपसंयुक्तपरुषवर्णघटितरचनाया एव युक्तत्वात्। अतो यदि -

'समिद्धवेगौ परिवृद्धरोषौ स्वकास्त्रवर्षाजियबद्धतर्षौ ।
परस्परस्य प्रतिरुद्धशौर्यौ नियुद्धमेतौ विकटं व्यधत्ताम् ।।'

इति पाठः क्रियेत, तर्हि प्रकृतरसानुगुण-गुणानुसारिणीस्यादेव रचना, दूरीभवेच्च प्रतिकूलवर्णत्वदोषः ।

(१२)

कीचकाऽवरजानां शोको वर्ण्यते, यथा-

'विलोक्य तं भ्रातरमात्तशोका
मृत्युद्विपस्येव विधानपिण्डम् ।
ज्यायानिवामी विदधुः स्थलीं ~~निजैन ।।' ६।७५~~ तामस्त्रेण गुल्फद्वयसीं निजेन ।।

अत्र गुल्फप्रमाणकत्वं कस्य विवक्षितम् ? न तावत् स्थल्याः तस्या- ६।७५
अतिविस्तीर्णोन्नितत्वेन ज्ञाततद्भिन्न प्रमाणकत्वात् । अस्त्रस्यैव च नवोदितस्य तत्र प्रमाणस्य ज्ञेयत्वेन तत्प्रमाणस्य प्रकाशनीयत्वात् । अतो गुल्फप्रमाणकत्वं प्रकाशनीयत्वेनाऽस्त्रस्यैवात्र विवक्षितम्, अतो 'अस्त्रेणे' ति पदवत् गुल्फद्वयसस्यापि तृतीयैकवचनान्तत्वं युक्तम्, अतो यदि -

'स्थलीं तामस्त्रेण गुल्फद्वयसेन पूर्णाम्' इति पाठः क्रियते, तर्हि भवति-विवक्षित-वचनम्, दूरीभवति चाभवन्मतसम्बन्धत्वदोषः ।

(१३)

कीचके मृते कृष्णां दृष्ट्वा तत्स्मरणं कुर्वत्याः तत्स्वसुः केकयराजपुत्र्याः सुदेष्णायाः शोकवर्णनं कविनोच्यते, यत् -

'तस्मिन् दिने संनिधिमागतासा
कृष्णा दृशं केकयराजपुत्र्याः ।
मषीशलाकार्पणया विनाऽपि
मन्देतरामश्रुकणैरकार्षीत् ।।' ६।८० ।

अत्र दृशोऽश्रुकणैर्मन्देतरत्वमुच्यते, किन्तु मन्देतरा अमन्दा अर्थात् स्वव्यापारसत्वरा तु न भवति दृगश्रुकणैः, अपि तु मन्दैव भवति + तैस्तु । अतो-यदि - 'मन्दाममन्दाश्रुकणैरकार्षीत्' इति क्रियते प्रस्तुतपद्यस्य चतुर्थः पादः,-तर्हि भवत्यसंगतिर्दूरापास्ता, दूरीभवति चात्र विपरीतार्थत्वदोषः ।

(१४)

( १४ )

दुर्योधनसैनिकैः क्रियमाणस्य विराटराजगोहरणस्य वर्णने कविनोच्यते, यत् -

' दण्डाघाते दीयमानेऽपि योधै-
दुर्ग्धं भूयो दोहशेषं वहन्त्यः ।
घोषाद्गावो निःसरन्ति स्म यत्ना-
द्गोम्यो घोषो यत्नलेशं विनेव ।।' ७।३

अत्र ' गोम्यो घोषो यत्नलेशं विना निःसरतिस्म' इति कथनेन ' भूयसियत्ने' इति कदाचिद् गोम्यो घोषो न निःसरेद् इति प्रतीयते , तन्निरोधाय अप्यर्थोऽवश्यं निवेष्टव्यः , अतो यदि ' गोम्यो घोषो यत्नलेशं विनापि' इति पठ्यते पद्यस्य चतुर्थःपादस्तर्हि निरुध्यतेऽवाञ्छिता प्रतीतिः, दूरीभवति चानुक्तवाच्यत्वदोषः ।

(१५)

समरभीतं विराटराजपुत्रमुत्तरमाश्वासयतोऽर्जुनस्य कथनं प्रकाश्यते कविना यथा-

' जरठोजनकोऽपि, मातुलाः शतमप्यन्तमगुस्त्वमेकक: ।
यदि यासि न धैर्य मत्र, ते नवशे राज्यमिदं भविष्यति ।।' ७।३२ ।

अत्र उत्तरं प्रति तज्जनकस्य जरठत्वं प्रदिदर्शयिषितम्, अतो तज्जनकमुद्दिश्य जरठत्वं विधेयतया प्रदर्शयितव्यम्, तदर्थम् ' अनुवाद्यमनुक्त्वैव न विधेयमुदीरयेत्' इत्यभियुक्तोक्त्यनुसारं प्रागुद्देश्यस्य जनकस्यैव वचनं विधेयम्, तत्पश्चाच्च जरठस्य । किन्तु अत्र उद्देश्य विधेययो वैपरीत्येनोपन्यासो जनके जरठत्वस्य विधेयतया प्रदिदर्शयिषितस्य प्रतीति भान्त्यर्थम् विदधाति, अपरं च यथा श्रुतपाठे-जरठस्य उद्देश्यकोटिपतितत्वप्रतीत्या विधेयान्तराकाङ्क्षा तावदुदेति । तन्निवारणाय यदि ' जनको जरठोऽस्ति' इति पठ्यते यथोक्तपाठस्थाने, तर्हि भवेद्विधेयस्य प्रागुपस्थितिः दूरीभवेच्च अविमृष्टविधेयांशत्वदोषः ।

(१६)

विराटराजसूनुर्नो युद्धेऽपहृतेषु चैलेषु नग्ना दुर्योधनादयो ध्वजपटशक

लक्लृप्तकौपीना एव हस्तिनापुरं प्रतिनिवृत्ता इति वर्ण्यते , यथा-

'इति परिभवलक्ष्म्या संभृतां भोगमुद्रां
तनुभिरभिदधानाः स्थास्नुभिर्नग्नभावे ।
ध्वजपटकलाग्रैः क्लृप्तकौपीनकृत्याः
सुबलदुहितृपुत्राः स्वां पुरीप्रत्यगच्छन् ॥' ७।५७

अत्र लक्ष्मीशब्दस्य लोकमातृस्मारकत्वेन तदुपस्थित्या दुर्योधनादितनूनां तदुपभुक्तत्वस्यात्यन्तानुचितस्याऽपि प्रतीत्यापत्तिः, अतो यदि 'परिभवतत्या, परिभवभूत्या, परिभवभक्त्या, परिभवभंग्या' इत्येतादृशेषु कोऽपि पाठः स्वीक्रियते, तर्हि दूरीभवेत्तदनौचित्यम्, अनुचितार्थत्वदोषश्च ।

(१७)

युधिष्ठिरस्य भगवन्तंप्रति कौरवैः सह सन्धिविषये प्रयत्नस्वीकाराय-प्रार्थयमानस्य वचनम् यथा-

'गतिर्नमेऽन्याऽगरुडध्वजत्वया
विनाऽधुनाऽस्या विपदो विधूतये ।
वनाऽनलाऽर्चिर्वलयाऽऽवृतिस्थिते-
र्बलाहकात् किं शरणं मृगीशिशोः ॥' ८।१६

अत्र प्रथमात्रुटिस्तावत् 'मृगीशिशोः' इति पदस्य स्वविशेषणात् 'वनाऽनलाऽर्चिर्वलयाऽऽवृतिस्थिते' रितिपदात्तत्पदान्तरव्यवहितत्वेन स्थितत्वात् 'बलाहका' दितिपदाऽव्यवहितत्वेन स्थितत्वात् तस्मिन्नन्वयभ्रान्तिः, पश्चाच्च तदन्वयाऽसंगत्यवगतौ विलम्बेन 'मृगीशिशो' रितिपदेतस्यान्वयः, तेन प्रतीतिमान्थर्यं स्थितमेव, एवं चात्रास्थानस्थपदत्वदोषः ।

द्वितीयात्रुटिश्च 'बलाहका' दितिपदान्निर्वर्तस्य 'ऋते-बिना-अन्यत्-परम्' इत्यादिष्वन्यतमं किमपि पदमत्राऽपेक्षितम्, अन्यथा 'बलाहकात् किं शरणम्(रक्षणम्) ? न शरणम्' इति विरुद्धप्रतीत्यापत्तिः, अपेक्षितार्थप्रतीतिमान्थर्याऽऽपत्तिश्च । तद्वारणाय यदि 'मृगीशिशोः किं शरणं घनादृते' इति पाठः कल्प्यते, तर्हि दूरीभवेन्नामात्र प्रतीतिमान्थर्यं विरुद्धप्रतीत्यापत्तिः न्यूनपदत्व-

दोषश्च ।

(१८)

पाण्डवानां सन्धिप्रस्तावमस्वीकुर्वाणं दुर्योधनं भर्त्सयतो भगवत उक्ति यथा-

'तवादृशं शृणु महत्त्व वशंकृतं
पूरुर्ददौ नववय: पितुरात्तजीर्णः ।
त्यक्त्वाऽऽश्रमं पितृमुदे तृणवद्द्वितीयं
देवव्रतोऽयमिह तिष्ठति धीरधीर: ।।' ८।४४

अत्र 'पूरुर्नववयो ददौ' इत्यत्र 'कस्मै ददौ ?' इति सम्प्रदानस्याऽऽकाङ्क्षा तावदसमाहितैव तिष्ठति, तन्निवृत्त्यै यदि 'पित्रे वयो निजमदात्पुरुरात्य तस्य' इति अथवा 'पित्रे समर्प्य निजमापवयोऽस्य पूरु:' इति पाठ: क्रियेत, चेत् समाहिता भवेदेवात्र सम्प्रदानपदाऽऽकाङ्क्षा, दूरीभवेच्च न्यूनपदत्वदोष: ।

न च कल्पिते पूरोर्वयसो नवत्वस्य तत्पितुर्वयसश्च जराक्रान्तत्वस्याऽकथनान्न्यूनत्वमिति वाच्यम्, पूरोर्युवकत्वात् तद्वयसो यौवनरूपत्वस्य तत्पितुश्च वृद्धत्वात् तद्वयसो जीर्णत्वस्य च प्रतीतेरर्थवशात् सिद्धे: ।

(१९)

युद्धाय कुरुक्षेत्रे समवेतयो: कौरवपाण्डवसैन्ययोश्चतुरङ्गनिर्देशो यथा-

'अथोभेऽते कुरुवीरणाय स्वनामधेयोपपदप्रसिद्धम् ।
क्षेत्रं व्यगाहन्त निरुद्धपार्श्वा: शताङ्गमातङ्गतुरङ्गयोधै: ।।' ९।१

अत्र चतुर्णां सैन्याङ्गानां निर्देश: 'शताङ्गमातङ्गतुरङ्गयोधै' तिक्रमेण विहितोऽस्ति, किन्तु अग्रेतनग्रन्थे प्राक् तुरङ्गाणां ततो मातङ्गानां ततश्च शताङ्गानां तत्पश्चाच्च योधानां वर्णनं विहितं वर्तते, अतस्तदनुसारं निर्देशोऽपि तेषां 'तुरङ्गमातङ्गशताङ्गयोधै:' इति क्रमेणैव कृतो भवेत्, तर्हि समुचित: स्यात्, दूरीभवेच्चाऽक्रमत्वदोष: ।

(२०)

पाण्डोर्मृगयावर्णने कविनोघते, यत् -

"कुर्वतिति ततः सहैव वासं कुलकूटस्थकृतान्नवाहनेन ।
नवघूतविषाणामण्डलाग्रे महिषौघे निचखान मण्डलाग्रम् ॥"

२३।१

अत्र "इति" पदस्य पूर्वार्धप्रतिपाद्यार्थपरामर्शकत्वात् तदनन्तरमेव तदुपादानमपेक्षितम्, किन्तु न तत्र तस्य प्रयोगः, अपितु तदन्ते एव, तेन तस्य अस्थानस्थतया प्रतिपिपादयिषितार्थप्रतीतौ मान्द्यमेव भवति सहृदयानामपि। अतोयदि पद्ये -

"कृत्वाऽविरतं सहैव वासं कुलकूटस्थकृतान्नवाहनेन ।
इति धूतविषाणामण्डलाग्रे महिषौघे निचखान मण्डलाग्रम् ॥",
एवं किंचित् क्रियते परिवर्तनम्, तर्हि भवति निरस्ता "इति"
पदस्य अस्थानस्थता, अपैति च वाक्यार्थप्रतीतिमन्दता ।

(२१)

अर्जुनस्य भागीरथी प्राप्तिवर्णने कविनोच्यते, यत् "........ तयः प्रसादितस्य भगवतो भवानीवल्लभस्य साक्षात्कृपामिव भगीरथ रथपथानुसारिणीं तरङ्गिणीमुपगम्य ------------।

२१।१

अत्र भवानीवल्लभस्य भवातिरिक्तता प्रतीयते, न च सा कवेः प्रत्याययितुमिष्टा, भवान्या भवातिरिक्तस्य वल्लभत्वाभावात्, भवस्यैवाऽत्र कवेः प्रतिपिपादयिषिताऽवाच । अतो "भगवतो भूतभावनस्य" एवमादि किमपि परिवर्त्य पठ्यते, चेत् अनुप्रासनिर्वाहेऽपि सम्भवेदनुचितार्थत्वदोषस्य निराशोऽपि ।

(२२)

दुर्योधनस्य सेनापतित्वस्वीकाराय भीष्मप्रार्थना, यथा-

"भगवन्! अस्मिन् उपतस्थुषि वीरभुजविनोदकाले त्वं विवाहविमुखोऽपि मदर्थं प्रत्यर्थिपार्थिवान् निहन्तुं पृतनाधिपत्यलक्ष्मीमुपयच्छस्व", इति विज्ञाप्य पितामहस्य चरणयोः प्रणिपपात। भा. च. नवमस्तबके।

अत्र भीष्मानुनयनं दुर्योधनस्येष्टम्, तच्च सविनयवचन-प्रणिपातद्वारा भक्तिप्रदर्शनेन साध्यम्। भीष्मो यौवने कदाचिद् विवाहविमुखोजातः स्यान्नाम, किन्तु इदानीं वार्धक्ये तु तस्य विवाहयोग्यतैव नास्ति, का वार्ता तद्वैमुख्यस्य। यदि विवाहायोग्यो वृद्धोऽपि विवाहाय प्रार्थ्यते, तर्हि तत् तस्य उपहासायैव पर्यवस्यति, बाढं स विवाहोगौण एव भवतु। एव मन्त्राऽपि उक्तिभङ्ग्या प्रतिपादितो गौणोऽपि विवाहो भीष्मस्याऽप्युपहासायैव पर्यवस्यति यन्नुदुर्योधनस्य भीष्मानुनयन विपरीतमेव। यदि-

"भगवन्। परिग्रहविमुखोऽपि भवान् ........... पृतनाधिपत्य लक्ष्मीं परिगृह्णातु।"

इति क्रियते परिवर्तनम् तर्हिविवाह-स्वीकारोभयवाचकपरिग्रहशब्दस्य लक्ष्मी-शब्द साहचर्यात् स्वीकारार्थकत्वेन वाक्यार्थबोधकत्वे सम्पन्ने पश्चाद् गूढतया व्यज्यमानेन पूर्वकालिकविवाहवैमुख्येन सह इदानीन्तनविवाह स्वीकारप्रार्थनाऽपिव्यज्यमानाप्रतीतिपथमवतरन्ती चमत्काराय वचनपाटवायैव च पर्यवस्येत्, नतूपहासाय।

संगतम् । ततश्च तत्सम्बन्धिवर्णनस्यापि तत्रानौचित्यावहत्वम् । युद्धातिरिक्त-सामान्यस्थितौ तु तादृग् वर्णनं संभवेदेव । युद्धे तादृशवर्णनं तु लोकस्यातिविरुद्धमेव । तदपसारणाय तद्वर्णनं नि:सार्यमेव भवेत् ।

तत्रापि करि शब्दोऽधिक एव , करिशावकस्यैव कलभत्वेन प्रसिद्धत्वात्। अतो यदि ‘ युधिकरिकलभ: ’ इत्यस्य स्थाने ‘ रणभुविकलभ: ’ इति पठ्येत, तर्हि भवेदधिकपदत्वदोषस्याऽपि निराकृति: ।

(२५)

तत्रैव हस्तिनो: तुल्याङ्गयुद्धं वर्ण्यते, यथा-

‘ हस्तेन हस्तमथ दन्तयुगेन दन्तौ

कर्णौ च कर्णयुगलेन पदे च पद्भ्याम् ।

बालेन बालमभिहत्य च वारणौ द्वौ

तुल्याङ्गयुद्धमतिशिक्षितमाददाताम् ।। ६।२४।। ’

अत्र हस्तिनो: क्योश्चित् तुल्याङ्गयुद्धप्रदर्शनं वर्णितम् । किन्तु युद्धं नाम परस्परविरोधिनां वैरिभटानां परस्परप्राणहरणोद्योग एव , तुल्याङ्गयुद्धं च केलिमात्रम्,तत्र कस्याप्यपरप्राणहरणायाप्रवृत्तत्वात् । वैरिभटानां परस्परप्राणहरणोद्यतानां वाराधिरूढे समरसंरम्भे तादृक्केलिकौतुकप्रदर्शनंत्वयुक्तमेव । बालेन बालस्य कर्णेन कर्णस्य च ताडनकस्यापि प्राणहरणदाम उद्योग:, यो युद्धसंज्ञां धारयितुं प्रभवेत् । अतोऽत्र तत्प्रदर्शनमनुचितम् । यदि तुल्याङ्गयुद्धमपि स्मरणीयमत्र, हस्तिवर्णने तद्वैशिष्ट्यावर्णनस्य युक्तत्वात्, एवं सत्यपि समरसंरम्भे प्रवृत्तकेलिमात्रत्वेन स्थितस्य तुल्याङ्गयुद्धवर्णनस्याऽप्रासङ्गिकत्वात् अनुवाद्यत्वेन तत्स्मरणं -विधीयताम्, यथा-

‘ बाल्यश्रुतिप्रभृतितुल्यशरीरभाग

युद्धं सुशिक्षितमपि प्रधने प्रमुच्य ।

प्रत्यर्थिनं समरशायिनमाशुकर्तुं

दन्तौ: कौरवकरिणौ रणमाक्रमन्तस् ।। ’

एवं हस्तिनोस्तुल्याङ्गयुद्धमपिस्मृतं भवति, समरसंरम्भेऽप्रासङ्गिकंवस्तुनि

देशोऽपिपरिहृतो भवति, युद्धप्रसङ्गात् केलिवर्णने निःसारणेन ख्यातिविरुद्धत्व-दोषोऽपि दूरीभवति ।

(२६)

द्रोणयुद्धे भगदत्तदन्तिनोऽर्जुनरथं प्रतिकरेणाऽऽक्रमणवर्णने कविनोच्यते, यत्-

"मनश्च पार्थस्य रथं च भङ्क्तुं मदावलेन्द्रस्य करे प्रवृत्ते ।
सारथ्यचातुर्यवशेन शौरेर्भग्नः स तस्यैव मनोरथोऽभूत् ।। २५।१०।

अत्र पार्थस्य मनश्च रथं च भङ्क्तुं मदावलेन्द्रकरे प्रवृत्तेऽपि तस्यैव मनोरथो भग्नः इति कथने विषादनालंकारचमत्कारोदयेऽपि उद्देश्यप्रतिनिर्देश्यत्वकृतः-श्लेषकृतश्च चमत्कारोऽभीष्टोऽपि कवेर्नोदितुं प्रभवति, तदभीष्टत्वे च "मनश्च रथं च, मनोरथः" इति शब्दपरामर्श एव प्रमाणम् । कविः स्वाभीष्टचमत्कारोदयाय पद्यपूर्तित्वराभविष्यानो यदि मनाक्सावधानतास्वीकृतिं व्यधास्यत्, पद्यं च -

"मनोरथं भङ्क्तुं महो प्रवृत्ते मदावलेन्द्रस्य करेऽर्जुनीयम् ।
सारथ्यचातुर्यवशेन शौरेर्भग्नोऽमुकस्यैव मनोरथोऽभूत् ।।"

एवं निरमास्यत् च, तर्हि विषादनालंकारेण सह उद्देश्य प्रतिनिर्देश्यत्व कृतः श्लेषमूलकाभेदातिशयोक्तिकृतश्च चमत्कारोऽभ्युदैष्यदेव । न च यथास्थित पाठे तच्चमत्कारोदये किं बाधकमिति वाच्यम्, "स" इति पदस्यैव मनोरथशब्दस्य अभीष्टार्थाभिधाननियामकत्वेन बाधकत्वात् ।

(२७)

द्रोणं प्रति दुर्योधनवचनम्, यथा-

"पितामहः सोऽपि पृषत्कतल्पे वपुर्निजं माधवमन्तरङ्गम् ।
तवैव हस्ते मम कार्यसिद्धिं कृत्वा हि धाम स्वमियेष गन्तुम् ।।" १०।३३

अत्र प्रक्रमभङ्गः , स्वकीयवस्तुन आधेयत्वेन परकीयवस्तुनश्च आधारत्वेन कथनं प्रक्रम्य पश्चात् माधवरूप परवस्तुन आधेयत्वेन -- -- -- -- --

-- -- -- अन्तरङ्गरूप स्वकीयवस्तुनश्चाऽऽधारत्वेन कथनात्, यदि-

"पितामहः सोऽपि पृषत्कतल्पे वपुः स्वमिन्द्रावरजेऽन्तरङ्गम् ।

'तवैव हस्तेममकार्यसिद्धिं कृत्वा हि धाम स्वमियेष गन्तुम् ।।'

एवं निर्मीयते पद्यम्, तर्हि दूरीभवेद् प्रक्रमस्यभङ्गः, प्रक्रान्तस्यस्ववस्तुन-आधेयत्वस्य परवस्तुनश्चाऽऽधारत्वस्य अन्तर्द्धेः इन्द्रावरजेनाऽपि क्रमशः समुपलभ्यमानत्वात् । (एवं कृतेऽपि मम दुर्योधनस्य ) ~~एवं कृते~~ कार्यसिद्धिं तव(द्रोणस्य) एव हस्ते' इत्यत्र प्रक्रान्तस्य स्ववस्तुनआधेयत्वस्य पूर्ववस्तुनश्चाऽऽधारत्वस्य च भङ्गः स्तदवस्थ एव , कार्यसिद्धेर्दुर्योधनीयत्वेन भीष्मीयत्वाभावात् इति तु नैव वक्तव्यम्, दुर्योधनीयकार्यसिद्धेरपि भीष्मेन स्वकीयत्वेनैव स्वीकृतत्वात् ।

(२८)

द्रोणाकृतकमलव्यूहवर्णनम्, यथा-

'आश्चर्यस्थूललक्ष्यं तदनु दिविषदामन्तरिक्षास्थितानां
द्रोणीन्द्राणां रिपूणामसुमृगहरणे कूटयन्त्रायमाणम् ।
गन्धर्वैः केसराढ्यैर्मदमधुभिरिभैः केतुपत्रैः शताङ्गैः
पद्मव्यूहं व्यतानीत् प्रधनभुवि गुरुः सांयुगीनाऽग्रगण्यः ।।' ११।३८

अत्र केसर-मधुपत्राणामभिमतोऽपि पद्मव्यूहेनाऽन्वयो न भवति,-तेषां भिन्नविभक्तिकगन्धर्वादिविशेषणान्तःपातात् । यदि पद्यतृतीयचरणं-

'गन्धर्वैः केसराढ्यं समधुगजमदैः पत्रितं केतुवृन्दैः' एवं निर्मीयते, तर्हि-भवेत् केसरादीनां पद्मव्यूहेनान्वयोऽभिमतः दूरीभवेच्च अभवन्मतसम्बन्धत्वदोषः।

(२९)

अभिमन्युकृतकर्णरथभङ्गप्रसङ्गवर्णनम्, यथा-

'पार्थात्मजो भानुसुतस्यसाभिभित्त्वाशताङ्गं शितभल्लवृष्ट्या ।
पितामहोक्तं कुरुवीरगोष्ठ्यां तथ्यं चकाराऽर्धरथत्वमस्य ।।' १०।४३

अत्र पितामहोक्तस्य भानुसुतार्धरथत्वस्य तथ्यत्वकरणमुक्तम्, तत्र प्रष्टव्यम् 'पितामहोक्तं भानुसुतार्धरथत्वं किमतथ्यमासीत्? येन तत्तथ्यताऽत्राभिमन्युनाऽऽपादिता ? नैवम्, पितामहेन यदुक्तं तदतथ्यं नाऽऽसीत्, प्रमाणाभावात्, किन्तु तत् तथ्यमेवासीत्, स्फुटं केवलं नाऽऽसीत्, कविशब्दमात्रप्रमाणकानां पाठकानां कृते , सास्फुटताऽत्राभिमन्युना कृता, श्लेषमूलकाऽभेदातिशयोक्त्या च कविना

निबद्धा । अतः ' तथ्यं चकार ' इत्यस्यस्थाने ' स्फुटीचकार ' इति क्रियेत चेत् स मेंत्रुसंस्यात्, प्रसिद्धिविरुद्धत्वदोषश्चाऽपाकृतो भवेत् ।

(२०)

द्रोणाचार्यवधानन्तरं दुर्योधनदशावर्णनं यथा-

' धृतराष्ट्रसुतोऽपि गेहमागाद्
दिनदीपांकुर दीनदीन दीप्तिः ।
शकलीकृत बाहुकर्णनासैः
सहयोधैः स घटोत्कचाश्म वर्षात् ।। १०। १०० ।'

अत्र योधानां बाहुकर्णनासं शकलीकृतं वर्ण्यते, तत्र तच्छकलीकरणेकर्तृत्वं कस्येति विचार्यम् । घटोत्कचस्येतिचेन्न, तस्य अश्मवर्षेसम्बन्धित्वेन गुणीभावे- शकलीकरणेकर्तृत्वेनाऽन्वयस्याऽसंभवत्वात् । कर्तृसाकांक्षा तु शकली करणं न तिष्ठेत्, अतो घटोत्कच सम्बन्धिनोऽश्मवर्षस्य शकलीकरणे कर्तृत्वं भवतु । न चाश्म वर्षस्य करणत्वमेवेति वाच्यम्, सत्यम्, किन्तु तस्यकरणत्वं घटोत्कचस्य कर्तृत्वे नोपस्थितौ सत्यामेव, तस्य स्वकर्तृतां परित्यज्याश्मवर्षे सम्बन्धित्वेन गुणीभावे तु करणभूतेऽप्यश्मवर्षे कर्तृत्वं कल्पयितुं शक्यते , बाढं तदारोपितमेवास्तु ।- एवं यदि घटोत्कचाश्मवर्षस्यैव कर्तृत्वं स्वीकर्तव्यं, तर्हि तदनुरोधेन तत्र तृतीयैव विभक्तिर्युक्ता, न तु पञ्चमी । पाठश्च तदा ' घटोत्कचाश्मवर्षैः ' इति कल्पनीयं- स्यात् । भवेच्च ' साकांक्षत्व ' दोषापाकृतिः ।

(२१)

कर्णार्जुनयुद्ध प्रसंगे पद्यम्, यथा -

' सव्यसाचिहननाय शरासे संहिते रविसुवा भुजगास्त्रे ।
नन्दनद्वितयवत्त्वममंस्त स्वस्य कल्पकवनेन सहेन्द्रः ।। ' ११।४८

पद्यस्यैतस्य कोऽभिप्रायः ? ' इन्द्रो रविभूकर्तृकसव्यसाचिहननफलकशरासाधिकरणक भुजगास्त्र संधानकालिक स्वाप्रधानकल्पकवन (नन्दन) योगविशिष्ट प्रधान नन्दनद्वितययुक्तत्वाऽवबोधवान् ' इति प्रतीत्या ' इन्द्रो नन्दनत्रितयवत्त्वं स्वस्याऽमन्यत ' इति पद्याभिप्रायः ।

तेन 'इन्द्रः स्वस्य कल्पकवनेन सहैव नन्दनयोर्द्वितयवत्त्वम् अमंस्त संभावितवान् , नार्जुनजयन्ताभ्यां, किन्तु जयन्तनन्दनवनाभ्यामेवेत्यर्थः । अनिवार्यमेतदस्त्रं हन्तार्जुनम् । श्लोकद्वयेऽपि उर्वश्या इन्द्रस्य च मालाग्रहणोक्ततर्कोदय हेतुरिति ध्येयम् ।' इति तद्व्याख्याकारो रामचन्द्रबुधेन्द्रः, 'इन्द्रः स्वस्य आत्मनः कल्पकवनेन नन्दनाख्यकाननेन सहैव नन्दनद्वितयवत्त्वम्, नन्दनद्वयशालित्वम् अमंस्त मनुतेस्म । अयमाशयः - इन्द्रो हि जयन्तार्जुनाभ्यां नन्दनद्वितयवान् प्रसिद्धः, सम्प्रति कर्णेनागास्त्रे संधाने सति अर्जुनमरणमवश्यम्भावि मत्वेन्द्रः स्वस्य नन्दनद्वितयवत्त्वं न जयन्तार्जुनाभ्यां किन्तु जयन्तनन्दनकाननाभ्यां मनुतेस्मेति तात्पर्यम् ।' इति चापरः व्याख्याकारो न्याय-व्याकरणवेदान्त-साहित्याचार्य आचार्यश्रीरामचन्द्रमिश्रश्च यद्व्याख्यातवन्तौ तत्कविविवक्षितत्वेन स्वीकृतं प्रकटि[illegible] स्वाभिमतमेव प्रकटितवन्तौ, न तूक्तम्, उक्त्यायद्बुध्यते,ततुपर्यस्माभिः-प्रकाशितमेव ।

यथा-' देवदत्तः सप्तपुत्रीभिः सहपुत्रचतुष्टयवान्, इत्युक्ते देवदत्तस्य केवल-पुत्रचतुष्टयवत्त्वमेव न मन्यते, सप्तपुत्रीणां पुत्रचतुष्टयेऽनन्तर्भावात् । यथा च 'अये भद्र ! त्वम् एतेन रूप्यकशतेन सह तां रूप्यकपञ्चविंशतिं त्वत्समीपनिधिप्राप्तपूर्वाम् तस्मै धान्यविक्रेत्रे समर्पय' इति केनचित् कथिते श्रोतुःधान्यविक्रेत्रे सपाद-शत रूप्यकाणामेव समर्पणं कर्तव्यम् भवेत् , न तु केवलानां पञ्चविंशतिरूप्यकाणामेव, शतस्य पञ्चविंशत्यामनन्तर्भावात् । तथा - कल्पकवनेन सह हि नन्दनद्वितयवत्त्वस्य नन्दनत्रितयवत्त्वमेवार्थः । एवं यथा कविविवक्षितत्वेनाभिमतं व्याख्याकाराभ्यां, तथा प्रकाशयितुंनोक्तान्यक्षराणि कवेः प्रभवन्ति , तथा प्रकाशयितुं तु-

'सव्यसाचिहननायशरासे संहिते रविसुवाभुजगास्त्रे ।
नन्दनद्वितयवत्त्वममंस्तस्वं वृत्रहा खलु जयन्तवनाभ्याम् ।।

एवं विधान्येवाक्षराणि निगुम्फनीयानि , येन विवक्षितार्थावाचकत्वदोषो दूरीभवेत् ।

वस्तुतस्तु -

'पाणिना तदनुभानुनन्दने पन्नगास्त्रमचिरेण गृह्णाति ।

पूर्वमेव निखिलाप्सर:कुलात् साधयौ वरणमाल्यमुर्वशी ।।' ११।४७

इति पद्यानुसारं यथा रविसुतपन्नगास्त्रेण विद्धस्यार्जुनस्य भूलोकं त्यक्त्वा स्वर्लोकागमनसंभावनया उर्वशी निखिलाप्सर:कुलात्प्रागेववरणमाल्यं धृतवती तथैव वनजयन्ताभ्यां नन्दनद्वितयवान् इन्द्रोऽर्जुने स्वरागते स्वस्य वनजयन्तार्जुनै: नन्दनत्रितयवत्त्वममंस्त । यतो हि युद्धहता: स्वर्लोकमेव गच्छन्ति च, अर्जुनोऽपि यदि रविभूपन्नगास्त्रेण अमोघेन युद्धे त्यक्तजीवितो भविष्यत्येव च, तर्हि स्वर्लोकमागमिष्यत्येव । स्वरागते सत्येव यथा पूर्वम्प्राहूत: निवातकवचान् कालकेयांश्च गाण्डीवविस्फारलीलया फल्गुत्वं प्रापयामास , तथैव सम्प्रत्यागतोऽत्र स्वर्लोक एव स्थायिरूपेणोषितवान् यथानिदेशं कार्याणि कुर्वन्नेव स्थास्यति, स्वेन पुत्रवत्त्वलाभं चार्जुनो मां दर्शयिष्यति, स्वरागतस्यैवार्जुनस्य वस्तुत: पुत्रत्वम्, यथोक्तं श्रुतावपि 'पुत्रेण लोकान् जयति, पौत्रेणानन्त्यमश्नुते, अथपुत्रस्य पौत्रेण देवस्याप्नोति विष्टपम्' इति, अत: भुवि स्थितोऽर्जुन: पुत्रोऽपि न यथार्थ: पुत्र:: तत्र पितृकार्यस्याकरणात्, स्वरागतस्तु निदेशवशंवदत्वेन यथार्थ: पुत्रो भविष्यति, अत: भुविस्थितेनार्जुनेन नेन्द्र आत्मानं पुत्रवान् अमंस्त, रविभूपन्नगास्त्रविद्धत्वात् त्यक्तजीवितस्तु भूलोकं विहाय स्वर्लोकमेवाऽऽगमिष्यति, अत: इन्द्र: स्वस्य वनेन जयन्तेनाऽर्जुनेन च स्वकीयं नन्दनत्रितयवत्त्वमेवाऽमंस्त, इति महाकवेरभिप्राय:, तदा तु महाकविसूक्ति: स्वरूपे स्थितैव संगच्छतेतरां सुतराम् । व्याख्याकृद्भ्यामेव स्वदृक्कोणपरिवर्तनं विधेयम् ।

(३) भारतचम्पूकाव्यस्यपूर्ववर्तिचम्पूकाव्यैस्तुलना

(१)

भारतचम्पूकाव्यस्यनलचम्पूकाव्येन तुलना

चम्पूकाव्येषु नलचम्पूकाव्यस्य प्राथमिकत्वं मन्यते भियुक्तै:(१), तत:

---

१   चम्पूकाव्यका आलोचनात्मक एवं ऐतिहासिक अध्ययन' पृष्ठ १०१

पूर्वमन्यस्य कस्यापि चम्पूकाव्यस्यानुपलभ्यमानत्वात् । अतो भारतचम्पूकाव्यस्य-तत्पूर्ववर्तिचम्पूकाव्यैः सह तुलनात्मकालोचनायां प्रस्तूयमानायां सर्वतः प्राक् नल चम्पूकाव्येन सहैव भारतचम्पूकाव्यस्य तुलना प्राप्ताऽवसरा भवति । किन्तु द्वयो स्तयोस्तुलनायाः प्रागेतदवगन्तव्यं भवति, यत्- नलचम्पूकाव्यस्य भारतचम्पूकाव्यस्य महान् शैलीभेदः, यतो हि नलचम्पूकारः कादम्बरीकार इव प्रत्येकविषय स्य वर्णनसंक्षेपे कर्तुं शक्येऽपि महामहता विस्तरेणैव वर्णनं चिकीर्षति, येन स्थाने स्थाने कादम्बर्यामिव नलचम्पूम्पामपि श्लेषमूलकानामुपमोत्प्रेक्षापरिसं ख्यादीनां माला उपर्युपरि दृग्विषयतायां समापतन्ति, येन नलचम्पूकारः काद म्बरीकारेण सह स्पर्धमान इवावलोक्यते । तच्चन्द्रोदयवर्षाशरदादीनां नगरी राजादीनां च वर्णने च नलचम्पूकारेण कादम्बरीकारेणेव कृतोऽस्ति महानेववि स्तरः, येन कादम्बरीकथेव गौणविषयाणां वर्णनेषु समयं शक्तिं च यापितवता कादम्बरीकारेणेव नलचम्पूकारेणाऽपि नलदमयन्तीकथाऽपि अर्धवर्णितैव त्यक्त व्याऽभूत् । किन्तु भारतचम्पूकारस्य भिन्न एवास्ति पन्थाः, भारतचम्पूकारो-महामहतोऽपि महाभारतीय कथाविस्तारस्य साकल्येन वर्णनाय कृतसंकल्प इव-विलोक्यते, यतो हि भारतचम्पूकारः चन्द्रसूर्योदयादीनां वर्णनं न केवलं संक्षेपेण, अपितु स्वातन्त्र्येणाऽपि वर्णनं न कुत्राऽपि कृतवान्, येन चन्द्रसूर्योदया दीनां वर्णनं संक्षिप्य कुर्वन् अपि वर्ण्यप्रस्तुतमुख्यविषयेण सहैव उपमानोपमेयाद्य न्यतमविधया विहितवानस्ति, फलतो भारतचम्पूकारो महामहाविस्तरवतो-महाभारतस्य कथानामपि साकल्येन वर्णनं कर्तुं सफलोऽभूदेव । चन्द्रोदयवर्णनं भारतचम्पूकाव्ये यथा-

'तदनु मुहुर्मुहुर्वल्लभेव केवलमवलोकमानाबलशासनदिशायामोजायमानेन चन्द्र मसाप्रसृताभिर्मदसहितकरिघटाविषाणाग्रप्रतिफलनशतगुणितधवलिमवीचिभि र्मरीचिभिर्दलितरणविमर्दुर्दशा विराटस्य चमूरपि' ।(भा०च०स्त०६पृ०२६१)

एवं गौणतयैवचन्द्रोदयस्य संक्षिप्ततरं वर्णनमुपलभ्यते भारतचम्पूकाव्ये । तद्वर्णनं नलचम्पूकाव्ये यथा-

'अनन्तरं च चन्द्रमसागर्भिणीपौरन्दरी दिक्केतकीपुष्पपत्रपाण्डिमानमभ

जव । उल्ललास च चण्डतरमारुतान्दोलितोदयाद्रिद्रुमकुसुमकिञ्जल्करेणुराजिरिवकपिशा शशाङ्कद्युतिः' एतदनन्तरमेकादशप्रकारैरुत्प्रेक्ष्यमाणः क्षीरडिण्डीरपिण्डसदृशो दृष्टिपथमवतरति तारापतिः । तदनन्तरं च तारापतेर्गगनप्रवर्णनं, तत्प्रकाशेन भुवनस्य धवलिमोदशायाश्च पृष्ठद्वयपरिमितेन महता विस्तरेण वर्णनमुपलभ्यते ।'

(न०च०उ०७पृ०२२०)

एवं भारतचम्पूकारो यदि गौणं वस्तु गौणरूपेणैव संक्षिप्य वर्णयति तर्हि नलचम्पूकारो गौणमपि वस्तुप्रमुखमिव विस्तरशो वर्णयति । अतो नाऽनयोः शैलीसाम्यम्, शैलीभेदे च तयोर्मिथस्तुलनाऽनुचितेव, तथापि तारतम्यपरीक्षणं तु कर्तुं शक्यत एवेति कतिचिन्निदर्शनानिप्रस्तूयन्ते । येन सुकरं स्यात् सारग्रहणं सहृदयानाम् ।

वर्षर्तुवर्णनं भारतचम्पूकाव्ये यथा-

'चक्राङ्गीमदपश्यतोहरचलज्झम्पासमुन्मेषणैः
पुष्यत्केतकगन्धसिन्धुविलुठत्पुष्पन्धयान्धीकृतैः ।
मेदस्वीकृतकेकिनीकलकलैर्मेघाङ्कुराशामुखैः
पान्थानामपमृत्युभिः कतिपयैः प्रादुर्बभूवे दिनैः ॥'

'कालाम्बुदालिनलिकात् क्षणदीप्तिवर्त्या
संधुक्षितात्सपदि सध्वनि निःसरद्भिः ।
वर्षाश्मसीससुलिकानिकरैः कठोरैः
घर्माभियातिमवधीत् घनकालयोधः ॥'

'माध्वीलिहा विरुरुचे मालिनीकृताग्रा
कान्तारसीम्नि नवकेतकबर्हिरेखा ।
दग्धाङ्कुरे स्मरभिया दयिताजनेन
संप्रेषिता पथिकभर्तृषु पत्रिकेव ॥'

'अर्जुनेषु सकलेषु विकासिष्वद्रिसीम्नि धृततादृशशब्दः ।
एक एव ककुभि विशुशोष विशेषादेतदम्बुमृदनेहसि चित्रम् ॥'

'वियत्यशेषासु विदिक्षु दिक्षु वियोगिशिल्पीन्द्रविनिर्मितायाः ।
तस्या मृगाक्ष्याश्चतडित्ततेश्च घनक्षयः संविविदेनभेदम् ॥' भा०च०स्त०३पृ०११४

एवं यावता वर्षर्तोरुद्दीपनक्षमता प्रकटीभवति, तावताश्लोकद्वयेनैव-तद्वर्णनं संपाद्यते भारतचम्पूकारेण, तृतीय-चतुर्थश्लोकयोः अर्जुनविकासतडिद्विला-सवर्णनेन सह अर्जुनदशायास्तदीयविप्रलम्भानुभावस्यापि वर्णनमकिमित तेन ।

किन्तु नलचम्पूकाव्ये वर्षर्तुवर्णनस्य महान् विस्तरोदृग्गोचरी भवति,-यथा-

'अथ कदाचित् तुन्नमत्पयोधरान्तरालपतद्धरावली विराजिताः, कमलदलकान्तनयनाः, सुरचापचक्रवक्रभ्रुवः, विद्युन्मणिमेखलालंकारधारिण्यः, शिञ्जानमुक्तकलहंसका:, प्रौढकरेणु संचारहारिण्यक्रमकंधराः, तिरस्कृतशशाङ्ककान्तिकलापोच्चमुखमण्डलाः, सकलजनकेरीयमानगुणामिममनुपमरूपलावण्यराशिराजितं राजानमवलोकयितुमिवाऽवतरन्ति स्म वर्षाः, एवं त्रिभिः पृष्ठैः वर्षावर्णनमुपलभ्यते तस्य समस्तस्योद्धरणं विवेचनं च मुधा विस्तरायैव भवेत् ।

किन्तु एतावतैव तारतम्यं तु वयं परीक्षितुं प्रभवाम एव । वर्षर्तोर्वर्णनं भारतचम्पूकारः संक्षिप्य कुर्वन्नपि कियत्याप्रौढ्या तत्प्रस्तौति ओजोगुणमयी प्रौढा रचना रूपकोत्प्रेक्षाविषमसामान्यालंकाराणां चमत्कारः अत्यन्ततिरस्कृत वाच्यलक्षणामूलध्वनीनां छटा च कामपि मनोहारिणीं सुषमामुर्वरयन्तिवर्षावर्णनस्य । येन यथा तस्य घन घनाघनघटाटोपस ध्वनिचलच्चम्पासमुन्मेषबद्धजल धाराडम्बरभरितत्वोदिनाकम्बतस्योद्दीपकत्वमनुभूयते, तथा बाढं प्रकटी भवति वर्णनेन । किन्तु नलचम्पूकारो विस्तरं कुर्वन्नपितद्वर्णने न तथा साफल्यमवाप,-यतो हि वर्षर्तोर्यथोद्दीपकत्वेन विरहिजनहिंसकत्वं प्रसिद्धं न तथा तस्य वर्णनं प्रौढमास्मैघटोप परिपूर्णं च वर्तते, प्रत्युत प्रारम्भ एव वर्षासु समासोक्तिविधया श्लिष्टविशेषणमूलकं नायिकात्वं प्रकटीकृत्य वर्षर्तोप्रौढाटोपपरिपूर्णत्वं नाशितवान् एवमुपरिप्रस्तुते वर्णने बहुल केवलश्लेष बहुल श्लेष प्रदर्शनलोभेन कविना पयोधरपतद्धारा-कारधारि-करेणुसंचार-कम्रकंधरा - शब्दैश्चतुःकृत्वः कृतवान् तद्गत-सलिलवर्णनं यद् वैरस्यायैव भवति ।

नायकवर्णनं भारतचम्पूकाव्ये यथा-

' तदनु विधिवदुपनीतानां क्रमेण मधुरेणावयसाशिरसा च विधृतवपुषां वि

नयगौरवपुषां सकलासु कलासु कौशलमुन्मीलयतां तेषां यशांसि बलभेदनमदावलस्य धाम्नो युगलमपि युगपदुल्लङ्घयामासुः ।

'नवतरुणिमलक्ष्मीनन्दनीयं शरीरं
कुरुवृषभसुतानां कुर्वती नेत्रपात्रम् ।
मुनितति रिति मेने मोहनाय त्रिलोक्याः
स्वविशिख इव कामः सोऽपि किं पञ्चधाभूत् ।।' (भा०च०स्त०१प०६७)

'कुमारास्तूर्णमारुह्य कुम्भयोनेरनुग्रहात् ।
कोटिं कोदण्डसारस्य गुणिनस्ते गुणा इव ।।' (भा०च०स्त०२प०८ )

अत्रानुप्रासयमकश्लेषव्यतिरेकातिशयोपमा चमत्कारैः मनोहारिपूर्णं च नायकवर्णनं प्रस्तुतं भारतचम्पूकारेण ।

किन्तु नलचम्पूकारः स्वग्रन्थे-

'विरचितचूडाकरणादिसंस्कारक्रमश्च प्राप्तेविद्याग्रहणकाले निमित्तमात्रीकृतोपाध्यायः स्वयमेवसनस्तानवद्यविद्याम्भोनिधेः पारमवाप। तथा हि- प्रबुद्धबुद्धिर्बौद्धे, सविशेषशेमुषीको वैशेषिके, विख्यातः सांख्ये, रञ्जितलोको लोकायते, प्रतिच्छन्दकश्छन्दसि च्छन्दसि, प्राप्तप्रभः प्राभाकरे, अनल्पविकल्पः कल्पज्ञाने, शिक्षाक्षमः शिक्षायाम्, अकृतापशब्दः शब्दशास्त्रे, अभियुक्तो निरुक्तौ, सज्जो ज्योतिषि, तत्त्ववेदी वेदान्ते, प्रसिद्धः सिद्धान्तेषु, स्वतन्त्रस्तन्त्रीवाद्येषु, पटुः पटहे, अप्रतिमल्लो झल्लरीषु, निपुणः पणवेषु, प्रवीणो वेणुषु, चित्रकृच्चित्रविद्यायाम्, उद्दामः कामतन्त्रे, कुशलः शालिहोत्रे, श्रेष्ठः काष्ठकर्मणि, सावलेपो लेप्ये, पण्डितः कोदण्डे, शौण्डः शारिषु, गुणाढ्यः गणिते, बहुलो बाहुयुद्धेषु, चतुरश्चतुरङ्गद्यूतक्रीडायाम्, उपदेशको देशभाषासु, अलौकिको लोकज्ञाने ।'

'रसे रसायने ग्रन्थे शस्त्रे शास्त्रे कलास्वपि।
नलेनलेभिरे लोकाः प्रमाणं निपुणा अपि ।।'

एवं नलचम्पूकारो नायकं वर्णयित्तुं विद्याकलानां सूचीमात्रमुपस्थापयति । वेणुपणवपटहझल्लरीवादनकौशलदर्शनमपि राज्ञां वर्णने कियदावश्यकमिति ध्येयं सुधीभिः । अत्र विस्तृतायामपि विद्याकलासूच्यां केवलं द्वियमकोपन्यासः, अनुप्रा-

सौमनाङ्ग सन्नपि न चमत्कारी । एतादृग्वर्णनं न कदाचिदपि सहृदयहृदयाकर्षणायप्रभवति, भवतिप्रत्युत वैरस्यायैव ।

नलचम्पूकारो यमकान्युपन्यस्यति, यथा-

' नमिताः फलभारेण नमिताःशालिमञ्जरीः ।
केदारेषु हि पश्यन्तो केदारेषु विनिःस्पृहाः ।।न०च०उ०२।२।

अत्र सत्यपि यमके वीत्युपसर्गः पादपूरणमात्रफलको विवक्षितार्थविपरीतप्रतीतिमपिजनयति । अत्र विवक्षितोदारनिःस्पृहत्वाभाव एव ,किन्तु 'विनिःस्पृह-शब्देन' विशेषेण निःस्पृहाः' इति विग्रहवता 'दारेषुविशेषेणानिःस्पृहानभवन्ति अपितु म साधारण्येन निःस्पृहाभवन्ति, इति विपरीतार्थप्रतीत्या वैरस्यमेवभवति सहृदयानाम् ।

एवं-

' यः शृङ्गारं जनयतिनारीणाम्, नारीणाम्। यःकरोत्याश्रितस्य नवं धनम्, न बन्धनम् । योगुणेषुरज्यते नरमणिनाम्,नरमणिनाम्। यस्य-च नमस्या ग्रन्हारेषु श्रूयते नलोपाख्यानाम्,नलोपाख्यानम् ।।(न०च०उ० २पृ०५७)

अत्र परिसंख्यासह यमकस्य संमिश्रणं रुचिरमेवेति सत्यम्,किन्तु अरीणां शृङ्गारमपि कोऽपि जनयति ? आश्रितस्य च बन्धनमपि कोऽपि करोति? यस्य निषेधप्रसङ्ग उपस्थितो भवति । केवल यमकसंकलनालोभेन असंगतस्याऽपि वस्तुनो निबन्धनं तुनकथमप्युचितम् ।

किन्तु भारतचम्पूकारस्य यमकानां संकलानि न निरर्थकसंकलनामात्राणि, अपि तु मनोहराणि प्रकृतार्थोपस्कारकत्वेन चमत्कारीण्यपि भवन्ति,यथा-

' किंशुकस्य वदने रुचिरत्वं किंशुकस्य हृदयेऽपि वशित्वम् ।
किंशुकस्य कुसुमेषु नदन्तीशंसतिस्ममधुपालिरितीव ।।'

' कुरबके रवकलिभृतः सुधासमधुरं मधुरं मधुषट्पदाः ।
पपुरवापुरवार्यमपि स्मयं नृपवने पवनेरितपादपे ।।'

अत्र यमकचमत्कृत्या सह शृङ्गारानुगुणप्रसादमाधुर्यगुणानुगुणता व्यतिरेकादोपोपमासुषमा च हठादाकर्षतिसुमनोजनमनांसि ।

नलचम्पूकारेण भारतचम्पूकारेण च द्वाभ्यामपि भगवतो विष्णोः - स्तुतेर्निबन्धनं कृतमस्ति स्वस्वग्रन्थे-, नलचम्वां यथा-

'जयत्युदधिनिर्गतस्मरविलोललक्ष्मी लस-
द्विलासरसमन्थरस्फुटकटाक्षलक्ष्यीकृतः ।
अमन्दरयमन्दरभ्रमणघृष्टहैमाङ्गदः
सुरारिवधनाटकप्रथमसूत्रधारो हरिः ।।'

'जयत्यमलकौस्तुभद्युतिविराजितोरःस्थलः
सहेलहतदानवो नवतमालनीलद्युतिः ।
विनम्रसुरमस्तकच्युतविकासिपुष्पावली-
विकीर्णमधुसीकरस्नपितपादपीठो हरिः ।।'

'जयत्युदरनिःसरत्सरोजपीठीपठ-
च्चतुर्मुखमुखावलीविहितरम्यसामस्तुतिः ।
अलब्धमहिमावधिर्मधुवधूविलासान्तकृत्
जगत्त्रितयसंभवो भवभयापहारी हरिः ।।'

'जयत्यसुरसुन्दरीनयनवारिसंवर्धित-
प्रतापतरुरुल्लसत्तरुणकेकिकण्ठच्छविः ।
दलत्कनककेतकीकुसुमपत्रपीताम्बरः
सुराधिपनमस्कृतः सकललोकनाथो हरिः ।।'

'जयत्यखिललोकजिन्नरककालकेतूद्गमो
मदान्धदशकन्धरद्विरददुष्टपञ्चाननः ।
हिरण्यकशिपुप्रियामुखसरोजचन्द्रोदयः
सुरेन्द्ररिपुसिंहिकासुतशिरःकुठारो हरिः ।।'

'जयत्यमरसारथिर्मदनतप्तलक्ष्मीलस-
त्पयोधरयुगस्थलीसरसचन्दनस्थासकः ।
अचिन्त्यगुणविस्तरः सकलकौशिकशार्ङ्गिणा
कपोलफलकोल्लसत्तिलकभङ्गहारी हरिः ।।'

'जयत्यसमसाहस: सकललोकशोकान्तकृत्
सहस्रकरभासुरस्फुरितचारुचक्रायुध: ।
विहङ्गपतिवाहन: कलुषकन्दनिर्मूलन:
समस्तभुवनावलीभवनशिल्पधारीहरि: ।।'
'जयत्यमलभावना ऽवनतलोककल्पद्रुम:
पुरन्दरपुर:सरत्रिदशवृन्दचूडामणि: ।
अरातिकुलकन्दलीवनविनाशदावानल:
समस्तमुनिमानसप्रवरराजहंसो हरि: ।।' न०च०उ० ६पृ०१५६

अत्र भगवतोनन्तेषु नामधेयेषु सत्स्वपि अष्टस्वपिश्लोकेषु हरिनाम्नै वस्मृतो भगवान्, जयति क्रिययैवाऽऽपादिता प्रत्येकश्लोके वाक्यार्थसमाप्ति:, तस्या अपि प्रतिश्लोकादावेवोपन्यास इत्यनवीकृतत्वं त्वस्त्येव अष्टस्वपि श्लोकेषु, सहैव स्तुतावस्यां मुरारीणां सामान्यविशेषरूपाभ्यामुल्लेखं विधाय तद्भगवन्नाश्यत्वस्य सप्तकृत्व:, भगवत्कायनीलद्युतेस्तत्पुरवन्ध्यत्वस्य तज्जगज्जनकत्वस्य च द्विर्द्वि: कृत्व:, तल्लोकनाथत्वस्य च त्रिरूक्तै: कृत्व उदाहरणम् पिष्टपेषणमिववैरस्यायैव भवति । 'चतुर्मुखमुखावलीविहितरम्यसामस्तुति' इत्यत्र मुखावलीशब्दोऽधिक: पादपूरणमात्रफलकोऽप्यस्य रुचिकर एव ।

भारतचम्पूकाव्ये भगवतो विराट्स्वरूपप्रदर्शनेमुनिजनकृता दशावतारवर्णनपूर्विकास्तुति: तदीयेऽष्टमस्तबके(५७-६६)दशभि:पद्यै: कृता पूर्वमालोचिता, तत्रत्यावर्णनाप्रौढि: शब्दार्थालंकारसुषमाभावध्वनिश्च तत्रैव विवेचिता द्रष्टव्या:, नेह विस्तरभिया पुनरुपन्यस्यन्ते ।

एवं स्थालीपुलाकन्यायेनाऽवलोकितेषु कतिषु चित् स्थानेषु सम्यगवगतं भवत्येतत्, यत्- नलचम्पूकार इव भारतचम्पूकारोऽनावश्यकं विस्तरैन रोचयति,संक्षिप्यापि वर्णनं प्रभावशालि हृदयहारिरूपेण चोपस्थापयति। नलचम्पूकारस्य-

'किं कवेस्तेन काव्येन किं काण्डेन धनुष्मत: ।
परस्य हृदये लग्नं न घूर्णयति यच्छिर: ।।'

इत्युक्तिं भारतचम्पूकारःस्वोक्तिषु सर्वत्र चरितार्थयन् कवीनां कृते आदर्शरूपेण प्रकटीभवति ।

अस्तु !भारतचम्पूकारो नलचम्प्वा न प्रभावित:, अपितु कवित्वे ततोऽतिशयितोत्कर्षशाली सिद्ध्यति ।

## (२) भारतचम्पूकाव्यस्य यशस्तिलककाव्येन तुलना

यशस्तिलकचम्पूकारो जैनकवि: सोमदेव: स्वकीये प्रस्तुतकाव्ये यशोधरचरितं निबबन्ध: । डा०छविनाथेन सोमदेवस्य(१) ईशवीये ६५६ मितिवत्सरे-वर्तमानता स्वीकृता । तदनुसारं 'यशस्तिलकचम्पूकाव्यस्य' 'भारतचम्पूकाव्यात्' प्राक्तनत्वं सिध्यति येन तस्य 'भारतचम्पू' कारावलोकितत्वमपि संभवति।। अतो 'यशस्तिलकचम्पू' काव्येन 'भारतचम्पू' काव्यस्य प्रभावितत्वमप्रभावितत्वं-वेति विचारस्य प्राप्तावसरत्वात् प्रस्तूयतेऽसौ ।

कवि: स्वकाव्यस्य प्रशंसां कुर्यात्, नास्ति तत्र कस्यापि मतभेदसंभव: । किन्तु यद्यसौ स्वविद्यामदेनापरान् तृणाय मन्येत ,स्वस्य च लोकोत्तरत्वावलेपं प्रकटीकुर्यात्, तदा तादृगवलिप्तस्य वच:सु क: श्रद्दधीत, कथं च तत्काव्यं कान्तासम्मिततया व्यवहारोपदेशाय पर्यवस्येत् ? -- इति विचारणीयमेव ।

सोमदेव: स्वकाव्यं सुकृतिनां पुण्यै: प्रकटितं कथयति स्वकीये 'नीतिवाक्यामृते' यथा-

'आजन्म समभ्यस्तात् शुष्कात् तर्कात्तृणादिवममास्या: ।
मतिसुरभेरभवदिदं सूक्तिपय: सुकृतिनां पुण्यै: ।।' १।१७

अत्र कवेरात्मश्लाघा अवलिप्तता च स्पष्टैव ।

एवं -

'दर्पान्धबोधबुधसिन्धुरसिंहनादे

---

१ दृश्यतां 'चम्पूकाव्यों का आलोचनात्मक एवं ऐतिहासिक अध्ययन' नामकस्य डा०छविनाथग्रन्थस्य पृष्ठे २९५ मिते ।

वादिद्विपोद्दलन दुर्धरवाग्विवादे ।
श्रीसोमदेव मुनिपे वचनारसाले
वागीश्वरोऽपि पुरतोऽस्ति न वादकाले ।।'

इतिस्वपद्ये ' वादकाले वागीश्वरोऽपि ममपुरतो न भवितुं शक्नोति , के पुनरन्ये ।' इति कथयन् कविर्वागीश्वरप्रभृतीनां सर्वेषां तृणकल्पत्वं प्रकटीकुर्वन् स्वस्य दृप्तत्वमुद्धतत्वं वादव्यसनित्वं चाविष्करोति । यदा अन्ये कवयः -

' विद्याविवादाय, धनंमदाय,शक्तिःपरेषां परिपीडनाय ।
खलस्य,साधोर्विपरीतमेतद् ज्ञानायदानाय च रक्षणाय ।।'

एवं विधं नयोपदेशं कुर्वन्तो ' विवादं' खलत्वसूचकं प्रकाशयन्ति ।

' मन्दः कवियशः प्रार्थी गमिष्याम्युपहास्यताम् ।
प्रांशुलभ्ये फलेतस्मिन्नुद्बाहुरिव वामनः ।।'

एवं च स्वकीयं विनम्रत्वं प्रकाशयन्ति, तदा सोमदेवस्य अवलिप्तत्वम्-उद्धतत्वम् विवादव्यसनित्वं च तस्य' मुनिप' त्वस्य कियदनुकूलमिति विचार्यम्।। एतादृशानि अवलिप्तत्वौद्धत्य पूर्णानि वचनानि तु न सुकृतिनां पुण्यैः अपि तु-स्वस्य दुर्भाग्यैनैव संभवन्ति । एवं वैदुष्यावलिप्तत्वेऽपि सोमदेवस्य कियद्वाग्वैदग्ध्यमिति पुरस्तात् प्रस्तुतेन विचारेण स्फुटीभविष्यत्येव , किन्तु अत्रापि मनाग् विलोक्यतां विबुधैः । -

' दर्पान्धबोधे' इत्यादिनि तस्य पूर्वोक्ते पद्ये ' बोध' शब्दस्याधिकत्वमेवं ' दर्पान्ध बुधे' त्येतावतैव विवक्षितार्थ पूर्तेः । ' बुधसिन्धुरः वादिद्विपे' त्यत्र-एकस्यैवार्थस्य द्विरुक्तिरेव । ' वचना' इत्यत्रवचनशब्दस्य स्त्रीत्वमशिष्टमेव । '-मुनिपे' तत्सुपात्तायाः सप्तम्याः ' सति' पदोपादानेनैव संगतेस्तदनुपादानात् = न्यूनतैव । ' मुनिप' शब्दस्य सप्तम्यन्तत्वे ' तस्य' पदोपादानेनैव ' वादकाले' इति पदस्य ' सोमदेवमुनिपे' नान्वय संभवात् तदनुपादानेनाऽभवन्मत सम्बन्धतैव । मन्ये, एतावतो दोषजालस्य ' नाद वाद,साल-काले' त्यनुप्रासनिबन्धनायैवा - क्रियत सोमदेवेनोपेक्षा, चरितार्थिता च ' अनुप्रासाऽनुरोधेन भूपः कूपे निपातितै' इति विदग्धजनोक्तिः । अथवा स्वपद्यनिबद्धे दर्पान्ध बुध' इव स्वयमपि दर्पा

न्ध: सन् नेदितवान् स्वपक्षगत दोष समूहम् । अहो, वागीश्वर पराभावयितुः 'मुनिप' स्य वाग्वैदग्ध्यम् । अस्तु ।

'भारतचम्पू' कार: स्वनिबन्ध प्रशंसां कुर्वन्नपि न तृणायमन्यते वागीश्वरं विबुधानन्यान् वा , तदवलोक्यतां विद्वद्भि:, यथा-

'दिगन्तर लुठत्कीर्तिरनन्तकवि कुञ्जर: ।
प्राणैस्तुल्यं सरस्वत्या: प्राणैषीच्चम्पूभारतम् ।।'

'उन्मीलदम्बुजकदम्बक सौरभीणा-
मुन्नृत्यदीशमुकुटी तटिनी सखीनाम् ।
आचान्त वैरियशसाममृतोर्मिलानां
वाचामनन्तसुकवेर्वसुधैव मूल्यम् ।।'

एवमुदात्तरूपेण कृतायामपि स्वकाव्य प्रशंसायाम् नात्रमुधावलेपस्य गन्धोऽपि । सेयं प्रशस्ति सूक्तिश्च यमकानुप्रासोपमातिशयोक्तिभि: कियतीमनोहरेति सहृदयजनानामतिरोहितमेव ।

राजवर्णनं यथा- 'यशस्तिलकचम्पू' काव्ये-

'त्वं वीर ! वैरिवनितानयनेन्दुकान्त-
निष्यन्दसंपदिमतोऽसि नरेश ! राजा ।
आदित्य एव च भवानहितारुणाक्षि-
निस्तोक शोकतपनोपलदीपनेषु ।।' य० ति० पृ० २६२

अत्र एकस्मिन्नेव राज्ञि युक्त्या निबद्धमपि परस्परविरुद्धयोश्चन्द्रसूर्ययो रभेदरूपकं न हृदयग्राहि, परस्परविरुद्धयोरपि तयो रूपकं भिन्नयोराजसम्बन्धिनो र्यश: प्रतापयो निर्बद्धमभविष्यत् , तर्हिरूप्ययो रूपकयोश्चोभयोरपि परस्परविरुद्धत्वेऽपि रूप्य-रूपकयोरुभयोरपि परस्परानुरूपत्वाद् युक्तमभविष्यत् । 'नितरां स्तोकोऽल्प' इत्यर्थबोधकस्य शोकविशेषणस्य 'निस्तोक' शब्दस्य च कवे: शोकातिशयविवक्षाविपरीतत्वादनुचितार्थतैव ।

किन्तु 'भारतचम्पू' काव्ये अन्यादृशमेव स्पृहणीयं च राजवर्णनं,यथा-

'उपेत्यतां पाण्डुरुदारविक्रम: प्रजामन: पल्लवयन् प्रशासनात् ।

यशः प्रकाशैरमुना सखीसखैर्निनायलोकं निजनामवाच्यताम्।।'
'चित्रं चरित्रं जगतीतलेऽस्य न श्लाघयामास नरेषु को वा ?
स यत् स्वयं पाण्डुरपि स्वकेन गुणेन रक्तानकरोत् समस्तान् ।।'
'जग्राहनिग्राह-परः परश्रियां करैः कराग्रेण करेणुचंक्रमः ।
कुन्तीं शकुन्तीशरथो यथारमां समुद्रकाञ्चीं च समद्रकन्याम् ।।' १२।१५स्त १

अत्र यमकश्लेषवृत्त्यनुप्रासरुपमातद्गुणपर्यायोक्तविषमार्थान्तरन्यासैश्चालंकारैर्यथायुक्तमुपासैरुत्कर्षं प्रापितं राजवर्णनं कियन्मनोहारीति वेद्यमेव विदुषाम् ।

एवं यशस्तिलक- भारतचम्पूकाव्ययोः सकृत्समानविषयवर्णनविचारे प्रस्तुतेऽपि तयोः प्रतिपाद्यविषयभेदेन असकृत् तत्रत्य-समानविषयविचारस्यात्र प्रस्तोतुमशक्यत्वात् तदुपेक्ष्य तन्निगर्तगद्यपद्यनिबन्धनार्थयोजनाविषयकशक्तितारतम्यपरीक्षणं तावदुपक्रम्यते । तत्र -

'गद्यबन्धोदाहरणं यशस्तिलकचम्पूकाव्यस्यप्रथमआश्वासे यथा-

'तत्र चाऽस्ति समस्तमहीमहिलाशिखण्डमण्डनकरे पुरे सुकृतिनो हरिवंशजन्मनः प्रचण्डदोर्दण्डमण्डलीमण्डनमण्डलाग्रखण्डितारातिप्रकाण्डस्य चण्डमहासेनस्य नृपतेः सूनुः पराक्रमापहसितनृगनल- नहुषभरतभगीरथभगदत्तो मारिदत्तोनामराजा' ।

( पृ० ४२)

तस्यैव च चतुर्थाश्वासे यथा-

'कटकुटीरकैकरिकवलावशिष्टयवप्रस्तरिणि अवगुण्ठितरज्जुपुञ्जपरिकल्पितशिरस्पदेनिद्रायन्तम् इमार्म्यङ्गकपटपिहितलज्जास्थानम् अतिकठिनकचकण्टकोड्डमरमुण्डमण्डलम् असमस्थापितवराटकविकटदन्तम् अजश्मश्रुदुर्दर्शचिबुकमध्यम्' (४२पृ०)

अत्र प्रथमे गद्ये राजवर्णने अनुप्रास ओजोगुणानुरूपोऽपि मध्यविच्छिन्नत्वात् द्वितीये च हस्तिपालवर्णने सन्नपि मनागसत्कल्पत्वात् च न तादृक् चमत्कारी । द्वितीये च 'निद्रायन्तम्' इत्यत्र परस्मैपदस्य 'सुखादिभ्यः कर्तृवेदनायाम्' इति पाणिनीयानुशासनविरुद्धत्वं त्वतिरिक्तमेव ।

किन्तु 'भारतचम्पू' काव्ये मनोहरतराणि सहृदयजनाऽवर्जनानि अन्या

दृशान्येव गद्यखण्डपिण्डानि । तेषु यथैकम् -

"राजन् । पुराखलुपितामम पितामहसमानस्य निशान्तमधिवसतः कृशान्तनुलतान्तपसावहतोऽपि दिशान्तविषु निशान्तरविक्रान्तभृशान्तर्शूर्ग्रु रुचान्तर गपरम्परान्तरलयतोऽशान्तमनसोमुनेरुपान्तपरिचरणायमामनुशासितशैशवराज्यामपि नियोज्यामकरोत् ।" प्र०स्त०

अपरं च -

"अथ कदाचिदखिल हरिदन्तरनिरन्तरवलमानमलयपवमान कम्पितचम्पक स सौरभसम्पदनुकम्पितनिलिम्पपथाः, केसरकुसुमकेसर शिखरभासुरधूलीधूसरदिशः, मनसिजविजयसङ्का रचतुरसहकारपल्लवतल्लज परिचर्वणा गर्वायमाणा कलकण्ठ युवकण्ठोक्त पथिकजन सन्दोह जीवितसन्देहाः, वन देवता वदनतिलकायमानतिलका वलिकलिका पलितम्भावुकनभोविभागाः, मदनहुतभुगङ्गार सङ्काशकमलभृङ्गार मधुरसशृङ्गा रचितमदभृङ्गारवविभवतुङ्गारहितमिथुन शृङ्गाररसाः, समुन्मिषद्वासन्तिकामिषेण सीमन्तिनी खैरन्तं दुरन्तं विचिन्त्य रहसि वसन्तं नृपन्तमिव हसन्तो वसन्तोदयवासरामन्दं मन्दमरण्याङ्क घरण्याङ्कमपि विकासमापादयामासुः ।"

अत्रोभयत्राऽपि लघुनिदीर्घे च गद्ये आरम्भादन्तपर्यन्तम् यमकसंपुटिताऽनुप्रासच्छटा उपमारूपकोत्प्रेक्षासुषमा च सहृदयजनमनोहारिण्येव ।

पद्यनिबन्धनं यथा- "यशस्तिलकचम्पू" काव्ये -

"को मन्त्री नृपतेर्यशोधर इति ख्यातः सुतः, कोरणे<br>
हन्ता वैरिबलंयशोधर इति ख्यातः सुतः कः सखा ।<br>
कार्यारम्भ विधौ यशोधर इति ख्यातः सुतो यस्य मे<br>
लोकोऽप्येव मवाप्ततातविषये प्रश्नोत्तरत्वं स्थितिः ।।" २।६५।

अत्र प्रश्नोत्तरत्वेन "यशोधर इति ख्यातः सुतः" इत्यस्य त्रिर्निबन्धनमनवीकृतत्वदोषग्रस्तत्वादरुन्तुदमेव । "नृपतेः" इति पदस्य प्रथमप्रश्नान्तःपति तस्य द्वितीय-तृतीयप्रश्नाभ्यामिष्टान्वयस्याऽप्यन्वयाभावादमवन्मतसम्बन्धतैव । "यशोधरो" राज्ञः सुतः, अतः सुतविषये प्रश्नोत्तराणिनिबद्धानि, न "तातविषये," अतः "तातविषये" इति पदस्यासंगतत्वमेव । "प्रश्नोत्तरत्वं" कस्योच्यते,

इति न स्पष्टम् । अवाप इति क्रियाया 'लोक' इति कर्त्राऽन्वये जाते 'स्थितिरिति प्रथमान्तपदं क्रियासाकाङ्क्षमेव । एवमसंष्ठुलमेव पद्यमिदम् ।

किन्तु 'भारतचम्पू' काव्यस्य सर्वेऽपि पद्यबन्धाः सुष्ठुतरसंगतार्थाः प्रौढाश्चमत्कारिणश्चेति यत्र तत्र द्रष्टुं शक्यमपि अत्राऽपि प्रतियोगिप्रदर्शनपूर्तये सकृदुदाहृियते, तत्रत्य पद्यम्, यथा-

'व्यातन्वन् कुरवं गले, विरचयन् तालुन्यपां शोषणं,
वृष्टीरक्षिणि विवर्धयन्, विपुलयन् धां धार्तराष्ट्रारवैः ।
सेवायां त्वरयन् घनञ्जयगुणस्यान्तर्बहिः कम्पयन्
त्रासो मात्स्यसुतेचकार चरितं षण्णामृतूनां क्रमात् ॥' ७।२२

अत्र श्लेषातिशयोक्ति समुच्चय-रत्नावल्यलंकाराणां चमत्काराभावाभिव्यक्तिश्च कियन्मनोहरन्तीति सहृदयजन हृदयैक संवेद्यम् ।

पद्य निबन्धने सोमदेवश्छन्दो धर्ममपि ना वद्धातीत्यत्रापि निदर्शनमुपलभ्यते , यथा-

'त्रिमूलकं द्विधोत्थानं पञ्चशाखं चतुश्छदम् ।
योऽगं वेत्ति न वक्त्रायं दशभूमिं स च काव्य कृत् ॥' ३।२७४

अत्र चतुर्थचरणेवर्णस्यैकस्याऽधिकतैव ।

अर्थ निबन्धनेऽपि 'यशस्तिलकचम्पू' काव्ये क्वचिदनौचित्यं प्राप्यते। चण्डमारिदेवतायन परिसरस्य भयङ्करत्वं वर्णयन् लिखति कविस्तत्र प्रथमाश्वासे च यथा-

'क्वचित् प्रनृत्यदुत्तालतालवेतालकुलविडम्ब्यमान डाकिनी ताण्डवडम्बरम् , क्वचित् करोड्डमरडमरुकरवलयखेलत्कपालिनी त्रिशूलवल्गननिर्भिन्नद्रवदुदंसुचन्द्रामृत पानपर चकोर कामिनी कर्बुरी क्रियमाण ककुभाभोगम्---- समस्तसत्त्वसंहारायतनं देवतायतनम् ।'

अत्रप्रनृत्यदुत्तालतालवेताल डाकिनीताण्डवडमरुरवभैरवे खेलत्कपालिनी चलत्त्रिशूलवल्गनभयङ्करे समस्तसत्त्वसंहारस्थले देवतायतनपरिसरे चकोरीकुलस्य निर्भय-चन्द्रामृतपानवर्णनमनुचितमेव,तादृशप्रदेशात्तु चकोरकुलस्य तत्रापि तदीय स्त्रीजाति

समुदायस्य तु द्राङ् पलायनस्यैव संगतत्वात् । यत्र वास्तविकभीषणतायाः वर्णनं भवेत्, तत्रोदग्रचन्द्रस्य त्रिशूलनिर्भिन्नत्वस्य ततोऽमृतद्रवस्य चकोरीकुलकृततत्पानस्य चातिशयोक्त्या कृतेऽपि सम्भृत्यै तदंशस्याऽसत्यत्वप्रतिभासस्यानिवार्यत्वे वास्तविकानामितरांशानामप्यसत्यत्वप्रतिभासे सति + वर्ण्यमानदेवतायतनपरिसरभयंकरतायाः अपि न्यूनत्वापत्ते: । करालायतनशब्दयोः पुनरुक्तिरप्यरुन्तुदैव ।

यथा च राज्ञो यशोर्धस्य पलितदर्शने यशस्तिलक चम्पूकाव्यस्य द्वितीयाश्वासे ~~मतिविभवविनाशोत्पातकेतुप्रतानः~~ ।

'मतिविभवविनाशोत्पातकेतुप्रतानः
सुरतसुखसरोजच्छेदनीहारसारः ।
मदनमदविनोदानन्दकन्दावमर्द-
प्रपतदशनिदण्डाडम्बरः केश एषः ।।' (९८)

'मुक्तिश्रियः प्रणयवीक्षणजालमार्गाः
पुंसां चतुर्थपुरुषार्थतरुप्ररोहाः ।
निःश्रेयसामृतरसागमनाग्रदूताः
शुक्लाः कचा ननु तपश्चरणोपदेशाः ।।' (१०४)

अत्र प्रथमपद्ये मतिविभवविनाशचिन्तनस्य सुरतसुखनाशचिन्तनस्य परस्परविरुद्धत्वात् सहचरभिन्नत्वदोषः । सुरतसुखस्य मदनविनोदानन्दस्य चाभिन्नत्वात् पुनरुक्तार्थत्वम् । द्वितीयपद्ये च मोक्षस्य त्रिःपरामर्शः पर्यवस्यति वैरस्यायैव ।

यथा च तदीय सप्तमाश्वासे ३१ तमे भागे धात्रीभट्टिनी संवादे धात्रीवचनम् -

'चित्तं द्वयोः पुरत एव निवेदनीयं
मानाभिमानधनधन्यधियान्तरेण ।
यः प्रार्थितं न सहयत्यभियुज्यमानो
यो वा भवेन्ननु जनो मनसोऽनुकूलः ।।'

अत्र 'षट्कर्णो भिद्यते मन्त्र' इत्यभियुक्तोक्त्यनुसारं चित्तस्य तृतीयजनोपस्थितावप्रकाशनं विवक्षितम्, द्वयोः पुरतश्चित्तनिवेदनकथनेन तु निवेदयितुस्तृतीयत्वलाभे विवक्षितविपरीतार्थबोधिकैव वाक्यरचना, विवक्षितार्थबोधनाय तु 'अन्तर्द्वयोः स्वहृदयं विनिवेदनीयम्' इति पाठः स्वीक्रियेत चेत्, तर्हि निवेदयितुरपि द्वयान्तर्गतत्वप्रतीत्या विवक्षितार्थप्रतीतिनिष्पत्तिः । अथवा '- चित्तं स्वकस्यपुर एव निवेदनीयम्' इति पठ्येत चेत्, तर्हि स्वकस्य आत्मीयजनस्य आत्मनश्च मेलनेन द्वयोरेवोपस्थितिप्रतीत्या विवक्षितार्थप्रतीतिसिद्धिः ।

एवमत्रैव 'ज्ञानाभिमानधनधन्यधियानरेण चित्तं द्वयोरेवान्तःप्रकाशनीयम्' इत्युक्त्या सामान्यजनेन तु स्वचित्तं ततोन्यूनस्य अर्थादेकस्य जनस्य अधिकानां वा जनानामुपस्थितौ प्रकाशयितुं शक्यमिति प्रतीत्यापत्तिः, न चेष्टा सा, अतस्तद्वारणाय 'अप्यर्थोऽत्रावश्यं निवेशनीयतामर्हति ।

तथात्रैव 'धियो' ज्ञानाभिमानधन्यत्वमुक्तमसंगतम्, 'गर्वोऽभिमानोऽहंकारो मानश्चित्तसमुन्नतिः' इत्यमरसिंहवचनानुसारमभिमानस्य चित्तवृत्तिरूपत्वेन 'धियि' तत्कथनस्यासंगतत्वमेव । एवं 'केनापि स्वचित्तं त्रयाणां मध्ये न प्रकाशनीयम्' इति सामान्यार्थो विवक्षितः, न तु 'नरेण' इति विशेषरूपोऽर्थः, अन्यथावक्त्र्याः स्त्रियाः स्वार्थं तत्कथनस्याऽसंगतत्वापत्तेः । अतोऽत्र सामान्य एवार्थः 'केनापि' इत्यादिरूपेण वक्तव्यः । अतोऽत्र 'ज्ञानाभिमानधनधन्य हृदा सताऽपि' इति, 'ज्ञानाभिमानमणिदीप्तिमतासताऽपि' इति पाठः स्वीक्रियेत चेत्, तर्हि स्यादुक्तदोषनिवहनिरासः ।

किन्तु 'भारतचम्पू' काव्ये एतादृङ्निरर्थकशब्दसंभृतपद्यपूर्तिर्न क्वापि अवलोक्यतेत्यस्मत्कथनं तत्पाठकानां पुनरुक्तमेव भवेत्, तथापि तत्पद्यवर्णिकैकायशस्तिलकोदाहृतपद्यप्रतियोगित्वेनोदाहरणस्याऽपेक्षितत्वात्सकृदुदाह्रियते, यथा-

'शर्वर्याश्चिकुरे, मनोजशिखिनो धूमे, नभोरण्यभू-
जम्बूशाखिनि, पञ्चकाण्डजदृशामालोकसिद्धाञ्जने ।
चेले कालहलायुधस्य तमसामुज्जृम्भणे तादृशे
प्यद्रीवाऽऽहवशिल्पमद्भुततमं चक्रुर्द्वये सैनिकाः ॥'

अत्रापि 'मतिविभवे' त्यादि 'मुक्तिश्रिय' इत्यादि 'यशस्तिलक' - पद्यवन्मालारूपकमेव , किन्तु तन्नवनवकमनीयतरकल्पनाकलितं कियन्मनोहरम्, कियती चप्रौढौजस्विनी रचनेतिनतिरोहितं सहृदयानाम् ।

यशस्तिलकचम्पू' काव्यस्यावलोकनेनैतत् प्रतीयते, यत् सोमदेव: प्राचीन कविभि: प्रभावित: क्वचिच्च तत्काव्यान्यनुकुर्वाणोऽपि दृश्यते । 'वासवदत्ता' - यामिव सोमदेवेन स्वकाव्येऽपि चेटीनां तत्तन्नाम्ना संबोधनानि कार्यनिर्देशनानि च कल्पितानि सन्ति, किन्तु यादृग्वैदग्ध्यं तद्विषये 'वासवदत्तायां प्राप्यते,न तादृग् 'यशस्तिलक' काव्ये । वासवदत्तायां यथा-

'कुरङ्गिके ! कलमकुरङ्गशावकेभ्य: शष्पाङ्कुरान् ! किशोरिके । कामकिशोरप्रत्यवेक्षणम् । तरलिके । तरलयकृष्णागुरुधूमपटलम् । कर्पूरिके ! पाण्डुरय कर्पूरधूलिभि: पयोधरभारम् । मालिके ! मानय मार्तण्डशिशुयाचनाम् । शशिलेखे ! विलिखललाटपट्टे शशिलेखाम् । केतकिके ! संकेतयकेतकीमण्डपे दोहदम् । शकुनिके ! देहि क्रीडाशकुनिभ्य आहारम् । मदनमञ्जरि ! मञ्जरय सभामण्डपकदलीगृहम्। शृङ्गारमञ्जरि ! संकल्पय शृङ्गाररचनानि ।' (पृ०११०-११)

अत्र शृङ्गारमय-वातावरणानुसारं मृदुमधुराक्षरगुम्फिताश्छेकवृत्त्यनुप्रास: प्रतिवाक्यं दीप्यन्ते । स-च स्वैव चेटीनां कार्यनिर्देशनान्यपि तदनुरूपाण्येव सन्ति सर्वत्र । किन्तु 'यशस्तिलक' कारो 'वासवदत्ता' मनुकुर्वाणोऽपि तद्वैदग्ध्यं नानुकर्तुमपारयत् । यथा-

'हले व्यलीकविलासव्यसनिनि वासन्तिके ! कृतं किं तव किंवदन्तीभि:, अविलम्बं यतस्व बकुलमुकुलावली विरचनेषु । अङ्ग निरर्गलगते लवङ्गि !-मागा: सखिभि: सह संगम् , अकालक्षेपं दत्स्व नागवल्लिप्रदानेषु । अयि प्रमादिनि मदने । किमद्यापि निद्रायसि , त्वमाद्रिय स्वारतीय प्रगुणतायाम् । अयि कुरङ्गि ! किमकाण्डमितस्ततो हिण्डसे, अचिरायत्स्व देवस्याङ्गरागसम्पादनेषु ।' (२।३४६-३५२)

अत्र शृङ्गारमयेऽपि प्रसङ्गे व्य-र्ग-त्त-घ-द्र-ण्ड-प्र- प्रभृतीनि संयुक्तपरुषाक्षराणितदनुप्रासनिबन्धनानि च न चमत्कुर्वन्ति । चेटीजनोऽपि राजगृहोचितो

न निपुणः स्वानुरूपकार्यतत्परत्वादर्शरूपश्च प्रतीयते, अपि तु ततो बहिष्कार्य - एव प्रतिभाति । येन तद्व्यवहारस्य विनेयजनशिक्षाणाननुरूपत्वात् कवेस्तत्कल्पना यास्तन्निबन्धनस्य च प्रयुक्तः विफल व जातोऽवलोक्यते ।

अपरं च- 'कृतं-किल्व' अनयोरेकतरनिबन्धनेनैवेष्टसिद्धेरन्यतरनिबन्धनं निरर्थकमन्धिकं च । 'निद्रायसि, आद्रिये' इत्यत्र परस्मैपदमप्यशिष्टम् , 'सुखादिभ्यः कर्तृ वेदनायाम्' इत्यनुशासनेन 'दृङ् आदरे' इति धातुपाठे पठितत्वेन चतस्यविरुद्धत्वात् । अंग अत्र सम्बोधनैकवचनमप्यशिष्टम् , 'अथ सम्बोधनार्थकाः स्युःस्न स्यात् पाङ्ग हे है भोः' इत्यमरकोशीयाव्ययपाठविरुद्धत्वात् । हले अत्रापि- सम्बोधनैकवचनमशिष्टम्, 'हण्डे अंगे हला ऽऽह्वाने नीचां चेटीं सखीं प्रति' इति तदुक्तकोषविरुद्धत्वात् । एवं भाषासम्बन्धिदोषजालजनितं वैरस्यं तत्र पृथगेव।

किन्तु 'भारतचम्पू' काव्यस्य गद्यानि सर्वथा मौलिकानि , निर्दोषाणि वैदग्ध्यपूर्णानि चेत्यसकृदावेदितमपि प्रसङ्गानुसारं पुनरपि सकृदुदाह्रियते ।यथा-

'ततस्ते वन्याशने धन्या धारितवल्कलाजलाशनादःकृतयः प्रावृषमिव वकबलाक्रान्तां पातालभुवमिवप्रत्यहं प्रवर्धमानबलिशोकामङ्गराज्यसीमामिव सूर्यतनयानुकूलप्रतिष्ठां रविरथामाधुरमिवैकचक्रां पुरीं क्रमादाक्रम्य कस्यचिद् गृहमेधिनो गृहमध्यमेत्य सुखमध्यवात्सुः ।' (द्वि०स्त०पृ०५८)

अत्र यमकसंपुटितानुप्रासश्लेषोपमापुष्पमाचमत्कारः परैरनाविष्कृतपूर्वः सुस्फुट एव ।

'यशस्तिलकचम्पू' काव्यस्य यदिसम्पूर्णस्याऽऽलोचना विधीयेत, तर्हि दोषनिदर्शनेनैव तावदाकारः परोनिबन्धः प्रकटोभवेत्, न च तदपेक्षितम् ।- किन्तु एतावता दिग्दर्शनेन एतत् सिध्यत्येव, यत् - सोमदेवो यावद्दम्भं प्रकटीचकार, न तावत् सफलीबभूव 'यशस्तिलकचम्पू' काव्यनिर्माणे । तद्विरुद्धमनन्तकविर्मनागप्यवलेपमस्पृशन्नपि प्रापकवित्वे पूर्णतया साफल्यम् , निबन्धुं पारयामास च मौलिकं प्रतिपदमनोहरं च स्वकाव्यनिबन्धम् । इत्यलं विस्तरेण ।

## (३) भारतचम्पूकाव्यस्यजीवन्धरचम्पूकाव्येन तुलना

जीवन्धरचम्पूकारस्य हरिश्चन्द्रस्य समयः सुधीभिरैतिहासिकैः ईशवीय नवमशताब्दीतः एकादशशताब्दीपर्यन्तः (१)स्वीक्रियते, येन ईशवीयैकादशशताब्दी वर्तमानात् भारत- भारतचम्पूकारात् तस्य प्राक्तनत्वं कदाचित् स्यादिति संभाव्यते । येन जीवन्धरचम्पूकाव्येन भारतचम्पूकारावलोकितत्वसंभावनाविषयीभूतेन भारतचम्पूकाव्यस्य प्रभावितत्वमप्रभावितत्वं वेति विचारस्य प्राप्तावसरत्वात् तद्विचारस्तावत् प्रस्तूयते सम्प्रति ।

नगरीवर्णनं यथा- जीवन्धरचम्पूकाव्ये प्रथमलम्भे -

'तत्रास्ति राजनगरी जगति प्रसिद्धा
यत्सालनीलमणिदीधितिमग्नमार्गः ।
राहुभ्रमेण विवशस्तरणिः सहस्त्रैः
पादैर्युतोऽपि न हि लङ्घयितुम्समर्थः ।।' १३

एवं षड्भिः श्लोकैः नगर्यानीलमणि-माणिक्य-हरिन्मणि-चन्द्रकान्त गारुत्मत-वैडूर्यमणिनिर्मितत्वं- भ्रान्त्युत्प्रेक्षाविरोधाभासादिभिरलंकारैर्निबद्धम् । तथा -

'यस्यामनर्घ्यनृपमन्दिर-देहलीषु
गारुत्मतैर्मृगगणाः बहुवञ्चिताः प्राक् ।
दृष्ट्वाऽपि कोमलतृणानि न संस्पृशन्ति
स्त्रीमन्दहासधवलानि चरन्ति तानि ।।' १७

---

१ पाण्डेयव्यासकृत 'संस्कृतसाहित्यकी रूपरेखा' ग्रन्थपृष्ठे ४०५ मिते ईशवीयनवम मशताब्दी, बलदेवोपाध्यायकृत 'संस्कृत साहित्य का इतिहास' ग्रन्थपृष्ठे- २६१ मिते ईशवीयैकादशताब्दी च हरिश्चन्द्रस्य समयोऽङ्कितः, अतस्तन्मध्य पतनपाती समयः छविनाथत्रिपाठिना 'चम्पूकाव्य का आलोचनात्मक एवं ऐति

'उदग्रहर्म्यावलिमाश्रितानां यत्राङ्गनानां नयनोत्पलश्रीः ।
गङ्गां सखीं स्वामवलोकितुं द्राक् स्वर्गंगतासूर्यसुतेव भाति ।।' १८

'यत्प्रासादपरम्पराप्रतिफलद्देवाङ्गनास्वङ्गना-
भेदं दृष्टिनिमेषकौशलवशाज्जानाति यूनां ततिः ।
यद्वैडूर्यशिरोगृहस्थ सुदतीवक्त्रेन्दुबिम्बं विधो-
र्बिम्बं चैव समीक्ष्य संशयमगात् स्वर्भानुरम्राजिरे ।।' १६

एवं त्रिभिः श्लोकैः तत्रत्याङ्गनानां मन्दहास नयनमुखशोभाया उल्लेखो-व्यधीयत । अन्तिमेन च पद्येन नगरीसौधावलोकनजन्य देवेन्द्रनिर्निमेषादिन्यवध्यत ।

भारतचम्पूकाव्ये च राजनगरीवर्णनं यथा- प्रथमस्तबके -

'तुहिनकिरणवंशैस्थूलमुक्ताफलानां
विपुलगुणविराजद्वीरलक्ष्मीविभूम्नाम् ।
हसितसुरपुरश्रीरस्ति सा हस्तिनाख्या
रिपुजनदुरवापा राजधानीकुरूणाम् ।।' २

एवं रूपकव्यतिरेकरसवदनुप्रासैः कुरुनगरीमुल्लिख्य तत्रत्य सौधानामुन्नतत्वं चन्द्राश्मादिमणिनिर्मितत्वं शोभावैभवसम्पन्नत्वं च चतुर्भिःश्लोकैः उदात्तापह्नुतिरूपकानुमानोत्प्रेक्षातिशयोक्तिभिः सुन्दरतया वर्णयित्वा -

'वक्त्रं विलासमणिदर्पणधार्यमाणं
बाला हिमांशुरयमित्यवधार्य यस्याम् ।
आदर्शबिम्बधृतिरश्रुतदृष्टपूर्वा
तस्येति तादृशधियं विनिवर्तयन्ति ।।' ७

'आलापकालसमपल्लविताङ्कवीणा-
सौरम्यपातिमधुपारवसंकुलस्य ।
तन्त्रीस्वनस्य समितौ तरुणीस्वनस्य

---

हासिक अध्ययन' ग्रन्थे स्वीये स्वीकृतः ।

जानाति यत्र चतुरोऽपि न तारतम्यम् ।।' ८

'शालीनतामविगणय्य सखीसमाजे
पश्चात्कृतस्य कमितुः प्रणयप्रकोपात् ।
मुग्धाः समीक्ष्य मुकुरायितरत्नभित्तौ
छायां चणादनुनयं शमयन्ति यस्याम् ।। ९

'चित्रं दिदर्शयिषुणा जनितस्य यस्यां
मध्यं विनैव विधिना महिलाजनस्य ।
स्तुत्यं नितम्बजघनादि यतो यतोऽध-
स्तुङ्गं कुचावुपरि याति ततोऽनुकूलम् ।।' १०

'पङ्केरुहाणि परिखामवतीर्य यस्यां
प्राकारभित्तिमभितः परिवेष्टयन्ति ।
अन्तःस्थितिं विदधतामबलाजनाना-
मास्यानिजेतुमखिलानि किलात्मभासा ।।' ११

एवं स्त्रीणां मुखशोभा-स्वरमाधुर्य-मान-मध्यभागनितम्बजघनवर्णनं - प्राकारस्य च वर्णनं भ्रान्ति-सामान्योदात्तानुमानोत्प्रेक्षा-परिकरकाव्यलिङ्गाति शयोक्तिरसवदलंकारैः सुरुचिरध्वनिमिश्रललितमधुरैरनुप्रासैः सरसतया च कियत् मनोहारि वैदग्ध्यपरिपूर्णं चेति सहृदयहृदयैकसंवेद्यम् ।

जीवन्धरचम्पूकारो कादम्बरीकारस्सुधर्मनि इव प्राचुर्येण उपमाप्रतिसंख्याविरोधाभासान् निगुम्फयन् मुधाविस्तरंसंगतिं चापि नाकलयति, तर्हि भारतचम्पूकारो यावदपेक्षितं संक्षिप्तमेव लिखन् चमत्करोतितरां सुमनसोजनमनांसि यथा-

~~यथा~~ जीवन्धरचम्पूकारो प्रथमलम्भे राजवर्णनं कुर्वन्- श्लिष्टोपमाः संगृह्णन् लिखति, यत् 'अन्तक इव महिषीसमधिष्ठितः' । विचार्यतां विचक्षणैर्यत् राज्ञो महिषीसमधिष्ठितत्वस्य सांगत्येऽपि अन्तकस्य महिषीसमधिष्ठितत्वं कियत् संगतम् ?

एवं तत्कीर्तिवर्णने तस्याब्धिः शुभ्रत्वं प्रकटयति यथा-

'यस्यकीर्तिः प्रत्यर्थिभिः सह दिगन्तमवापशुभ्रा ।।' २१

यथा च-

'कीर्तिर्यस्यदिगङ्गनाकुचतटीपाटीरसंवादिनी ।।' २२

अत्र एकस्यैव वस्तुनो द्विराम्रेडनेऽपि सहोक्तिमुपमां च त्यक्त्वा नाऽन्या कापि विच्छित्तिः । दिगङ्गनाकुचतट्याः सिद्धत्वं यदि भवेत् , तदा तत्र पाटीरसंभवस्तेनान्विकीर्त्यां उपमितिःसंगता स्यात् । किन्तु यदा तस्याः सत्वैवनास्ति तदा तत्र पाटीरनिर्देशः सिद्धवान्निर्दिष्टतदुपमानता निरूपितं कीर्त्या उपमेयत्वं चाऽसंगतमेव । आम्, यदि 'पाटीरसम्पादिनी' इति पाठो भवेत् , तर्हि दिशि अङ्गनाऽभेदे आरोप्यमाणे कल्प्यमानायां च तत्कुचतट्यां कीर्त्याः स्वेन पाटीरकृत्यसम्पादनमपि युज्यते, किन्तु तथा पाठस्याभावात् तादृक् संगतिः खपुष्पायितैव । एवं पृष्ठत्रयमितविस्तरेण कुर्वन्नपि राजवर्णनं जीवन्धरचम्पूकारो न तावत् प्रभवति सुमनोजनमनोहरणाय ।

किन्तु भारतचम्पूकारो राजवर्णने -

'उपेत्यतांपाण्डुरुदारविक्रमः प्रजामनःपल्लवयन् प्रशासनात् ।
यशः प्रकाशैर्यमुनासखीसखैर्निनायलोकं निजनामवाच्यताम् ।।' १।१२

एवं उपमा तद्गुणपर्यायोक्तालंकारैः सुरुचिरपदविन्यासैश्च पराक्रमनीतिनैपुण्यजन्ययशोवर्णने कियत् कौशलमुद्भावयन्तीति सुधीजनसंवेद्यम् ।

अग्रे च -

'चित्रं चरित्रं जगतीतलेस्य नश्लाघयामास नरेषु को वा ।
स यत् स्वयं पाण्डुरपिस्वकेन गुणेन रक्तानकरोत् समस्तान् ।।' १।१३

एवं विषमार्थान्तरन्यासाभ्यां लोकोत्तरचरितत्वंराज्ञः संदिश्य वर्णयन् कियत्कौशलमाविष्कृतवान् कविरिति सहृदयैराकलनीयम् ।

ततश्च -

'अन्तर्भवत्कृष्णमृगाजिनाङ्केषु निर्मलैः पाण्डुदानकीर्तेः ।
खण्डैरमुष्येन्दुरकारिधात्रा मृषाऽयमब्धेरजनीतिवार्ता ।।' १।१४

एवं राज्ञोदानवीरताजन्ययशोवर्णनेऽपि वैचित्र्यमुद्भावयन् स्वकीयं नैपु

र्ण्यमेवोद्भावयति कविः ।

"जग्राहनिग्राहपरः परश्रियां करैः कराग्रेणकरेणुचङ्क्रमः ।
कुन्तीं शकुन्तीशरथोयथारमां समुद्रकाञ्चीं च स मद्रकन्याम् ॥" १।१५

एवं यमकैः श्लेषानुप्रासैरुपमया चानुपमयारुचिरतया कविना राज्ञो राजन्यकुलवशीकारः सार्वभौमत्वं पत्नीद्वयोद्वाहश्च कियता संक्षेपेण नैपुण्येन चाऽवर्ण्यतेति विज्ञेयं विपश्चिताम् ।

वसन्तवर्णनं यथा- जीवन्धरचम्पूकाव्ये चतुर्थलम्भे-

"अयं जीवन्धरोवीरो रेमेगन्धर्वदत्तया ।
समं भोगं यथा योग्यं संसारविषयोद्भवम् ॥ ?

"ततः समागतःकालः वसन्तसमयाभिधः ।
वनं वृक्षलताव्याप्तं जननेत्रसुखावहम् ॥

"माकन्दद्रुममञ्जरीमधुकरीसंसक्तमाध्वीलिहां
झङ्कारैः पिकमञ्जुगानकलितैर्मारोत्सवाशंसिनः ।
प्राप्ताः केचन वासराः कुरबकप्रोन्मीलितैः कोरकै
र्दन्ताभैर्विहसन्मुखा विरहिणां मर्मच्छिदा कर्मठाः ॥"

"तदानीं जगज्जयोद्युक्त पञ्चबाणप्रयाणसूचकश्लिष्टदूष्यनिलयनिकाशपल्लवितशोकपेशलं सुवर्णशृङ्खलसंनद्धवनदेवताश्रित पेटिकायमान रसालपल्लवसमासीन कोकिल कुलं तरुणाजनहृदयविदारणदारुणाकुसुमबाण नखरायमाण किंशुककुसुमसंकुलं मदननरपालकनकदण्डायित केसरकुसुमभासुरं विलीनशिलीमुखजराजीरुशरधिसरूपपाटलं वियोगिजन स्वान्तनितान्तकुन्तनं कुन्तायितं केतकदन्तुरितं वनमजायत ।"

"मार्गे मार्गे माधवीमानिनीभिः सूनाचाभिर्मानितो वातपोतः ।
भृङ्गस्त्रीणां गीतसक्तं कुसुमारुह्याऽसावाववौ मन्दमन्दम् ॥" २

यथा च भारतचम्पूकाव्ये- प्रथमस्तबके-

"अथ कदाचिदखिल हरिदन्तरनिरन्तरवलमानम्पवमानकम्पितचम्पकसौरभसंपदनुकम्पितनिलिम्पपथाः केसरकुसुमकेसरशिखरभासुरधूलीधूसरदिशो मनसिजविजयसहकारचतुरसहकारपल्लवतल्लजपरिचर्वणगवायमाणमुख- कलकण्ठयुवकण्ठोक्तपथिकज

नसन्दोहजीवितसन्देहावनदेवतानतिलकायमानतिलकावलिकलिकाप्रियमाबुकनमोविभागामदनहुतभुग्भृङ्गारसदृशकमलभृङ्गारमधुरससंभृङ्गारचितमदभृङ्गारवविभवर्तुङ्गारहितमिथुनशृङ्गाररसाः समुन्मिषद्वसन्तिकामिषेण सीमन्तिनीरतेरन्तं दुरन्तं विचिन्त्य रहसि वसन्तं नृपं तमिव हसन्तो वसन्तोदयवासरा मन्दमन्दमरण्याकधरण्यां कमपि विकासमापादयामासुः ।।'

'किंशुकस्य वदनेऽरुणिरत्वं किंशुकस्य हृदयेऽपि वशित्वम् ।
किंशुकस्य कुसुमेषु नदन्ती शंसतिस्म मधुपालिरितीव ।।' ६८
'कुरबकेरतकेलिभृतः सुधासमधुरं मधुरं मधु षट्पदाः ।
पपुरवापुरवार्यमपि स्मयं नृपवनेपवनेरितपादपे ।।' ६६

अत्र वसन्तवर्णने चम्पूकारयोर्द्वयोरपि गद्यपद्यनिबन्धननैपुण्ये वर्णनसाफल्यसाकल्ये चमत्कारसारसंभरणे च कियत्तारतम्यमिति एकत्रैव स्पष्टी भवति । यदि जीवन्धरचम्पूकाव्ये गद्यपद्यबन्धः मनागनुप्रासे क्वचित् क्वचिदुपमायां रूपके च सत्यपि न तादृक् चमत्कारी, वर्णने च न कापि विचित्रता, तर्हि भारतचम्पूकाव्ये गद्यपद्यबन्धः अतीव प्रौढः, अनुप्रासयमकालंकारचमत्कारभासुरः, उपमारूपकापह्नुत्युत्प्रेक्षातिशयोक्तिव्यतिरेकाद्यौपालंकृतिचमत्कृतिरमणीयः सुमनोजनमनोहरणे कियत् कौशलमुद्भावयतीति सुधीजनसंवेद्यम् । जीवन्धरचम्पूकाव्यस्य प्रारम्भिकपद्यद्वयं तु पौराणिकवत् सदपि न्यूनपदत्वपुनरुक्तार्थत्वदोषग्रस्तमपीत्यन्यत् यौगपदस्य क्रियासाकांक्षत्वात् कालसमयशब्दयोश्चाभिन्नार्थकत्वात् ।

जलक्रीडावर्णनं यथा जीवन्धरचम्पूकाव्ये चतुर्थलम्भे-

'---पुरतरुणीषु दयितैः समं सरितमवगाह्य जलक्रीडाभातन्वतीषु--
'कश्चिदम्भसि विकूणितेक्षणां हैमयन्त्रविगलज्जलैर्मुहुः ।
कामिनीमुखमसिञ्चदञ्जसा चन्द्रबिम्बमिव द्रष्टुमागतम् ।।' १७
'काचनचपलजडापहृतदुकूलपट्टे रुचिविजितस्फटिकपट्टे घनजघनफलके नखरर्दातिव्याजेन मकरकेतनस्य जगज्जयप्रशस्तिवर्णावलिमिव बिभ्राणा, करनिपीडनोद्गीर्णरक्तिमधारामिव विद्रुमयन्त्रनिर्गलत्पयोधारां शयकान्तिसंक्रान्तरक्तवर्णतया कुसुमरसानुकारिणीं प्रियलपनतले सहर्षं ववर्ष ।'

"ददती कुचकुड्मलाग्रभारावरुणा: कश्चिदसिञ्चदम्बुभि: ।
हृदयस्थलजातरागकल्पद्रुमवृद्ध्यै किमु कामुक: परम् ।।" १८

"अन्या काचिद्वल्लभं वञ्चयित्वा सख्या साकं वारिमग्ना मुहूर्तम् ।
तस्या गात्रामोदलोभाद् भ्रमद्भिर्भृङ्गैर्ज्ञाता साऽमुनाऽऽलिङ्गिता च ।। १९

"सरोजिनीमध्यविराजमानां काचिन्मृगाक्षीं कमनीयरूपा ।
वनोजकोशा मृदुबाहुनालानालक्षिता वक्त्रायतफुल्लपद्मा ।।" २०

"च्युतै: प्रसूनैर्घनकेशबन्धात् मृगीदृशां तारकिते जलेऽस्मिन् ।
निरीक्ष्यमाणं तरुणैश्चकोरै: कस्याश्चिदास्यं शशभृद्बभूव ।।" २१

"एवं जलक्रीडापरायणेषु पुरतरुणेषु-"

एवं जीवन्धरचम्पूकाव्ये पौराणां जलक्रीडावर्णिताऽस्ति, किन्तु पौरेषु वर्णिता जलकेलि: शृङ्गारचेष्टाश्च कियदौचित्यमावहन्तीति सुधीभिराकलनीयम्, तद्वर्णनं तु रामादिषूत्तमप्रकृतिष्वेव कृतं शोभते, रसपोषणाय च कल्पते, न तु पौरेषु सामान्यजनेषु, तेषु तु सदाचारपथानुसरणादिकमेव निबद्धमौचित्यावहं भवति । यथोक्तं ध्वन्यालोके- "औचित्यातिक्रमणेनतरां दोष:" इति (३३२पृ०)

"अनौचित्यादृतेनाऽन्यद्रसभङ्गस्य कारणम् ।
औचित्योपनिबन्धस्तु रसस्योपनिषत्परा ।। इति च (३३१पृ०)

← औचित्यातिक्रमणेन कृते वर्णिते काव्यं "रामादिवत्प्रवर्तितव्यं न रावणादिवत्" इत्युपदेशेनपर्यवस्येत् । अतो यथोचितस्यैव वर्णनस्य काव्ये निवेशो-युक्त: ।

अत्रानुप्रासोपमोत्प्रेक्षादिष्वलंकारेषु सत्स्वपि पदद-धाराशब्दयो: पुनरुक्ति:, हर्षभावस्य स्वशब्दवाच्यता, पयोधारायां रक्तिमधारोत्प्रेक्षाया उत्थापकहेतो: कुङ्कुमरसानुकारित्वस्य उत्प्रेक्षाविषयात् पूर्वानुपात्तता च वैरस्यायैव सम्पद्यन्ते ।

जलकेलिरता काचित् स्त्री वल्लभं वञ्चयित्वा सख्या सह वारिमग्ना भवतीतिवृत्तं निबद्धं कियद्रसपरिपोषायकल्पत इति सहृदयैर्विभावनीयम् ।

सरोजिनीमध्यगतेतिपद्ये-पद्मविशेषणात्वेनोपात्तस्य आयतशब्दस्य कि

यत्संगत्यमित्यालोचनीयं विचक्षणैः, 'सुदूरं दीर्घमायतम्' इत्यमरवचनानुसारं-नितरां लम्बत्व बोधक आयतशब्दः फुल्लपद्मे तद्द्वारा मुखे चान्वितोऽसंगत एव-भाति ।

ततो 'जले कबरीच्युतकुसुमतारकिते कस्याश्चिन्मुखं शशभृद्बभूवे' इति कथने मुखस्यशशभृद्भवने तरुणचकोरैर्निरीक्षणस्य हेतुतयोपादानं चेत्, तर्हि तन्न संगतम्, तरुणनिरीक्षणरूपहेतोर्मुखशशभृद्भवनरूपकार्यनिष्पादने सामर्थ्याभावात् । यदि 'तरुणजनस्पृहाविषयतया तरुणीमुखं शशभृद् भवतिस्मे' ति तात्पर्यम् । तर्हि तद्बोधनाय 'निरीक्ष्यमाणं तरुणव्रजाय कस्याश्चिदास्यं शशभृदबभूवे' ति पाठं परिकल्प्य तरुणव्रजेत्युत्तरं तादर्थ्यचतुर्थी योजनीया, तथैव तरुणगणस्पृहाविषयस्य तरुणीमुखस्य शशभृद्रूपतया प्रतीतेः परिणतिःस्फुटास्यात् । एवं सत्यपि 'कस्याश्चिदास्यं शशभृद् बभूवे' ति पाठोऽपि भाति जाङ्गुलिकस्येव,-शशभृद्रूपकेणाऽलंकृतस्यापि मुखस्य चमत्कारित्वेनाऽप्रतीतेः, तादृश प्रतीत्युत्पादनार्थं तु 'कस्याश्चिदास्यं विधुवद् व्यभासीत्' इति 'शशीव भातिस्म मुखं तरुण्याः' इति वा पाठो युक्तः ।

एवं पौरजनगतत्वेन निबद्धस्यापि जलविहारस्य वर्णनं नातिरमणीयम् ।

भारतचम्पूकारस्य जलविहारवर्णनं यथा- तस्य तृतीयस्तबके-

'शनैःशनैस्तासु सरितमवगाहमानासु कासांचिदीर्ष्ययैव नितम्बबिम्बानि-निजावकाशादानावलम्बितोन्नतिभिरम्बुभिः पुलिनानिनिन्वोलयाम्बभूवुः, अपरा सामभ्युदयभवनाभिकुहराणिजलघूर्णनात् आवर्तजवावलेपमेवालुम्पन्, इतरासां क्रुधेव कुचकलशाः क्षोभणात् कनककोकनदमकोशात् विदलयाम्बभूवुः ॥

'वक्षोजकुम्भनिवहाद् वनिता जनानां
श्रीष्मर्तुना विनिहितं ग्रहराजपुत्री ।
तापं पितुः स्वमहरत्तरलोर्मिहस्ते-
रन्यं न याति हि विभूतिरपत्यभाजाम् ।।' ६४

'सुरनायकानुजमनो वशीकृतो
सुदृशो मुखैर्निपुणतां यथा ययुः ।

सरसीरुहैर्न नलिनीलतास्तथा

सकलान्यमूनि विकचानि तानि यत्र ।। ९५

" यमस्वसुः संनिधिमित्यरात्री स्वकान्तिचोरं सुदृशामुरोजः ।
नालाग्रशूले नलिनं निवेश्य ववल्गुहर्षादिव वारिमध्ये ।।" ९६

" व्यात्युक्षिकायां विपुलेक्षणासु वर्षन्निखद्योतवलदाममम्भः ।
सखीमुदारां सुतिरस्तु तस्याः करोद्भ्यसावीदिव कंसहन्तुः ।। ९७"

" उल्लासभाजा हरिणाप्रियायाः कल्हारमाल्ये कलिते कबर्याम् ।
सत्रीरसूयाहसितैश्च चित्रमुत्तसितं वक्त्रमभूत्सपत्न्याः ।।" ९८

" गलहं निमग्नग्रहणेऽशु कल्पयन्स्वयं ग्रहलिप्सुखं यदूद्वहः ।
सवर्णविषमां सलिले तडिद्विनूः सुखादगृह्णात्सुदृशस्तु तान् तम् ।।" ९९

" फूत्कृतैः क्वचिदधःस्थितिचिह्नं बुद्बुदं हरिरुदस्य निमग्नः ।
वञ्चयन् प्रतिवधूं क्वचिदूरुस्तम्भमम्बुषु चुचुम्बवराङ्ग्याः ।।" १००

अत्र ललितैरनुप्रासैरुचिरोत्प्रेक्षाऽर्थान्तरन्यासश्लेषव्यतिरेकमीलितोपमारूपकालंकारैः हर्षासूयौत्सुक्यादिभावध्वनिपोषितेन शृङ्गारेण च सरसतामापादितं जलकेलिवर्णनं कियन्मनोहारीति सहृदयैराकलनीयम् ।

विश्लेषणेनैतेन जीवन्धरचम्पूकारस्य भारतचम्पूकारस्य च गद्यपद्यनिबन्धननैपुण्ये विषयवैशद्यवर्णनवैदग्ध्ये रसभावाभिव्यञ्जनसामर्थ्ये वर्णनानुकूलशब्दार्थालंकारसंयोजने भाषाप्रौढौ च कियत् तारतम्यमिति स्फुटीभवतीत्यलं पल्लवितेन ।

## (४) भारतचम्पूकाव्यस्य रामायणचम्पूकाव्येन तुलना

रामायणचम्पूकारो महाराजो भोजदेवः ई० १०१८तः१०६० वत्सरावधि के समये(१) विद्यमान आसीत् । तस्य भारतचम्पूकारस्य च चम्पूकाव्यद्वयस्याधिक-

---

१ चम्पूकाव्यों का ऐतिहासिक एवं आलोचनात्मक अध्ययन पृष्ठे १०८

चित् साम्यं दृग्गोचरीभवति, यतो हि रामायणचम्पूकार इव भारतचम्पूकारोऽपि रामचरितस्येव अतिविस्तृतस्य महाभारतीयकथानकस्य संक्षिप्य वर्णने प्रवृत्तः, रामायणचम्प्वामिव भारतचम्प्वामपि गद्यापेक्षया पद्यानां प्रयोगमधिकतयाऽरीचयत्, रामायणचम्पूकारस्येव च भारतचम्पूकारस्यापि भाषायां प्रवाहस्य सत्त्वेऽपि च यमकेषु श्लेषेषु च प्रसादगुणपरिपूर्णतायाः प्रारम्भादन्तपर्यन्तं सम्यङ्निर्वाहः कृतोऽवलोक्यते, भोजदेवेनेव अनन्तभट्टेनापि ग्रन्थारम्भे भगवतो गणनायकवन्दनयैव च मङ्गलाचरणं व्यधीयत । एवं सत्यपि 'मुण्डे मुण्डे मतिर्भिन्ना तुण्डे तुण्डे सरस्वती' ति लोकोक्त्यनुसारं यदि द्वयोरनयोः रुचिभेदः प्रतिभापरिपाक विजृम्भण चमत्कारविशेषश्चयदि प्राप्यते, तर्हि तन्नाऽऽश्चर्याय । रामायणचम्पूकारो यदि हेमन्तवर्षादिवर्णने स्वीकरोति विस्तरम्, तर्हि भारतचम्पूकारो यावदपेक्षितं वसन्तवर्णने विस्तरं वर्षर्तुवर्णने च संक्षेपमेवोरीकरोति। द्वयोरनयो रचनासु सत्यपि चमत्कारे तारतम्यमप्यस्त्येवेत्यधस्तादुपन्यस्तैरुदाहरणैः स्फुटीभवेद । अनुप्रासो यथा- रामायणचम्प्वाम् -

'अथ कदाचिदुपचीयमानमनोभववैभवपाककपिशकलममञ्जरीपुञ्जपिञ्जरीभूतकेदारप्रपञ्च- पञ्चबाणरणप्रयाणोचितवीरपाणवत् पञ्चपुटपात्र- दृश्यावश्याय बिन्दुसन्दोहश्चन्द्रातपनिकरानन्दतांचन्दनानुलेपने निर्लोलुपतां चन्द्रशालायां निराशतां चन्द्रोपलस्थले निरास्थतां वातायनसेवने निरुत्सुकतां वापीकूपोपकण्ठे निरुत्कण्ठतां वासरावसानेऽनादरताम् ।।' (रा०च०अरण्य०पृ० १७०)

यथा च भारतचम्पूकाव्ये-

'अथ कदाचिदखिलहरिदन्तरनिरन्तरवलमानमलयपवमानकम्पितचम्पकसंपादित सौरभसम्पदनुकम्पितनिखिलनिलिम्पपथाः केसरकुसुमकेसरशिखरभासुरधूलीधूसरदिशो मनसिज विजय लहकारचतुरसहकारपल्लवतल्लजपरिचर्वणगर्वायमाण कलकण्ठयुवकण्ठोक्त पथिकजनसन्दोहजीवितसन्देहा वनदेवता वदनतिलकायमानतिलकाकलिकावलिकलिकापलिलम्भातुकनभोविभागा मदनहुतभुगङ्गारसदृशकमलभृङ्गारमधुरससङ्गारचितमदभृङ्गारवविभवतुङ्गारहितमिथुन शृङ्गाररसाः समुन्मिषन्नासन्तिकामिषेण सीमन्तिनी रतेरुदर्कांदुरन्तं विविच्य रहसिवसन्तं नृपं तमिव हसन्तो वसन्तोद्यवासरा

मन्दं मन्दमरण्यां किंकरण्यांकमपिविकासमापादयामासुः । भा०च०स्त०१पृ०३०)

अत्र द्वयोरनयोःशब्दालंकारच्छटातारतम्यं सहृदयैकसंवेद्यम्। चम्पूरामायणग्रंथेप्रारम्भतः प्रवृत्तोऽनुप्रासनिबन्धनप्रयासः पश्चात् शिथिलीभूत इवावलोक्यते, किन्तु चम्पूभारतग्रंथे विस्तृतेऽपि प्रारम्भादन्तावधिकाप्यनुप्रासबन्धस्य प्रौढिःसातिशयिता चमत्कृतिः यमकानां मध्ये मध्ये मिश्रणस्य आद्यन्तयोः सम्पुटस्य च विच्छित्तिः रूपकोपमापह्नुत्युत्प्रेक्षातिशयोक्तिलक्षणामूलध्वनीनां सुषमा च समुल्लसन्ती विलोक्यते ।

अन्त्यानुप्रासो यथा रामायणचम्पूकाव्ये-

" तपनपवनयोर्यः प्राप्तवान् पुत्रभावं
शतमखकृतपालिर्विंध्यजन्मना च ।
स तु दशमुखकीर्तिस्तोमसोमस्य पञ्च-
स्वरम इव तनूमान् प्राप रामं हनूमान् ।।" च०रा०कि०पृ० २१०

यथा च भारतचम्पूकाव्ये-

" गात्रं केवलमशेषगुणोपलाल्यं
गोत्रं च तत्र भवतः कुमुदैकबन्धोः ।
आपाण्डु वर्तत इति स्फुटमेव मन्ये
यस्मात् प्रजां न लभसे यदुवीरकन्ये ।।" भा०च०प्र०स्त०३२पृ०

अत्र रामायणचम्पूकाव्येरूपकोत्प्रेक्षा यथासंख्यालंकारैः सहान्तिमचरणयत्योरन्त्यानुप्रासः,भारतचम्पूकाव्ये च पाण्डुशब्दगतश्लेषमूलाभेदातिशयोक्त्यनुप्राणिततुल्ययोगितालंकारेण यमकेन च सह वर्तमानोऽन्त्यानुप्रासः कामपि विच्छित्तिं जनयतः । किन्तु चम्पूभारतीय पद्ये तस्य दीर्घान्तित्वात् स्वरलहरीवृद्ध्या तच्चमत्कारः सहृदयैकसंवेद्यः, सहैव तत्र विषादध्वनिचमत्कारस्तु पृथगुदीप्यत एव ।

यमकयोजना यथा- रामायणचम्पूकाव्ये -

" एनां पुराणनगरीं नगरीति सालां
सालाभिरामभुजनिर्जितयक्षराजः ।
हेलाभिभूतजगतां रजनीचराणां

राजाचिरादवति रावणनामधेयः ।।' बा०का० १६

' यातुः पदवी सैषा मा तनुश्चास्य लक्ष्मण ।

यातु कामं तथैवेदं यातुकामं न हन्यताम् ।।' अरण्य ४

यथा च भारतचम्पूकाव्ये-

' किंशुकस्य वदने रुचिरत्वं किंशुकस्य हृदयेऽपि वाशित्वम् ।

किंशुकस्य कुसुमेषु नदन्ती शंसतिस्म मधुपालिरितीव ।

कुरबकैरवकेलिभृतः सुधासुमधुरं मधुरं मधु षट्पदाः ।

पपुरवापुरवार्यमपि स्मयं नृपवने पवनेरितपादपे ।।' भ०भा० १स्त० ६८-६६

अत्र द्वयोरपि काव्ययोर्यमकयोजना रुचिरा, किन्तु चमत्कारतारतम्यमपि स्फुटमेव । सहैव भारतचम्पूकाव्ययमकानां शृङ्गारानुगुणप्रसादमाधुर्यगुणानुगुणता व्यतिरेकादीपोपमालंकारविच्छित्तिश्च पृथग् विद्योतत एव ।

राज्याभिषेकवर्णनं यथा- चम्पूरामायणे-

' अभिषिक्ते तु सुग्रीवे रामश्यामपयोमुचा ।

अभिषेक्तुं स्थिताभेवास्तन्मही महिषीमिव ।।' (किष्किन्धा २०)

यथा च चम्पूभारते-

' तातोऽपि धर्मतनयं तपनीयपीठ-

मारोप्य चक्षुरिव लब्धममुं तपोभिः ।

आवर्जितैः कलशवारिभिरभ्यषिञ्च-

दानन्दबाष्पसलिलैरवनीं च पौराः ।।' च०भा० २स्त० १४

अत्र राज्याभिषेकवर्णने द्वयोः काव्ययोस्तारतम्यमविरोहितमेव । रामायणचम्पूकाव्येरूपकोत्प्रेक्षायोः संकरः, मही महिषीत्वेनोत्प्रेक्षते कविः, सुग्रीवाभिषेकानन्तरं च तन्महिष्यभिषेकश्च वर्ण्यते। किन्तु भारतचम्पूकाव्येकविस्तुल्ययोगितालंकारेण अवनीपत्यवन्योः सहाभिषेकं वर्णयन् अवन्यामहिषीत्वं राजदम्पत्योश्चान्योन्यानुरागविषयत्वं ध्वनयन् कामप्यपूर्वां चमत्कृतिमुल्लासयति। सहैव हर्षध्वनिरपि तत्र सुवर्णस्वैं- गौरभसंक्रान्तिरिव दीप्यतेतराम् ।

राज्याभिषेकेप्रजानामानन्दवर्णनं यथा चम्पूरामायणकाव्ये-

'आनन्दबाष्पविसरो वदने प्रजाना-
माविर्बभूवमकरन्द इवारविन्दे ।
रामस्य कान्तिमभिषेकदिने भविन्त्रीं
प्रदाल्यचक्षुरिववीक्षितुमादरेण ।।' (अयोध्या०४)

यथा च भारतचम्पूकाव्ये -

'तस्मिन्नाहितलक्षणे नृपसुते राज्याभिषिक्ते सति
स्वान्यङ्गानि वधुर्यदम्बुशिशिरं लिप्तान्युक्तैकुङ्कुमैः ।
रागं यद्रविपराम्बभूवुरवहन्यद्धर्षिते बन्दिभि-
र्निष्पन्दत्वमतः स्वदृष्टिरिति तं पौराविवव्रुः स्फुटम् ।।' २।११८

अत्र रामायणचम्पूकाव्ये रामस्य राज्याभिषेकवर्णने उपमोत्प्रेक्षायो-र्विच्छित्तिः, किन्तु भारतचम्पूकाव्ये युधिष्ठिरस्य राज्याभिषेकवर्णने काव्यलिङ्गोत्प्रेक्षाऽभेदातिशयोक्तिविच्छित्या सह हर्षजाड्यानुरागध्वनिरपि चमत्करोतितरां सुतराम् । अतोऽत्र्य तारतम्यमपि स्पष्टमेव ।

वर्षर्तुवर्णनं यथा- रामायणचम्पूकाव्ये-

'दग्धार्जुनविकासेन धार्तराष्ट्रान्निरस्यता ।
तेन जीमूतकालेन देवकीनन्दनायितम् ।।'

'अस्माकं रूपलक्ष्मीमसकृदपहसत्यात्मकान्त्या तदास्तां
भर्तारं नः सुरेन्द्रं किमपि न गणयन् बालिनं प्राग्जघान ।
इत्थं मत्वैव वैरं झटिति घनघटा राघवस्याहवोत्था-
माशाश्चाशाश्च रुद्ध्वा स्तनितमिषमहासिंहनादान् वितेनुः ।।'

'उपचितजीवनधाराः सत्पथभाजो निरस्तसंतापाः ।
भूपा इव नवमेघाः पौरस्त्यमहाबलाकुलिताः ।।'

'तेन किल रघुपतिरात्तप्रवृद्धमन्युः शतमन्युशरासनशारतरतारापथां घनरवमुखरितहरिन्मुखाभोगां कदम्बवनपवनाकम्पनिराडम्बरकादम्बकुटुम्बामम्बुदकवलिताम्बरां शिलीन्ध्रसम्बन्धबन्धुरवसुन्धरां विकचकुटजनिचयकवचितमहारण्यां प्रावृषेण्यां प्रक्रियां प्रेक्षमाणो लक्ष्मणमिदमभाषत ।' (किष्किन्धा २३-२६)

एवमादिना विस्तरेण वर्षर्तुवर्णनं कविना चम्पूरामायणकारेणकृतमस्ति, किन्तु तस्योद्दीपकत्वे देवकीनन्दनायितत्वप्रतिपादनं मेघानां भूपतुल्यत्व विधानं च कियदुपकारकमितिसहृदयैर्ध्येयम् । जीमूतकालस्य देवकीनन्दनायितत्वस्य मेघानां च भूपतुल्यत्वस्य च श्लेषोपस्थापितस्य निध्यानेन तदुद्दीपकत्वबोधान्मनाग् वैमुख्यमेवमवतीति न तिरोहितं सुधियाम् ।

तद्वर्णनं यथा चम्पूभारतकाव्ये -

'नक्ताङ्घ्रिमदपश्यतीह स्खलच्छम्पासमुन्मेषणैः
पुष्यत्केतकगन्धसिन्धुविलुठत्पुष्पन्धयान्धीकृतैः ।
मेदस्वीकृतकेकिनीकलकलैर्मेघैर्घकराशामुखैः
पान्थानामपमृत्युभिः कतिपयैः प्रादुर्बभूवे दिनैः ।।

'कालाम्बुदालिनलिकात् क्षणदीप्तिवर्त्या
संधुक्षितात् सपदि सध्वनि निःसरद्भिः ।
वर्षाश्मसीसगुलिकानिकरैः कठोरैः
घर्माभियातिमवधीत् घनकालयोधः ।।'

'माध्वीलिहा विरुरुचे मलिनीकृताग्रा
कान्तारसीम्नि नवकेतकबर्हरेखा ।
दग्धाङ्कुले स्मरभिया दयिताजनेन
संप्रेषिता पथिकभर्तृषु पत्रिकेव ।।'

'अर्जुनेषु सकलेषु विकासिष्वद्रिसीम्निधृततादृशशब्दः ।
एक एव विशुशोष विशेषादेतदम्बुमृदनेहसि चित्रम् ।।'

'वियत्यशेषासु विदिक्षु दिक्षु नियोगशिल्पीन्द्रविनिर्मितायाः ।
तस्यामृगाक्ष्याश्च तडिल्लतेश्च घनर्तुयः संविविदे न भेदम् ।।' ३।५३-५७

एवं तद् भारतचम्पूकारेण संक्षिप्य कृतमपि वर्णनं प्रसादौजोगुणमय्या प्रौढरचनया रूपकोत्प्रेक्षाविषमसामान्यालंकाराणां विच्छित्त्या अत्यन्ततिरस्कृतवाच्यलक्षणामूलध्वनीनां विप्रलम्भध्वनेश्च चमत्कृत्या च तस्य कियदुद्दीपकतातिशयबोधकत्वमिति स्फुटमेव ।

धन्विनो द्विषदौद्धत्यदर्शिनः स्वधनुषि दृक्पात वर्णनं यथा चम्पू रामायणे-

'आनन्दमन्थरमनन्तरमाञ्जनेया-
दाकर्ण्यवृत्तिमनघां जनकात्मजायाः ।
दृष्टिर्दशाननरुषा परुषायमाणा
बाणासनोपरि दधे प्रभुणा रघूणाम् ।।' युद्ध ४ )

यथा च चम्पूभारते-

'संख्यातीतमवेक्ष्य कौरवबलं तत्सव्यसाचीपुर-
श्चापे तादृशि किंचिदेव विदधे साचीभवन्तीं दृशम् ।
पार्वत्या निजपट्टवस्त्रशकलं स्नेहद्रयार्द्रं स्वयं
न्यस्य न्यस्य चिकित्सितव्रणशिरा देवोऽपि यं श्लाघते ।।'

(च०भा० ७।३४)

अत्र द्वयोरपि काव्ययोः समाने विषये चमत्कारतारतम्यं सहृदयहृदयैकसंवेद्यम् । प्रथमे यदि छेकवृत्त्यनुप्राससुषमा स्निग्धि बलादावर्जयति हृदयं, तर्हि द्वितीये धृतिगर्वामर्षध्वनीनां चमत्कारः कमप्यपूर्वमानन्दं जनयति सुमनोजनमनःसु ।

धानुष्कस्य बाणमोक्षणे हस्तलाघववर्णनं यथा- चम्पूरामायणे-

'तूणीमुखात् त्वरितमुद्धरणे गुणेन संयोजनेऽप्यथ शरस्य विमोचने वा।
यत्र व्यलोकि तदधीनइवाऽतिवेगाल्लोकेन राघवकरश्चिरमालुलोके ।।'

( युद्ध ८४)

यथा च चम्पूभारते -

'उद्धारसन्धिपरिमुक्तिषु मार्गणाना-
मा जे उभे अपि तदा तिसृषु क्रियासु ।
सायुज्यमापतुरिवाऽन्तिमया समीके
चक्रीकृते धनुषि शक्रसुतेन तेन ।।' ७।४१।।

अत्रापि द्वयोः काव्ययोर्वर्ण्यविषयसाम्येऽपि वर्णनगतचमत्कारतारतम्यं

सहृदयजनसंवेद्यम् । प्रथमे काव्ये राघवकरस्य वेगहेतुकमुत्प्रेक्ष्यमाणं राघवाधीनत्वं न नवीनम्, तस्य पूर्वसिद्धत्वात्, किन्तु द्वितीये काव्ये मार्गणानामुद्धारसन्धिपरिमुक्तिरूपक्रियासु तिसृषु आद्यान्तिमयोः सह सायुज्योत्प्रेक्षाका-प्यपूर्वैव, तथा च विजयहस्तस्य लाघवातिशयं ध्वन्यमानः कमपि चमत्कारातिशयं जनयति सुमनोजनमनःसु ।

रणभेरीरवव्याप्तिवर्णनं यथा चम्पूरामायणे -

'ततो मदपरिप्लवप्लवगवीरसाराविण-
दाणन्दुभितकोणपञ्जरपाणिकोणाहतः ।
रवैरविकमैरवैरुपशुष्यरोदोन्तरं
तरङ्गितघनाघनस्तनितबन्धुभिर्दुन्दुभिः ।।' (युद्ध ४०)

यथा च चम्पूभारते-

'युद्धारम्भमटार्भटीपिशुनताक्षुद्राभयन्तस्तदा
निःसाणादिमजैत्रवाद्यनिनदा निर्धूतशब्दान्तराः ।
श्रान्तिं दोधुमिवाऽतिदूरपदवीसंपादितामम्बुधे-
र्वेलाशैलमहागुहासु विविशुर्व्याप्ताशु धाराधरैः ।।' ६।१४।।

अत्रापि द्वयोः काव्ययोः समाने विषये प्रौढरचनाप्रपञ्चे च चमत्कारतारतम्यं सहृदयसंवेद्यम् । प्रथमे यदि दुन्दुभिरवाणां रोदोन्तरोपरोधो वर्ण्यते, तर्हि द्वितीये तेषां वेलाशैलपर्यन्तगमनं तन्महागुहासुदूरपदवीगमनप्राप्तश्रमदूरीकरणफलप्रवेशनं च अतिशयोक्तिमूलकोत्प्रेक्षासंवलितं वर्ण्यमानं कामप्यपूर्वां विच्छित्तिमुर्वरयति ।

शत्रुवधवर्णनं यथा चम्पूरामायणे-

'शस्त्राशस्त्रिसमुत्सुकोऽपि दयितां संचिन्त्य पर्याकुला-
मस्त्रेण ज्वलता विधेरपुनरुन्मेषेण तन्मस्तकान् ।
रामः कन्दलितान् मुहुर्मुहुरवच्छेदेऽपि लङ्कापते-
रातङ्केन समं समस्तजगतां चिच्छेदसीतापतिः ।।' (युद्ध ८७ )

यथा च चम्पूभारते-

'तावत् किरीटी तरुणेन्दुमौलेर्वदान्यताकीर्तिविदावदेन ।
शरेण शत्रोरलुनीतशीर्षं साकं प्रमोदेन स कौरवाणाम् ।।' १०।७७

अत्र द्वयोरपिकाव्ययोः समानेऽपि विषयेऽनुप्राससहोक्तिचमत्कारे च पर्यायोक्तालंकारकृता काऽपि विच्छित्तिश्चम्पूभारतकाव्ये मनोहारिण्य धिकैव ।

पराजितस्य शत्रोर्दैन्यवर्णनं यथा चम्पूरामायणे-

'प्राप्यतत्प्रथमं युद्धे पराजयमुदेजयत् ।
दशाननः पुरींप्राप दिनदीपदशाननः ।।' (युद्ध ५२)

यथा च चम्पूभारते-

'धृतराष्ट्रसुतोऽपि गेहमागात् दिनदीपाङ्कुरदीनदीनदीप्तिः ।
शकलीकृतबाहुकर्णनासैःसहयोधैः स घटोत्कचाश्मवर्षात् ।। १०।१००।

अत्र चम्पूरामायणे यदि यमकेन सहदिनदीपदशोपमा रावणस्य दैन्यद्योतिका, तर्हि चम्पूभारते दैन्यातिशयस्यव्यञ्जिकायादिनदीपाङ्कुरोपमायाः व्यङ्ग्यानुगुणस्यमाधुर्यगुणानुसारिस्निग्धवर्णघटितवृत्त्यनुप्रासस्य औपच्छन्दसिकवृत्तस्य च चमत्कारः कश्चिदपूर्व एव ।

राज्यारूढस्य राज्ञः शासनादि वर्णनं यथा चम्पूरामायणे काव्ये-

'साकेतं समुपेयिवान् रविजयी संसेवितो भ्रातृभिः
सुग्रीवप्रमुखानपि प्रियसखान् स्वे स्वे पदेस्थापयन् ।
स्वच्छन्दं सुचिरं सुखान्यनुभवन् देव्या तया सीतया
रामः पालयतिस्म कीर्तिविभवैरामोदिनीं मेदिनीम् ।।' यु०१०६

यथा च चम्पूभारते-

'राज्ञां मौलिपरम्परां चरणयोः पाणौप्रदानश्रियं ।
बुद्धौ राजनयोदयं, हृदिकृपां, सत्यं च जिह्वाञ्चले ।
बाहौसागरमेखलां वसुमतीं, मस्तेकिरीटं मुदा ,
कुर्वन् धर्मतनूभवश्चिरमसौ गोपायतिस्म प्रजाः ।। १२।३२

अत्र द्वयोर्वर्ण्यविषयसाम्येऽपि चमत्कारतारतम्यं स्फुटमेव । चम्पू

रामायणीयमकानुप्रासश्लेषालंकारा यदि प्रकाशयन्ति मनाग् विच्छित्तिम्, तर्हि चम्पूभारतकाव्येछेकवृत्त्यनुप्रासच्छटा काव्यलिङ्गालंकारषट्कसुशोभासमुद्भासितस्य समुच्चयालंकारस्य सुषमा काऽप्यपूर्वमनोहारिणी । रामायणे काव्ये रामस्य विषयलोलुपत्वव्यञ्जकस्वच्छन्दसुखानुभववर्णनं न तदुत्कर्षाय । भारतकाव्ये तु युधिष्ठिरगतगुणगणवर्णनपरकसमुच्चयस्य लोकोत्तरतदुत्कर्षद्योतकत्वेन व्यतिरेकालंकार व्यञ्जकता, व्यतिरेकेण अनन्वयः, तेन चाऽसमालंकारो ध्वन्यते, इति निःसीमश्चमत्कारातिशयो भारतचम्पूकाव्येऽनुभूयते ।

अस्तु, चम्पूरामायणचम्पूभारतकाव्ययोः कोऽपि तारतम्य-विशेषोऽस्त्येवेतिमन्तव्यम् ।

## (४) चम्पूभारतस्य भागवतचम्पूकाव्येन तुलना

भागवतचम्पूकारोऽभिनवकालिदासोविद्वद्भिरैतिहासिकैरेकादशशतकोत्पन्नोमन्यते, सहैव 'भारतचम्पू' कारस्याऽनन्तभट्टस्य समकालिकोऽपि ।समकालिकत्वादेव द्वयोरनयोश्चम्पूकारयोरन्योन्यस्पर्धाविषयताऽपि मन्यते(१) अत एवद्वाभ्यामेवाभ्यां 'भागवतचम्पूः भारतचम्पूश्च रचिते उच्येते, बाढमिदानीमभिनवकालिदासस्य 'भागवतचम्पूः' अनन्तभट्टस्य च 'भारतचम्पू' रेवोपलभ्येताम्, किन्तु उपलभ्यमानयोरनयोश्चम्पूकाव्ययोः प्रारम्भिकमंगलाचरणपद्ययोः प्रारम्भोऽपि 'कल्याणं' पदेनैव जात उपलभ्यते । संप्रतिद्वयोरनयोःकाव्ययोस्तुलनात्मिकाऽऽलोचना नः करणीयत्वेन प्राप्तावसरा ।

चम्पूकारयोरेतयोः काव्यनामसाम्यप्रयुक्तं सादृश्यमेवतु नाम, किन्तु अनयोः रुचिभेदेन काव्य प्रतिपाद्यत्वेन स्वीकृतयोर्विषयोरिव तद्वर्णनशैल्योः लक्ष्ययोश्चापि भेदेन नितरां वैसादृश्यमनुभूयते । कालिदासो यदिशृङ्गारप्रियत्वेन शृङ्गारमेव प्रायेणावर्णयत्,लौकिकानामिव च भगवतश्चरित्रेऽपि न

---

१- 'चम्पूकाव्यों का आलोचनात्मक एवं ऐतिहासिक अध्ययन पृ०११३,११७

न संभोगशृङ्गारमप्यवातारयत्, विस्तरप्रियत्वेन अनावश्यक शब्दाडम्बरमपि-स्वकाव्ये व्यधात्, विलासित्वेन च काव्यप्रयोजनीभूतलोकशिक्षणाद्युपेक्षमाणः स्वमानसवृत्तिसान्त्वनाय शृङ्गारं वर्णयन् अश्लीलता दोषमप्युपेक्षते, तर्हि अनन्तभट्ट आदर्शप्रियत्वेनसदाचारमर्यादां रक्षन्यावदपेक्षितं सर्वानपि रसान् प्राकाशयत्, संक्षेपप्रियत्वेनाऽनावश्यकशब्दकं न मनागपिन्यवेशयत् स्वकाव्ये, मर्यादाप्रियत्वेन च काव्यप्रयोजनीभूतलोकव्यवहारशिक्षणाद्यपेक्षमाणः काव्येस्वकीये आदर्शभूतान्येव चरित्राण्यचित्रयत् सरुचि अनादर्शभूतानि चारुच्येव प्राकाशयत् । अस्तु ! संप्रतिकाव्ययोरनयोस्तारतम्यं विचिनुमः ।

तत्र मङ्गलश्लोको यथा भागवतचम्पूकाव्ये-

'कल्याणं नः प्रभूतं कलयतु ललिताऽलापशैलेय बाला
लीलाजालानुकूलाशिशिरकरकलाभानुमालाजटाला ।
एषा शेषाहिभूषा परिकलित सुधापूरधारानुकारा
भद्रामुद्राविनिद्रा पुरहरणविधौ कापि कारुण्यपूर्णा ।।'

यथा च भारतचम्पूकाव्ये -

'कल्याणं वो विधत्तां करटयदद्युनीलोलकल्लोलमाला
खेलल्लोलम्बकोलाहलमुखरितदिक्चक्रवालान्तरालम् ।
प्रत्नं वेतण्डरत्नं सततपरिखलत्कर्णतालप्ररोह-
व्रातान्दूराविहीषादिरविवृतकर्णाङ्गभूषाभुर्वग्म् ।।'

अत्र द्वयोरपिकाव्ययोस्तारतम्यं स्फुटमेव । भागवतचम्पूकाव्ये सानुप्रासानावश्यकशब्दाडम्बरादृते न किमपितत्त्वम्, भारतचम्पूकाव्ये च भगवत्कर्तृकस्य कल्याणविधानस्य युष्मत्पदवाच्यापरलोकार्थमेव प्रार्थनया कवेःपरोपकारप्रवृतत्वं स्पष्टमेव । यमकच्छेकवृत्त्यनुप्रासैः सह अतिशयोक्त्यलंकाराणां, वस्त्वलंकारभावध्वनीनां च चमत्कारो वर्णनस्य कामप्यपूर्वां सुषमां प्रकाशयति ।
भगवच्चरित्रनिबन्धनं यथा भागवतचम्पूकाव्ये-

एवमभिदधानमाभीरतरुणीगणानभिप्रायधैर्यमवधार्य जगदार्यवर्यतिनुकार्यपर्युत्सुकहृदयः सदयोदधिरधिकमुदामुररिपुररीरमत् ।

'रमणीसरोजरमणीयलोचनामधुराधराश्रयधुराधरापि का ।
रुचिराचिरांशुरुचिराशयाशयं तरलीचकार मुरलीविनोदिन: ।।'

'तरुणीविलोलतरुणीहृकानने मलयानिलेनकलया विधो: समा ।
अपरा समागमपरामनोरमा रमयाम्बभूव रमया समं हरि: ।।'

'हरि: स्मरपरीतापमधुरामधुराधरा: ।
न्यषिञ्चन्नवलालापैरेवं नर्मवचोमृतै: ।।'

'त्वदूरुशोभाभिभवेनरम्भास्तम्भा निजं दम्भमपि त्यजन्त: ।
मोचाभिधानं दधुरर्थयुक्तं कथं जडस्योरुसमानता स्यात् ।।'

'आविर्भवेद्यत्र लतासु पुष्पं तत्रैव दृष्ट: फलसंभवोऽपि ।
विभाति चित्रं तरुणीलतैते पुष्पं क्वचित् क्वाऽपि शलाटुयुग्मम् ।।

'बध्नासि चेत्तौ हरत: परस्य कुचावितीमौ किमु कञ्चुकेन ।
तथापिनैवत्यजत: कठोरं शीलं निजं निग्रहतस्त्यजेत् क: ।।'

'पुराऽमुना कञ्चुकेनमुग्धे किं नाम भद्रं विहितं न जाने ।
भजत्यसौ यत्तपसाऽप्यलभ्यमनारतंत्वत्कुचकुम्भसङ्गम् ।।' ३।५४-६२

'एकेननीवीमपरेण शौरि: करेणगृह्णन्नधरं प्रियाया: ।
स्तनौ च जग्राह करद्वयेन चतुर्भुजत्वं विवरीतुमिच्छन् ।।' ३।८८

'अवादि मन्दाक्षविमोहमायया ऽप्यलक्ष्यसान्द्रोऽपि मनोभवाधि: ।
अलम्भि कोऽपि प्रियदोर्लतानां नीवीविमोक्षो न कथं नु मोक्ष: ।।'
३।६०।।

'रतानुकूल: परमङ्गनानां बभूव बन्धो विविधस्तदानीम् ।
न जारनाथाश्रयणोऽपि बन्ध: परो मुरारिश्रयणानुभावात् ।।' ३।९२

यथा च भारतचम्पूकाव्ये -

'तत्र नानाजनपदमेदिनीवल्लभमुकुटमणिमरीचिपल्लविते यज्ञवाटे त्रिपथगापृथातनूजाभ्यां नियुक्तौ ------------------------------ ------ सहदेवौ निखिलभक्तजनकृत्यनिर्वहणभारेणेवनिभृतावयवं सम्यग्लोकलोचनपदमयुगलपङ्क्तिपरस्परवैमुख्यवदान्यरूपकोमलिमानं महर्षिजनवलयमध्यमहेन्द्र-

नीलरत्नं चिरत्नं पुमांसमासाद्य प्रथममर्घ्येण परिपूजयाञ्चक्रे ।४।१३।गद्यम् ।

'तमसां कुलानि सकलानि दर्शनै

सतिसद्य एव शमयन् महामहाः ।

स विवेश तत्र विदुरस्य मन्दिरं

चरमाद्रिकन्दरमभीशुमानिव ।।' ८।२६।।

'कंसवैरिणि समेयुषि गेहं कातुरात्विशयिकं मदनुत्तमम् ।

संदिदायां गमयति स्म पुरारिः सान्द्र्यतापदविधैरवलेपम् ।।' ८।२७

'विरतेरुचितं विशुद्धमह्नो

विधिमाधाय पितृष्वसुःसकाशे ।

वसतोऽस्य निशेव सा समाप्ता

वसुदेवात्मभुवः कथा न तास्ताः ।।' ८।२८।।

'श्रुत्वातत्कुपितो हरिः स्वयमसावेकोऽपि सर्वात्मक-

स्ताराभिर्नवभिर्ग्रहैर्निबिडितां शैलैर्वनैः सागरैः ।

पेट्यां भूषणमञ्जरीमिव घृतां कुक्षौ जगन्मण्डलीं

जृम्भालामतनोत् सभाजिरजुषां दृक्पङ्क्तिघण्टापथे ।।' ८।५२।

'तस्मिन्नङ्गुष्ठमात्रे नव इव मुकुरे वीक्ष्य सर्वं प्रपञ्चं

विस्मेराः सिद्धविद्याधरसुरनिकराः पुष्पवृष्टीर्व्यमुञ्चन् ।

सान्द्रं मोहान्धकारं सकलमुनिजनः संमदाश्रूणिमोक्षः ।

दाचाऽक्षणोः पदमकम्पं कुरुपुरजनता प्रेमदुर्योधनेऽपि ।८।५३

एवं यदि भागवतचम्पूकारो हरिचरितवर्णनमिषेण स्वकीयहृदयस्य तरलतां मुखानतां कामुकतां च प्रकाशयन् तत् कलुषीकरोति, तर्हि भारतचम्पूकारो भगवतो निगमागमप्रतिपादितं यथार्थं माहात्म्यं महानुभावत्वं सिद्धविद्याधरसुरमुनिमहाजनवन्द्यस्तव्यत्वं लोकशिक्षणार्थकसदाचारानुसरणशीलत्वं च प्रकाशयन् तच्चरितस्य काम्प्युदात्ततां पावनतां च प्रकटीकरोति । वर्णनमपि यदि भागवतचम्पूकारस्य 'जगदायैश्वर्य - धुराधरा' दि निरर्थकानुप्रासापादकशब्दाडम्बरभरितत्वात् अश्लीलदोषदुष्टत्वाच्च उपमार्थान्तरन्यासाद्यलंका

रयुक्तमपि ~~न-न— उभय~~ न चमत्कारि, तर्हि भारतचम्पूकारस्य वर्णनं यावद पेदितपदन्यासरुचिरं प्रकृतरसभावानुसारिमाधुर्यौजोगुणानुगुणवर्णघटितच्छेकवृत्त्यनुप्रासयमककुलकमनीयंयथोचितोपात्तरूपकोपमोत्प्रेक्षा पर्यायोक्तातिशयोक्त्यलंकाररमणीयं हर्षविस्मयभक्तिभावाभिव्यक्तिभासुरं चातीवचमत्कारकारि सचेतोजनचेतसाम् ।

नायकस्य शृङ्गारचेष्टावर्णनं यथा भागवतचम्पूकाव्ये-

"प्राणादपि प्रियतमामतिलङ्घ्य धर्म्यां
त्वामन्यथुभुविरुचिर्मि चेत् प्रमादात् ।
नश्यत्कलङ्कवदनद्विजराट्प्रसाद-
मुन्मुच्यते कथमिवाद्य मयाच्युतः स्याम् ।।" ६।११६

"प्राणप्रियाऽऋतुमती न समागमार्हा
तिस्त्रो निशा इति विलीनविलासजातः ।
खेदं प्रपद्य हृदयस्य विनोदमात्र-
मासादयन् सह कयाऽपि दिदेवया ते ।।" ६।११७

"मञ्जीरमञ्जुतरशिञ्जितरञ्जितं ते
पादाम्बुजं प्रियतमे कलयामि मूर्ध्ना ।
संधेहि मुग्धमधुरं वदनेन्दुबिम्ब-
मेकान्तकान्तमभितस्मितचन्द्रिकाभिः ।।" ६।११८

"एवं सकपटशपथपरम्परया प्रशंसया विनयाभिनयेन च प्रेयसीमनुनीयसौन्मनमुत्सङ्गसङ्गिनीमाधाय पांसुनिरसनेन शिरोरुहसंहननेन कण्ठाश्लेषेण कपोलपरिचुम्बनेन च प्रमोदमापाद्य कमपि वचनाविषयं हर्षमभजत ।" ६।११८।ग०

यथा च भारतचम्पूकाव्ये-

"व्यात्युक्षिकायां विपुलेक्षणासु वर्षन्निवधौतवलक्षामम्भः ।
कुत्सीमुदारां सखिस्तुतस्याः करोऽप्यासखीदिव कंसहन्तुः ।।" ३।६७

"उल्लासभाजा हरिणा प्रियायाः कल्हारमाल्ये कलिते कबर्याम् ।
अस्त्रैरसूयाहसितैश्च चित्रमुल्लासितं चित्रमभूत् सपत्न्याः ।।" ३।६८ ।।

'ग्लहं निमग्नग्रहणेषु कल्पयन् स्वयंग्रहाश्लेष सुखं यदूद्वहैः ।
सवर्णविभ्रमं सलिले तडित्वनूः सुखादगृह्णाद् सुदृशस्तुलानतम् ।।' ३-९९
'फूत्कृतैः क्वचिदधःस्थितिचिह्नं बुद्बुदं हरिरुदस्य निमग्नः ।
कम्पयन् प्रतिवधूं क्वचिद्‌दूरु स्तम्भमम्बुषु चुचुम्ब वराङ्गीः ।।' ३।१००

एवं भागवतचम्पूकारो यदि नायकं मानवत्याः प्रेयस्याः पुरतस्तत्पुष्पोदयकालिकमदनजनितखेदनिरासार्थकं तद्विधेयाकरणक हृदयविनोदनरूपस्वापराधप्रकाशनपरं पृथग्जनवद्दीनतामापन्नं दीनदीनं चापादयति, तर्हि भारत चम्पूकारो नायकं सर्वासु नायिकासु समानरूपेणास्निग्धन्तम्, एकस्याः कवयांम्भि मात्यकलनेपरस्याश्चासूयोदयेनाप्यप्रभावितत्वम्, समुज्ज्वलश्रृङ्गारकेलिकलनाकमनीयम्, अगलितधीरोदात्तत्वरमणीयं च वर्णयति । वर्णने भागवतचम्पूकारो यदिरूप कानुप्रासान् विन्यस्यति, तर्हि भारतचम्पूकारोऽनुप्रासैः सह उत्प्रेक्षाऽसंगति मीलितरूपकालंकाराणां योजनया कामप्यपूर्वां सुषमामुद्भावयति वर्णनस्य । वर्षावर्णनं यथा भागवतचम्पूकाव्ये-

'अथानतिचिरेण वर्षर्तुरपि सर्वर्तुशोभिनं माधवमवलोकितुमिव प्रतीक्षितावसरः स्फुटमपरिमितसुवितरणाचणतां दिदर्शयिषुरुदगात् ।'

'इतरैः सममेव सन्निधस्था क्षितुवर्षात्यिपितापितातपेन ।
यदसौ स्तनितच्छलाद्रुदन्ती रुदतीवृष्टिमिषात्तदाविरासीत् ।।'
'नामोदितं तदा किंवा कादम्बोन्मेषवैभवैः ।
चित्रं तदापि नामोदः कादम्बोन्मेषजोनृणाम् ।।'
'यदागतिर्योगार्तवधूजनविनाशिनी ।
प्रावृषि प्रकृतो वातः कुतः सोयं सदागतिः ।।'
'मलिनोऽप्यतिचञ्चलोऽपि मेघः
कल्यन् तत्स्तुतिरस्कृतिक्रियाम् ।
विषकारमयाशयोऽपि दीनैः
प्रणुतः कैश्चन जीवमात्रदानात् ।।'
'गर्जितैस्तर्जितामद्य तडिद्भिर्भीषितामपि ।

सर्वं सहां स्थिरां नेतुं प्रसादं शरदाययौ ॥' २।३६ पृ०

यथा च भारतचम्पूकाव्ये-

'चक्राङ्गैरिदपश्यतोहर चलत्कम्पा समुन्मेषणैः
पुष्यत्केतकगन्धसिन्धु विलुठत्पुष्पन्धयान्धीकृतैः ।
मेदस्वीकृतकेकिनीकलकलैर्मेघङ्कराशामुखैः
पान्थानामपमृत्युभिः कतिपयैराविर्बभूवे दिनैः ॥'

'कालाम्बुदालिनलिकात् क्षणदीप्तिवर्त्या
संधुक्षितात्सपदि सध्वनि निःसरद्भिः ।
वर्षाश्मसीस गुलिका निकरैः कठोरै-
र्घर्माभियातिमवधीद् घनकालयोधः ॥'

'माध्वीलिहा विरुरुचे मलिनीकृताग्रा
कान्तारसीम्नि नवकेतकबर्हरेखा ।
दग्धाञ्चले स्मरभिया दयिताजनेन
संप्रेषिता पथिकभर्तृषु पत्रिकेव ॥'

'अर्जुनेषु सकलेषु विकासिक्ष्वद्रिसीम्नि घृततादृशशब्दः ।
एक एव विशुशोष विशेषादेतदम्बुमृदनेहसि चित्रम् ॥'

'वियत्यशेषासु विदिक्षुदिक्षु वियोगिशिल्पीन्द्रविनिर्मितायाः ।
तस्या मृगाक्ष्याश्च तडितश्च घर्मभुवः संविविदे न भेदम् ॥ ३।५३-५७

एवं श्लेषविरोधाभासोत्प्रेक्षापह्नुतियमकैरलंकृतमपि वर्षावर्णनमपूर्णमिव न तथा चमत्कारि भागवतचम्पूकाव्यस्य, यथा- → — — →
← — भारतचम्पूकाव्यस्य वर्षावर्णनं प्रसङ्गोचित प्रसादौजोमाधुर्यगुणानुगुणवर्णघटितच्छेकवृत्त्यनुप्रासमधुरं रूपकोत्प्रेक्षाविषमसामान्यालंकाररुचिरम् अत्यन्त तिरस्कृतवाच्यध्वनि विप्रलम्भरसमनोहरं प्रौढमधुरं च कियच्चमत्कारकमिति ध्येयं सुधीभिः ।

भागवतचम्पूकारो विस्तरप्रियत्वेन कादम्बरीकार इव क्वचित् उपमोत्प्रेक्षादीनांमाला उपन्यस्यति, तर्हि साधारणगद्यमपि बहुत्रक्लिष्टनातियमक

' अथ कदाचन नारदः सकौतुकमेक एव केशवः कथमनेककामिनीरेककालं रमयतीति निर्वर्णयितुकामः कमनीयरूपां द्वारकामासाद्य तत्र मूर्तमिव शिल्पकौशलं विश्वकर्मणो नवलक्षप्रासादमण्डितं पीतामृतमिव प्रकटितसौधरुचिविशेषं, चन्द्रमण्डलमिव सुधाधवलितं सैविलविविधौषधमिव मुक्तामयं षोडशसहस्त्रान्तःपुरगर्भं यदुनन्दनसदनमासाद्य--' ६।६७ ।।

अत्राऽपूर्णस्यापि गद्यस्य पूर्वभागः साधारण एव, उत्तरभागः श्लिष्टोपमा संवलितः । आसादनक्रियाया यदुनन्दनसद्मनि सौधत्वस्य च द्विर्द्विः प्रयोगः पिष्टपेषणमिवानावश्यकविस्तरकारी वैरस्यायैव ।

किन्तु भारतचम्पूकारः सदोपप्रियत्वेन यावदपेक्षितमेवपदान्युपन्यस्यन् शब्दार्थालंकारचमत्कारकमनीयान्येव गद्यानि निगुम्फति, यथा-

' ततस्ते वन्याशनैर्धन्याधारितवसुधासुधाशनाकृतयः प्रावृषमिवबकबलाक्रान्तां पातालभुवमिव प्रत्यहं प्रवर्धमानबलिशोकामंकुराज्यसीमानमिव सूर्यतनयानुकूलप्रतिष्ठां रविरथाध्वधुरमिवैकचक्रां पुरीक्रमादाक्रम्यकस्यचिद् गृहमेधिनोगृहमध्यमेत्यसुखमध्यवात्सुः ।' एतत् संक्षिप्तमपि संपूर्णं गद्यं शब्दार्थालंकारचमत्कृतिरमणीयम्, एवमन्यान्यपि ।

गद्यानीवपद्यान्यपिभागवतचम्पूकारापेक्षयाभारतचम्पूकारस्याऽतिशयितरुचिरताधारयन्ति, यथा-

नारदागमने नायकविनयादि भागवतचम्पूकाव्ये-

' सत्वरं हरिरुत्थाय निवेश्य स्वासने मुनिम् ।
आराध्यविधिवन्मूर्ध्ना पादोदकमदीधरत् ।।'

' शान्तकामोभवानीदृक् सुलभः संयमी कथम् ।
तथापि गृहसक्तिर्नो गोत्रैकैकतपःफलम् ।।'

' तदनु गृहीतव्योहं विधेयविषयनियोगेनेत्यमृतसारसरसांगिरमुदीरयन्तं भगवन्तं नारदः प्रत्यवादीत् ।'

' विधेयमपरं नैव पश्यामस्त्वां विना हरे।
यत्संप्रतिकृतार्थोहं जातो लाभान्तवाद्भुतम् ।।' इति ६।६७

यथा च भारतचम्पूकाव्ये-

'प्राणायमानमखिलानथ पाण्डुपुत्रान्
द्रोणाविमाननुजिघृक्षुरुदारभूमा ।
एणाजिनेन घटितोऽङ्गमनीयकृत्यो
वीणाविनोदरसिको मुनिराविरासीत् ।।' ३।२३।।

'तपोनिधेरागमनेन सद्यः विभोः स्तब्धजनारवाऽपि ।
वीणारवानुद्रुतभृङ्गमालाकोलाहलैर्घोषितदिङ्मुखाऽभूत् ।।'

'दृष्ट्वा नृपो देवमुनिं विनीतो मौलिस्रजां धूलिमधूलिवृन्दैः ।
सपङ्कमाधाय तदङ्घ्रियुग्मं विपङ्कमात्मानमयं व्यतानीत् ।।'

''मेध्यां बृसीमधिगतस्य विरिञ्चिसूनो-
रास्थाय सन्निधिमुदारमुदां कुरूणाम् ।
तस्याऽद्भुतागमनहेतुपरिच्छिदायां
चित्तानि दूरपथवर्तनतामबाधुः ।।' ३+

'निर्कुञ्चिते तेन धृतानिजाङ्के विपञ्चिकामौनमवाप्यतस्थौ ।
पाञ्चालिका वन्दनवादशैलीमाधुर्यमाकर्ण्यविलज्जितेव ।।'

' राज्ञाऽमुना समुचितेषु समाजनेषु
पात्रैश्चपाणिविधृतैः प्रचलैश्च वेत्रैः ।
निर्वर्तितेषु रभसेन निवर्तितेषु
स्मित्वा मिथो गिरमभाषतधातृसूनुः ।।' ३।३-७।।

एवं भागवतचम्पूकारो यदि लोकव्यावहारिकभाषयैव मनागनुप्रास रूपकसंवलितयैव वाचावदति, तर्हि भारतचम्पूकारो माधुर्यानुगुणयमकानुप्रासैः श्लेषाविषमोत्प्रेक्षापर्यायोक्ति यथासंख्यतुल्ययोगिताऽतिशयोक्त्यलंकारैर्वा-त्सल्यभक्त्यौत्सुक्याऽत्यन्ततिरस्कृतवाच्यध्वनिमिश्च रुचिररुचिरयागिरा-काम्प्यपूर्वां चमत्कृतिमुद्भावयति सुमनोजनमनःसु ।

राजधानीराजतत्सम्बन्धिजनकथनं यथा- भागवतचम्पूकाव्ये-

'मथुरा मधुरानाम राजधानी पुरातनी ।

देशेषु शूरसेनेषु बभूव यदुभूभुजाम् ।।'
' अवसन्नगरीमेनामुग्रसेनो महीपतिः ।
गुणैरनुचकारैनमनुजो मनुजोत्तमः ।।'
' देवकस्तनयस्तस्य देवकी देवतोपमा ।
तनयोऽप्युग्रसेनस्य कंसो हि कुलपांसनः ।।' (१।३०)

अथ कदाचिदानकदुन्दुभिरधिमधुरानगरमुपयम्य देवकतनुजामुपजात हर्षप्रकर्षः सह जायया परिजनेन च निजभवनजिगमिषया समारुरोह रथमनुपहतमनोरथः ।'

यथा च भारतचम्पूकाव्ये -

' तुहिनकिरणवंशस्थूलमुक्ताफलानां
विपुलभुजविराजद्वीरलक्ष्मीविभूम्नाम् ।
हसितसुरपुरश्रीरस्ति सा हस्तिनाख्या
रिपुजनदुरवापा राजधानी कुरूणाम् ।।' १।१

' उपेत्यतां पाण्डुरुदारविक्रमः प्रजामनः पल्लवयन् प्रशासनात् ।
यशः प्रकाशैर्यमुनासखीसखैर्निनायलोकं निजनामवाच्यताम् ।।' १।१२।

' चित्रं चरित्रं जगतीतलेऽस्य न श्लाघयामास नरेषु को वा ।
स यत्स्वयं पाण्डुरपि स्वकेन गुणेन रक्तानकरोत्समस्तान् ।।' १।१३

' जग्राहनिग्राहपरः परश्रियां करैः कराग्रेण करेणुचङ्क्रमः ।
कुन्तीं शकुन्तीशरथोयथा रमां समुद्रकाञ्चीं च समुद्रकन्याम् ।।' १।१५

' अथ कदाचिन्मृगयोपलालितहृदयो नरेश्वरोऽयमश्वेशशिश्वेतरोचिषि विश्वातिशायिनिरयजितमातरिश्वनि कृताधिरोहः पार्श्वधृतविश्वकद्रुभिरनेकवागुराद्युपकरणानुरोधैर्योधैरनुद्रुतो मृदुमद्रविनयाभ्यां यदुमद्रतनयाभ्यामनुविद्धः सिद्धगणागणनीयमहिमवतो हिमवतोऽवजगाहेमहतीमटवीं तटवीथिकाम् ।'

एवं भागवतचम्पूकारो यदि मनागनुप्रासयमकोपमासंवलितया पौराणिकजनसाधारण्येव वाण्यावदति, तर्हि भारतचम्पूकारो यमकानुप्रासच्छटाविन्यासभासुरया श्लेषरूपकव्यतिरेकरसवदुपमातद्गुणविषमतुल्ययोगिताप्रयोगबन्धुरयागिरासमुदीरयन् किमप्यद्भुतं रामणीयकमुद्भावयतिगद्यपद्यानाम् ।भा

गवतचम्पूकारो यदि 'देवकीदेवतोपमा' इत्युपमया 'देवक्यां देवरूपिण्यां वि ष्णुः सर्वगुहाशयः' इत्यादिभागवतीयपद्यप्रतीकमनुवदन् स्वस्यपौराणसरणेर नुसरणप्रियतांप्रमाणयति, तर्हि भारतचम्पूकारोलौकोत्तरचमत्कारसारसंभृतया प्रौढोदात्त्यापदन्यासप्रक्रियया सुधानवद्यगद्यपद्यमयप्रदेशेषु स्वच्छन्दं संचरमाणः सहृदयहृदयेषु चाऽमन्दमानन्दमुद्वेलयन् स्वस्य वशिलवाग्देवतानुभावत्वं कविकुंज रत्वं च सुतरां प्रकाशयतितराम् ।

अलं मुधाविस्तरेण, + विवेचनेनानेन द्वयोरपि भागवतभारतचम्पूका व्यकारयोस्तारतम्यं सहृदयजनसंवेद्यं स्पष्टीभवति ।

## (४) भारतचम्पूकाव्यस्यपरवर्तिचम्पूकाव्यैस्तुलना

### (१) भारतचम्पूकाव्यस्यवरदाम्बिकापरिणयचम्पूकाव्येन तुलना

'वरदाम्बिकापरिणयचम्पू' काव्यस्यरचयित्री विजयनगरमहाराज स्याऽच्युतरायस्य महिषी तिरुमलाम्बा आसीत् । अच्युतरायस्य समयः सन्- १५२९वत्सरात् सन् १५४२ वत्सरपर्यन्तः स्वीक्रियत ऐतिहासिकैः (१) येन ति रुमलाम्बायाः 'भारतचम्पू' कारात् अनन्तभट्टादवर्चीनत्वं सिध्यति । ति रुमलाम्बया रचितस्य 'वरदाम्बिकापरिणयचम्पू काव्यस्योपसंहारभागेसमुपल भ्यमानेन + —

'इत्येकवाराकर्णनमात्रदृढावधारितनव्यकाव्यनाटकालंकार पुराणाग मरहस्यसारयानुबन्धसमिन्धानस्वाभाविकप्रतिभानुभावया --- तिरुमला- म्बया निर्मितं वरदाम्बिकापरिणयं नामचम्पूकाव्यम् --- ।' इत्यादिलेखे न तिरुमलाम्बायाः प्रतिभाशालित्वं विविधग्रन्थाध्ययनप्राप्तव्युत्पत्तिमत्त्वं- च प्रकटीभवति । तदनुसारं च 'वरदाम्बिका परिणयचम्पू' काव्ये गद्यानि-

---

१- 'चम्पूकाव्यों का आलोचनात्मक एवं ऐतिहासिकअध्ययन' पृ० १३६मिते

पद्यानि च रुचिराण्येव भवेयुरित्याशास्य ————————— कतिचिन्निदर्शनानि द्वयोरपि काव्ययोरधस्तादुपन्यस्यपरीक्ष्यते तारतम्यम्। तत्र - वरदाम्बिकापरिणयचम्पू' काव्यस्य गद्यं यथा-

'निरन्तरान्धकारितदिगन्तरकन्दलसदमन्दसुधारसबिन्दुसान्द्रतरघनाघनवृन्दसन्देहकरमकरन्दबिन्दुबन्धुरतरमाकन्दतरुकुलतल्पकल्पमृदुलसिकताजालजटिलमूलतलमिलदलघुलघुलयकलितरमणीयधानीयशालिका बालिकाकरारविन्दगलन्तिका गलदेलालवङ्गपाटलघनसारकस्तुरिकाप्रतिसौरभमेदुरलघुतरमधुरशीतलतरसलिलधारा निराकरिष्णुतदीयविमलविलोचनमयूखरेखा अपकसारितपिपासायासपथिकलोकान् । (पृ० ३१)

भारतचम्पू' काव्यस्य च गद्यं यथा-

'अथ कदाचिदखिलहरिदन्तरतलमानमलयपवमानकम्पितचम्पकसम्पादितसौरभसम्पदनुकम्पितनिलिम्पपथाः, केसरकुसुमकेसरशिखरभासुरधूलिधूसरदिशो-मनसिजविजयसहकारचतुरसहकारपल्लवतल्लजपरिचर्वणगर्वायमाणकलकण्ठयुवकण्ठोक्तपथिजनसन्दोहजीवितसन्देहावनदेवतावदनतिलकायमानतिलकावल्लिकलिकापलितम्भावुकनभोविभागा मदनहुतभुग्धूमारसदृशकमलभृङ्गारमधुरससङ्गारचितमदभृङ्गारवविपवर्तुङ्गारब्धितमिथुनशृङ्गाररसाः समुन्मिषज्जासन्तिका मिषेण सीमन्तिनीरतेरुदन्तं दुरन्तं विचिन्त्यरहसितरन्तंनृपन्तामिवहसन्तो वसन्तोदयवासरामन्दं-मन्दमरण्यांकमरण्यांकमपि विकासमापादयामासुः ।'

अत्र 'वरदाम्बिकापरिणयचम्पू' काव्यस्य गद्ये यदिप्राप्यतेकतिभिश्चिद्पुनरुक्तिभिसह छेकवृत्यनुप्रासयमकोपमा, तर्हि भारतचम्पू'-काव्यस्यनिरवद्यगद्ये यमकसम्पुटितछेकवृत्यनुप्रासानामुपमाऽपह्नुत्युत्प्रेक्षातिशयोक्त्यलंकाराणां च स्फारतरश्चमत्कारः प्रसभमाकर्षतिसुमनोजनमनांसि ।

अथ पद्यानि, तत्र -

शत्रुनिग्रहवर्णनं यथा- वरदाम्बिकापरिणये -

'गृहीतमात्रेयुधिचोलभूपे कृपानिधिः श्रीनरसिंहदेवः ।
स तां न्यषेधत् समरात् स्वसेनां सतां प्रसादः सहजो न रोषः ॥'

(पृ० ६६।४७)

यथा च भारतचम्पू काव्ये -

'इत्थं निगधसरलेन युधिष्ठिरेण
बन्धाद्विमुच्य बकविद्विषता विसृष्टः ।
मानं च्युतं मृगयमाण इवाऽतिनम्रो
वाचंयमेन स ययौ महता बलेन ।।' ५।६७

यथा वा तत्रैव-

'विमोनितौवायुभुवा विराटतो त्रिमोचितोधर्मभुवादयालुना ।
तदा रजन्येव स सामिशेषया समं ध्वजिन्यानिरगाद् यथा गतम्।।
(६।१०६)

अत्र 'वरदाम्बिकापरिणयचम्पू' कर्त्री चोलगृहीतेपरसेनाप्रमाथं निषेधति, चोलग्रहणस्य तु अपूर्वत्वादिव तन्मोचनमवर्णयन्तीति तस्मिन् नरसिंहस्यमहत्त्वबुद्धिं प्रकाशयति । अपरं च चोलोगृहीत एव न मोचितः, तथापि-वर्णितो नरसिंहस्य प्रसादः कुतः फलित इति सैव जानीयात् ।

'भारतचम्पूकारश्च निगृहीतस्य शत्रोर्विमोचनं वर्णयन् नायकाग्रे तस्यातितुच्छत्वं प्रकाशयति, सत्यपि च महति सैन्यबलेऽकिंचित्करत्वं च तस्य-ध्वनयति । एकत्र उत्प्रेक्षा इतरत्र च सहोक्तिः शत्रोरति स लज्जितत्वं भीतत्वं च प्रकाशयतः।

सैन्ययोर्मिथः संघर्षवर्णनं यथा-'वरदाम्बिकापरिणयचम्पू' काव्ये

यथा-

'व्यूहावुभौतौ विहितौ रुषौ षौ वितेनतु विग्रह माग्रहेण ।
संवर्तनिस्सीमरामी रवेगसंघट्यमानाविव सानुमन्तौ ।।' पृ०३४।६३

यथा च 'भारतचम्पू काव्ये -

'तत्र तावरिमणौ शनैः शनैः संगतौ सधनुषौ सगर्जितौ ।
पूर्वपश्चिममरुत्प्रचोदितौ पुष्करे घनघनाघनाविव ।।' ६।१७

अत्र 'वरदाम्बिकापरिणयचम्पू' काव्ये 'भारतचम्पू'काव्यस्य गृहीता छाया स्फुटमीक्ष्यते, द्वयोरिपुसमूहयोः 'भारतचम्प्वां' यदि सगर्जितत्वं

घनाघनोपमेयत्वं चास्ति तर्हि " वरदाम्बिकापरिणयचम्प्वां " सघोषत्वं पर्वतोपमेयत्वं च । उपमानं परिवर्तयन्त्याऽपि " वरदाम्बिकापरिणय " कर्त्र्या- नैतन्निभालितं, यत् " संवर्तवायुवेगेनापि पर्वता उड्डीयन्ते, न वा ? पर्वतयोः संघटनंवायुवेगेन असंगतम्,तदपि यदि वायुः कस्याश्चिदेकस्या एव दिशश्चलेत्- तदा तु सुतरामसंगतम्, अत एव कालिदासः " न पादपोन्मूलनशक्तिरंहः शिलोच्चयेमूर्छतिमारुतस्य " इत्याह । किन्तु " भारतचम्पू " कारोऽसंगतं सानुमत्संघटनं त्यक्त्वा संगतां घनाघनघटनां वर्णयति, तत्राऽपि तयोः पूर्वपश्चिममरुत्प्रचोदितत्वेन घटनायाः सामंजस्यं प्रकाशयति । घनाघनोन्योन्यघटनास्थल- त्वेनपुष्करमपि " भारतचम्पू " कारेणप्रदर्शितम् " सानुमतोःसंघटनां प्रदर्शयन्त्या पि " वरदाम्बिकापरिणय " कर्त्र्यातत्स्थलं न प्रकटितम्, मन्येतत्स्थलस्य नि- र्णयं कर्तुमेव सानापारयत्, कस्यापितत्वेन वर्णनेऽसंगत्या आभासात् । आश्रयस्य कल्पनेऽसंगतावापतितायामाश्रितस्य कथने सा सुतरामेवेतिध्येयं सुधीभिः । द्विरदलोद्दामद्विशदाक्रमणवर्णनं यथा " वरदाम्बिका परिणयचम्प्वाम् " -

" कोपाटोपाच्चोलभूपालको दु-
 श्चापानेकानेकपानीकपार्श्वः ।
आगाद् वेगादस्यमित्रं जिगीषु-
 श्छागः साकं केसरीन्द्रं करीव ।। " पृ० ३६।६३

यथा च " भारतचम्पू " काव्ये -

" तादृशं कुम्भसम्भवस्याऽभिषङ्गमभिवीक्ष्य क्रोधनतयाकर्णतालसमीरणसमृद्धिपरिणतचक्रवातगर्भपरिभ्रमद्ध्वजकेतुपताकापटसहस्रसंपादितसमरसागरावर्तवशंवदफेनकूटशोभानिष्कलदिङ्मुखघण्टापथजाग्रिकघण्टाभरणरणितबधिरीकृताष्टलोकपालपुरजनानि निविडितसुरसमाजसमाक्रान्तगगनमण्डपस्थिरीकरणाय दत्तेन्द्रनीलस्तम्भानिव शुण्डादण्डानूर्ध्वमुन्नमयमानानि समन्तान्निहास्तिकानिपुरस्ताद्विस्तार्य रणमत्तोभगदत्तः सुप्रतीकमधिरूढो हठाद्भीममभिदुद्राव । " १०।२१ग०

अत्र वरदाम्बिकापरिणय " कर्त्र्याः करिणां छागत्वेनोत्प्रेक्षा विचित्रैव सा किं मूला किं साधारणधर्मनिर्वर्तितेतिसैवजानीयात् किन्तु " भारतचम्पू "

चम्पू काारोगजबलानां रूपकोत्प्रेक्षाऽतिशयोक्तिभि: सजीवमिवोजस्विचित्रमु पास्थापयत् । कस्यापि सन्तुहास्तिकानि, हास्तिकानिहास्तिकान्येवाऽव तिष्ठेरन्, न तु कस्यापि वाङ्मात्रेण तानि नागा: संभवितुं शक्नुवन्ति ।- किन्तु तिरुमलाम्बा स्वकथनस्याऽसंगतिं नैवाऽवगन्तुमपारयत् । अस्तु ।

एतावतैव विश्लेषणेन 'वरदाम्बिकापरिणयचम्पू' काव्यस्य भा रतचम्पू' काव्यस्य च स्फुटी भवति तारतम्यम् ।

(२) भारतचम्पूकाव्यस्यश्रीरामानुजचम्पूकाव्येन तुलना

श्रीरामानुजचम्पूकाव्यस्य रचयिता श्रीरामानुजाचार्योऽपि षोडश शताब्द्यां(१)समुत्पन्नो प्रौढरमणीयं निबबन्ध चम्पूकाव्यम् । भारतचम्पूका व्यात् तस्य भिन्नविषयत्वे सत्यपि कतिभिश्चिन्निदर्शनैस्तयोस्तारतम्यं तु परीक्षितुं शक्यमेव ।

उभयोरप्यनयोश्चम्पूकाव्ययो: शबरमिथुनवर्णनमुपलभ्यते, तत् श्रीरा मानुजचम्पूकाव्ये यथा-

'बिभ्रत्कोदण्डदण्डं भुजशिखरयुगे सानुषङ्गौ निषङ्गौ
फालस्थस्निग्धद्विरदमदमषीरेखयाराजमान: ।
चर्मोष्णीषं दधानोवनतरुकुसुमस्तोमक्लृप्तावतंसो
रक्ताक्ष: श्यामधामा पृथुलतरपदत्राणशाली समेति ।।'
'विस्तीर्णैकर्णपत्रे द्विपदशनमये कर्णयोर्धारयन्ती
गुञ्जामालां दधानागलभुविवलये शङ्खक्लृप्तौ वहन्ती ।
कस्तूरीचित्रकोद्यन्निटिलशशिकलादेवतेवाऽटवीनां
काचित् कान्ताऽस्य पार्श्वे विलसतिकिमयं व्याधयूथाग्रगण्य: ।।
३।४५-४६

---

१- 'मद्रासगवर्नमेन्टओरियन्टलमैन्युस्क्रिप्टसीरिजसं.६ रूपेणप्रकाशित' श्रीरा मानुजचम्पू' पुस्तकस्य भूमिका पृष्ठे ६ मिते ।

तच्च भारतचम्पूकाव्ये यथा -

'हैरम्बगण्डमदपङ्कविशेषकौ तौ
स्कन्दोपवाह्य शिखिपिच्छकृतावचूडौ ।
भूषाधुनीतटतरुच्छदक्लृप्तवस्त्रौ
कोदण्डिनौ व्यरुचतां कुहनाकिरातौ ॥' ४।६६।

वर्णनसाम्येऽपि द्वयोरनयोः काव्ययोस्तारतम्यं स्फुटमेव । मद-कोदण्ड-क्लृप्तशब्दानां भारतचम्पूमिव श्रीरामानुजाचार्यचम्प्वामप्युपलब्धेः पूर्वस्याः प्रभावोऽपरस्यां पतितो दृश्यते । भिल्लानां कुसुमैरुत्तंसकल्पनमननुरूपम् शिखिपिच्छेन तत्कल्पनं चानुरूपम् । भिल्ला अपि चर्मोष्णीषं तु नैव दधति, पुनश्च तदुपरि कुसुमोत्तंस इति न संगतम् । श्रीरामानुजचम्प्वां महाञ्शब्दाडम्बरो तत्र्यप्रकृतवात्सल्याद्योऽननुरूपः , भारतचम्पूकाव्ये च संक्षिप्तमपि वात्सल्यानुरूपं कीदृक् प्रौढि प्रसन्नं स्वाभाविकं चमत्कारि च वर्णनमिति विभावयन्तु सहृदयाः ।

भारतचम्प्वां महामहत्तोऽपि महाभारतकथाविस्तरस्य संक्षेपेण-वर्णनं तर्हि श्रीरामानुजचम्प्वामेकस्यैव श्रीरामानुजाचार्यस्य जीवनस्य, तथात्राणां तत्कुलस्य तत्पुर्याश्च विस्तरेण वर्णनमस्ति । भारतचम्प्वां सर्वेषां रसानां साहित्याङ्गानां च पर्याप्तोपलब्धिः, तर्हि श्रीरामानुजचम्प्वां विद्याध्ययनाध्यापन-पाण्डित्य-सदाचार-भक्तिसम्प्रदायादि वर्णनं विस्तरेण प्राप्यते । श्रीरामानुजचम्प्वां भूतपुर्याः पृष्ठचतुष्टयमितगद्यपद्यैर्वर्णनमस्ति, तत्र भारतचम्प्वां पुर्याः एकस्याः पङ्क्तिचतुष्टयमितगद्येन । तेन नैतयोः साम्यं विषयस्य शैल्याश्च भिन्नत्वात् । तथापि पद्यनिदर्शनं तु दर्शितं, काचिद् वर्णिका-गद्यस्यापि द्वयोरुपस्थाप्यते, सा यथा श्रीरामानुजचम्प्वाम् भूतपुरीवर्णनस्य-

'अमरावतीव हरिचन्दनसुरभिसन्तानकल्पकचिन्तामणिपरिष्कृता, अलकापुरीवानवरतविहरमाणराजहंसरसोल्लासवती, भोगवतीव महाभोगिमण्डलमनोहारिणी, श्रीरङ्गनगरीव श्रीरङ्गराजोपलालिता, काञ्चीपुरीव सत्यव्रतोदयवती, अयोध्येव रामाभिरामा---- भक्तानुरागवताभगवताशिरोभूष

णवती, धरणीरमणीशिरोमणिरीतिमती श्रीमतीमहाभूतपुरीनाम नगरी ।'
यथा च भारतचम्प्वाम् -

'ततस्ते वन्याशनैर्धन्याधारितवपुषाक्षुधाशनाकृतयः प्रावृषमिवबककबलाक्रा न्तां पातालभुवमिव प्रत्यहं प्रवर्धमानबलिशोकाम्पिराज्यसीमामिवसूर्यतनयाऽनुकूलप्रतिष्ठां रविरथादाघुरमिवैकचक्रां पुरीं क्रमादाक्रम्य कस्यचिद् गृहमेधिनो गृहमध्यमेत्यान्वस्वपत्सुः ।'

गद्यवर्णिकाभ्यामनयोः द्वयोरपिकाव्ययोर्गद्यबन्धप्रौढ्याः श्लेषयमकानुप्रासोपमाचमत्कारस्य च तारतम्यं सहृदयैकसंवेद्यम् ।

अलं विस्तरेण संक्षिप्तेनापि विवेचनेनानेन काव्ययोर्द्वयोस्तारतम्यं स्फुटीभवति ।

(३) भारतचम्पूकाव्यस्यराजसूयप्रबन्धचम्पूकाव्येन तुलना

केरलप्रदेशीयः कविर्नारायणभट्टोषोडशशताब्द्यांलब्धजन्मा नैकानि चम्पूकाव्यान्यपिनिर्ममे(१) । तेषु कतिचित् चम्पूकाव्यानि महाभारतकथामा गानाश्रित्यापि निबद्धानिसन्ति । तेषु युधिष्ठिरस्य राजसूयविषयमाधारीकृत्य 'राजसूयप्रबन्धचम्पू'काव्यमपि वर्तते निबद्धम् । 'वेणीसंहारनाटकम्' नारायणभट्टस्यातिप्रौढिरचना, किन्तु 'राजसूयप्रबन्धचम्पू' काव्ये नावलोक्यते तादृशीप्रौढिः, कदाचित् सेयं चम्पूर्नारायणभट्टस्य प्रारम्भिकरचनासुस्यात् । तदीयं मङ्गलाचरणपद्यं यथा-

'गोविन्दमानन्दरसैकसान्द्रमावन्द्य नारायणभूसुरेन्द्रः ।
निर्मातिधर्मात्मजराजसूयसम्पन्नमयं सम्प्रति चम्पुकाव्यम् ।।'

भारतचम्पूकाव्यस्य मङ्गलाचरणपद्यम् यथा-

'कल्याणं वो विधत्तां करटमदधुनी लोलकल्लोलमाला-

---

१- 'चम्पूकाव्यों का आलोचनात्मक एवं ऐतिहासिक अध्ययन' पृ० १७४ मितै

खेलल्लोलम्बकोलाहलमुखरितदिक्चक्रवालान्तरालम् ।
प्रत्नं वैतण्डरत्नं सततपरिचलत्कर्णतालप्ररोह-
द्वाताङ्कुराजिहीर्षादरविवृतफणाश्रेणिभूषाभुजङ्गम् ॥'

राजसूयचम्पूमङ्गलपद्ये ऋतेऽनुप्रासान्नास्तिकाप्यन्या चमत्कारिणी-विधा, यदि वन्दनेन गोविन्दरतिर्मनाक् प्रतीयते , तर्हि स्वस्यभूसुरेन्द्रत्वकथनेन स्वकीयोगर्वस्तेन पृथुतरः प्राक् प्रकटी क्रियते । आवन्द्येत्यत्र आङुपसर्गस्तु निरर्थक एवेति पृथक् ।

किन्तु भारतचम्पूकाव्यस्य मङ्गलपद्ये शुण्डागणनायकमाहात्म्यवर्णनाभिव्यक्ततद्विषयाकविगतारतिः, भगवत्स्वरूपानुरूपाप्रौढौजस्विनी रचना, तदनुगुणानां यमकच्छेकवृत्त्यनुप्रासानां योजना, अतिशयोक्तीनां वस्त्वलंकार-ध्वनीनां च चमत्कारः काममपूर्वां सुषमामुर्वरयन्ति पद्यस्य ।

भीमादिभिर्दिग्विजयेनाऽऽनीतद्रव्यराशेर्भगवदनुमत्यायुधिष्ठिरस्य-यज्ञारम्भवर्णनं यथा राजसूयचम्प्वाम्

'कामं भीमार्जुनाद्यैरजितपृथुमहीवर्धितैरुद्धातानां पृथ्वीशानां जयेन प्रसभमुपहृते निस्तुले वित्तराशौ ।

तद्वृतं धर्मसूनुः सपदिपरममित्रायमन्त्री यदूना-
मावेद्य व्यासमुख्यैः सममभृतपरद्रव्यवद्हव्यमारम् ॥'

पद्येऽस्मिन् मनागनुप्रासादृते नास्ति कोऽप्यपरः प्रकारश्चमत्कारसारः । तृतीयपादे च पद्यस्य द्वितीययतिभङ्गोऽप्यरुचय एव सचेतसाम् । तद्वर्णनं भारतचम्पूकाव्ये यथा-

'कृष्णे गते यदुपुरीं क्षितिपानुजानां
जित्वा दिशः प्रतिनिवृत्तवतां चतुर्णाम् ।
कोशेममुः परमसिप्रवरा गृहीता
दोष्णा बलेन महता न तु हेमपुञ्जाः ॥'

'उपायनत्वेन नृपायसर्वैर्दत्तेषु वित्तेष्वखिलेषु भूपैः ।
पार्थस्य पुर्याः क्षितिरेव भेजे वसुन्धरावाचकवाच्यभावम् ॥'

'नरदेवमगाज्जये प्रतीच्या नकुलेनैव वसूनि विस्तृतानि ।
दधदानकदुन्दुभिःस्वनैर्या' दलयन्नानकदुन्दुभेः कुमारः ।।'
'हरिणा सततः कृताऽभ्यनुज्ञो हविरादातुमिवाऽऽगतेन साक्षात् ।
क्रमवेदिपुरोधसां समूहैःक्रतुमाहर्तुमुपक्रमं प्रचक्रे ।।'

अत्र छेकवृत्त्यनुप्रासयमकानां कटा श्लेषातिशयोक्तिप्रतिसंख्योत्प्रेक्षो दात्तालंकाराणां सुषमा, वस्त्वलंकारभावध्वनीनां च चमत्कारः प्रसभमाकर्षन्तिकोविदजनमनांसि । भीमादीनामजितमहोवर्जितत्वं, राजसूयप्रबन्धकारःशब्दैनवक्ति, किन्तु भारतचम्पूकारस्तत्तदीयविक्रम-व्याहारेणाभिव्यनक्ति ।-दिग्जयानीतवित्तराशेर्निस्तुलत्वं राजसूये शब्देनोच्यते, तर्हि भारतचम्पूकाव्ये प्रतिसंख्यालंकारद्वयेन चमत्कारितया प्रकटीक्रियते । राजसूयप्रबन्धे भगवतस्ताटस्थ्यमिव प्रतीयते, तर्हि भारतचम्प्वां तस्य धर्मसूनुकार्ये ससंरम्भप्रवृत्तत्वेन तद्विषया परमाप्रीतिः प्रत्याय्यते । राजसूयचम्प्वां क धर्मसूनुना स्वकीया भागेच्छा भगवति निवेद्यते केवलम्, किन्तु भारतचम्पूकाव्ये तेन तस्मादनुज्ञां गृहीत्वा तस्मिन् परमादरोमाननीयतमता चापि प्रकाश्यते ।

अलं विस्तरेण काव्ययोरनयोर्विवेचनेनैतेनैव स्फुटीभवति तारतम्यम् ।

## (४) भारतचम्पूकाव्यस्य पाञ्चालीस्वयंवरचम्पूकाव्येन तुलना

पाञ्चालीस्वयंवरचम्पूरपि कवेर्नारायणभट्टस्यैव रचना । अस्यामपि महाभारतीयापाञ्चालीस्वयंवरकथा कविना गद्यपद्यैर्निगुम्फितास्ति । एतत्काव्येनापि भारतचम्पूकाव्यस्य काश्चिद्वर्णिकाः गद्यपद्ययोरधस्तादुपन्यस्य-तारतम्यं परीक्ष्यते ।

बकवनपरिसरस्थितैकचक्रानगरीतो निष्क्रम्य त्रिविष्टपतटिनीं प्राप्तानां पार्थानां वर्णनं यथा पाञ्चालीस्वयंवरचम्पूकाव्ये -

'उल्कामुत्कलयन् करेणपुरतोवृत्रारिपुत्रो ययौ,
पश्चादुच्चतनुः प्रभञ्जनसुतः स्कन्धेनकुन्तीं वहन् ।

पश्चात्तस्य यमौ ततश्च नृपतिर्धर्मात्मजन्मा स्वयं
पान्थैः सार्धममी निशीथसमये गङ्गातटं संगताः ।।'

यथा च भारतचम्पूकाव्ये-

' ते पुनरनेकदिनीतजनपदवनसीमानः पथिकृतोदयेन भगवतापराशरदायादेन ' जतुभवनपरिच्यवनेन वो नवो हर्षः पार्षतस्य समुन्मिषति' इति गिरानुगृहीताः साक्षात् प्ररोहता भुजप्रतापानलेनेव फाल्गुनकरवेल्लितेनमहतालात तेजसा निशि नितान्तसीमन्तिततमसा पदव्या त्रिविष्टपतटिनीं समया प्राविक्षन् ।।' (द्व०स्त०)

अत्र पाञ्चालीस्वयंवरकाव्ये मनागनुप्रासः, तर्हि ' भारतचम्पू-काव्ये चमत्कारिणाऽनुप्रासेन यनकेन च- उत्प्रेक्षालंकारेण च काप्यपूर्वद्युतिर्दीप्यते । ' पाञ्चालीस्वयंवरे' पद्ये ' पश्चात्' पदस्य पुनरुक्तिः, ' यमौ' क्रियापदस्य 'यमौ' पदेनानन्वयः, स्वयं-पदस्य निरर्थकता, प्रसङ्गनस्तुतविशेषणेन च उच्चतनुपदेनाऽन्येषां तद्बन्धूनामलीकत्वत्व प्रत्यायनं च वैरस्यायैवेति विभावयन्तु सुधियः ।

गङ्गायां जलकेलिनिरतस्यकस्यचिद् गन्धर्वस्य वर्णनं यथा- ' पाञ्चालीस्वयंवर' काव्ये -

' तदनु ददृशिरेते किंचिदङ्गविलासं
कुचकलशनितम्बाघातघूर्णन्नार्यम् ।
पयसि वरवधूनां मण्डलं तस्यमध्ये
तरुणमपि च कंचित् पुष्पबाणोपमानम् ।।'

' क इह कुमतयोऽस्मत्स्वैरसंचारयोग्यं
समयमगणयित्वा मर्तुमभ्यापतन्ति ।
इति स युवतिमध्यादुत्पतन् क्रोधशाली
हरिण इव हरीणां मार्गमेको रुरोध ।।'

यथा च ' भारतचम्पू' काव्ये -

' तत्र खलु -

'इन्दीवरात् प्रतितरङ्गमनुप्रविष्टै-
बिम्बैरिवाऽङ्घ्रिपदुहितुस्तरुणीकदम्बैः ।
क्रीडन् समं पयसि चित्ररथो विलोक्य-
पार्थान् रुरोध कुपितः प्रधनं चिकीर्षुः ।।' २।६१

यदुक्तं पद्यद्वयेन 'पाञ्चालीस्वयंवर' चम्प्वामनुप्रासोपमाभ्यां रामणीयकोर्वरणेनतादृक् साफल्यमापकविः, यादृक्साफल्यं 'भारतचम्पू' कारः स्वकाव्यस्य सुषमासंयोजनाय प्राप्तवान् एकेनैव पद्येन संदिश्य वर्णयन्नपि चमत्कारिभ्यामनुप्रासोत्प्रेक्षालंकाराभ्याम् । 'पांचालीस्वयंवर' कारस्यमदनोपमा कविपरम्पराभिरसकृदुपयुक्ता, तर्हि 'भारतचम्पू' कारस्योत्प्रेक्षा सर्वथा नवीना, चित्ररथस्य क्रोधोत्पत्तेरनुकूला चेति ।

पद्यवर्णिकेव गद्यवर्णिकापि तावदीक्ष्यतां विचक्षणैः, सा च 'पाञ्चालीस्वयंवर' स्य यथा-

'केयूरहारमकरकुण्डलादिभिरशेषनेपथ्यविशेषैर्विरोचमानमभिनवबलाहकरुचिपश्यतोहरकायकान्तिकुवलयितदृशोऽवकाशमतिरुचिरलोचनाभिरामयारमया च परीतम् +- ।'

'भारतचम्पू' काव्यस्य च यथा-

'तावदस्य राजसिंहस्य जङ्घालतामनुकुर्वद्भिरिव रथाविंद्भिरपर्णवाम्यर्णमवतीर्णविति तूर्णमिणार्णिबन्धौ तेन निहितं दीप्तिमपरामिव तां दयितामनुरञ्जयन्नयमपि धनञ्जयस्तामेव वासभुवमाससाद ।'

अत्र 'पाञ्चालीस्वयंवर' गद्ये यदि अनुप्रासेनसहक्रियते पूर्वकविपरम्पराप्रयुक्तताया उपमाया उपयोगः, तर्हि छेकवृत्त्यनुप्रासैर्यमकेन च सह 'भारतचम्पू' कारप्रथमोपज्ञैः श्लेषोत्प्रेक्षालंकारैर्देदीप्यतेगद्यबन्धो 'भारतचम्पू' काव्यस्य ।

अस्तु । विश्लेषणेनैतावता स्फुटीभवतितरां तारतम्यमनयोश्चम्पूकाव्ययोरित्यलमति विस्तरेण ।

(५) भारतचम्पूकाव्यस्य आनन्दकन्दचम्पूकाव्येन तुलना

-----------------------------------

'आनन्दकन्दचम्पू' कारः कविर्मित्रमिश्रः ओरछाराज्ये सन् १६०५--१६२७ वत्सरयोरान्तरालिकसमये वर्तमानस्य वीरसिंहदेवस्य आश्रये आसीत् (१) कविरयमतीव प्रौढो गद्यपद्यनिबन्धनपटीयांश्चाऽवर्तत । अस्य गद्यपद्येषु शब्दार्थालंकाराणां कापि विचित्रैवच्छटा विलसति । किन्तु 'भारतचम्पू' काव्यस्य प्रभावोऽप्येतत् काव्ये 'आनन्दकन्दचम्प्वां' सुतरामवलोकयितुं शक्यते। यथा भारतचम्पूकाव्यस्य -

'किंशुकस्यवदने रुचिरत्वं किंशुकस्य हृदयेऽपि वशित्वम् ।
किंशुकस्य कुसुमेषुनदन्ती शंसतिस्म मधुपालिरितीव ।।' १।६०

'अखिलहरिदन्तरनिरन्तरवलमानमलयपवमानकम्पितचम्पकसौरभसम्पदनुकम्पितनिलिम्प यथाः' ।प्र०स्त०

इति पद्यगद्यौः- संवादिनी सुषमा प्राप्यतेऽधस्तादुदाहृताभ्याम् 'आनन्दकन्दचम्पू' काव्यपद्याभ्याम् । यथा-

'चञ्चुपुटानीवनकिंशुकानां पटूनि पुष्पाण्यपिकिंशुकानाम् ।
सुरागभागीनिविदारयन्ति मधौमनोबिम्बफलानियूनाम् ।।'
'कोविदारकुसुमैनकोविदाः कैर्विदारित हृदो न साधिताः ।
कम्पितेन पवमानकम्पतश्चम्पकेन भुविकेनकम्पिताः ।।' ६।१६१-६२

एवं सत्यपि तारतम्यमपि काव्ययोरनयोः स्फुटमेव । 'भारतचम्पू' कारस्य उत्प्रेक्षा अपूर्वैव, 'आनन्दकन्दचम्पू' कारस्य मधुसम्पत्समृद्धिः पुनः पुनर्लौकिकानां विलासिनामेव हृदयानि विदारयति तर्हि 'भारतचम्पू' कारस्य सा च शुकसदृशपरमहंसहृदयस्य वशित्वमपि न किंचिन्मन्यते । 'आनन्दकन्दचम्पू' कारस्य पुनपुनर्हृदय विदारणवार्ता वैरस्यायैव न भवेत् किमिति विचारणीयमेव ।

काव्ययोरनयोः समानविषयाणां सूक्तीनां चमत्कारतारतम्यम-

---

१ सन् १६३१ वर्षे 'वाराणसेय सरस्वतीभवन' तः प्रकाशितस्य 'आनन्दकन्दचम्पू' पुस्तकस्य भूमिका पृष्ठे १७ मिते ।

पि स्फुटमवलोकयितुं शक्यते तत्र दानवर्णने 'आनन्दकन्दचम्पू' सूक्ति यथा-

'चाञ्चल्यानां प्रपञ्चं मनसि विगणयन् प्राञ्जमञ्जन् विवेकं
यस्मैकस्मै प्रयच्छन् विदधदिव रुषा तस्य दोषस्य दण्डम् ।
सुधानावीरसिंहस्मृतिशरणवतोऽप्यच निद्रादरिद्रां
लक्ष्मीं प्रक्षीणलौल्यामकृतनसतिषु त्यागदण्डा हि नार्यः ।। ८।२५

'भारतचम्पू' काव्यसूक्तिर्यथा -

'सर्वेषु वर्णेष्वपिदातुरस्मात्संप्राप्तवत्स्वर्थमवातशत्रोः ।
नवर्ण एकस्तु कदापि लेभे नार्थं क्रतूनामिह सार्वभौमे ।।' ४।१३

अत्र 'राज्ञोऽर्थं सर्वेऽपि प्रापु'रित्यर्थे समानेऽपि प्रसादगुणस्य-अलंकारचमत्कारस्य च तारतम्यं काव्ययोरनयोः स्फुटमेव । यदि 'आनन्दकन्द' चम्प्वामुत्प्रेक्षाया अर्थान्तरस्य विच्छित्तिः, तर्हि 'भारतचम्प्वां श्लेषमूलाऽभेदातिशयोक्त्योर्व्याजस्तुतेश्च चमत्कारः काममप्यपूर्वं रमणीयतामुर्वरयति । 'आनन्दकन्दचम्प्वाम्' अन्यत्रलेखनमुद्रणादोषेस्वीकृतेऽपि 'सुधानाम्' इति पदस्य साकाङ्क्षतातिष्ठत्येव ।

यशोवर्णने 'आनन्दकन्दचम्पू' सूक्तिर्यथा -

'भिन्दन्कुम्भीन्द्रमेन्द्रं दिशिविदिशि समुल्लिप्तमुक्ताकलापैः
शक्राद्याचालवीचीकरकटिधियाघ्रातपाथोधिपाथाः ।
रंहोभिर्लङ्घमानः करिणा इति गिरीन् नामिताऽहीन्द्र मूर्च्छ-
ब्रह्माण्डोपर्युदञ्चन् परिमृशति यशः केशरीन्द्रं करीति ।।' ८।२४।।

'भारतचम्पू' काव्यसूक्तिर्यथा -

'उपेत्यतांपाण्डुरुदारविक्रमः प्रजामनः पल्लवयन् प्रशासनात् ।
यशः प्रकाशैर्यमुना सखीसखैर्निनाय लोकं निजनामवाच्यताम् ।। १।१२

यथा च -

'तदनुविधिवदुपनीतानां क्रमेण मधुरेण वयसाशिरसा च विधृतवपुषां विनयगौरवपुषां सकलासु कलासु कौशलमुन्मीलयतां तेषां यशांसि बलभेदनमदावलस्य धाम्नोयुगलमप्युगपदुल्लङ्घयामासुः ।।' प्र०स्त० ६७

अत्र 'आनन्दकन्दचम्पू' काव्ये रूपकातिशयोक्तिचमत्कारे सत्यपि-यश:केशरिण ऐन्द्रकुम्भीन्द्रभेदनं कियत्संगतमितिचिन्त्यम् । मुक्ताकलापाश्च-तेन कुत: प्राप्ता: , किं रूपेण वर्तमानाश्चेत्यपि संगतिसाकांक्षामेव ।

एतादृशासंगत्या वर्णनं मिथ्यात्वस्यैव भाति प्रतिभास: । किन्तु 'भारतचम्पू' काव्ये उपमापर्यायोक्तातिशयोक्तीनां यथासंख्यश्लेषातिशयोक्तीनां यमकच्छेकवृत्त्यनुप्रासानां च कियान् रुचिरो विन्यास इति सहृदयहृदयै: संवेद्यमेव ।

अलं पल्लवितेन, काव्ययोरनयोरेतावतैवस्फुटमेवतारतम्यम् ।

(६) भारतचम्पूकाव्यस्य श्रीनिवासविलासचम्पूकाव्येन तुलना

श्रीनिवासविलासचम्पूकाव्यस्यरचयिताकविर्वेङ्कटेशो वेङ्कटाध्वरी-वा कदाऽजायतेति प्रमाणाभाव न निश्चितम् । तथापि षोडशशताब्दयनन्त रमाविष्णुचम्पूकाव्यकर्तृषु डा० छविनाथेनायं परिगणितं(१) एकादशशताब्दी जातात् 'भारतचम्पू' करादर्वाचीन एव तिष्ठति ।

वेङ्कटेश: स्वचम्पूकाव्यस्यान्ते 'इति श्रीमन्निखिलश्लिष्टका-व्यरचनाधौरेय कविचूडामण्डितमुकुटललामावलीनीराजितचरणायुगलश्रीमद्वेङ्कटाध्वरिविरचितायां श्रीनिवासविलासमिधाशालिन्यां चम्प्वाम्' इत्यादिलि खन् स्वं श्लेषकवीनां गुरुं प्रकटयति, सन्ति च तस्य श्लेषगुरुत्वानुरूपाणि श्लिष्टानि गद्यानि पद्यानि च किन्तु -

'चपलाक्षि, अस्याश्चतरोरालवालाभरणमिवदाणम् । श्रान्तासि । अहमपि कश्चित्पान्थक: । कासित्वम् ? क्व यासि ? किं ते पाणौ ? इति तामभिधाय तयाऽपि तत्काललब्धपरिचयया तथाऽस्त्वति जल्पन्त्या-' पृ० ६६

'राजन् सैवेयं पद्मावती, स एव श्रीनिवास: । तयोरुचितएव सम्-सम्बन्ध: । कोऽत्र सन्देह: ? किं विलम्बेन । लिख्यतां लग्नपत्रिका । पृ० ११२

---

१ 'चम्पूकाव्यों का आलोचनात्मक एवं ऐतिहासिक अध्ययन पृ० २०६

एतादृशानि कथाख्यायिकानुकूलानि वाक्यवाक्यान्यपि प्राप्येरन् प्राचुर्येण । ईदृशानि गद्यानि 'भारतचम्पू' काव्ये अपवादरूपेणाऽपि क्वचिन्न प्राप्येरन् । संवादरूपाण्यपि गद्यानि 'भारतचम्पू' काव्ये -

'राजन् ! पुरा खलु पितामहपितामहसमानस्य निशान्तमधिवसतः कृशान्तुतुल्ततान्तपसावहतोऽपि दिशान्तातिषु निशान्तरविक्रान्त भृशान्तर्गुरुवान्तर्गुरुपरम्परान्तरलम्पतोऽशान्तमनसोमुनेरुपानतपरिचरणाय मामनुशासितरशैशवयौवराज्यामपि नियोज्यामकरोत् ।।' १।३८

एतादृशानि शब्दार्थालंकारचमत्काररुचिराण्येव प्राप्येरन् ।

काव्यस्य प्रयोजनेषु(१) काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये सद्यः परनिर्वृतयेकान्तासंमिततयोपदेशयुजे' इत्यादिरूपेणाप्रकटीकृतेषु शीलसदाचारशिक्षणमप्येकं काव्यप्रयोजनम् । किन्तु श्लेषप्रकाशनलोभेन तदुपेक्षमाणो वेंकटेशो लिखति-

'द्वितीयः- सदाश्लेषविचक्षणौ भवानिति द्रष्टुमुत्कण्ठितं नश्चेतः । तच्छ्रुत्वा साहित्यसारमञ्जूषाकमलिनी प्राह- न केवलं वचसामेव, किन्तु वनितानामपि ।' (पृ०१०२) ईदृशेन चापल्येनौच्छृङ्खल्येन च पुरुषमध्यगतायास्त्रियाः कस्याश्चित् किमेतादृक् कथनं कवेः शीलसदाचारशिक्षणानुरूपम् ? एतादृक् कथनं तु कुट्टन्या एव संभवेत्, न तु राजसेविकायाः । अस्तु !

सम्प्रति समीक्ष्यतां तारतम्यमनयोः श्लिष्टकाव्ययोरपि । तत्र 'श्रीनिवासविलासचम्पू' काव्यस्य गद्यं यथा-

'यस्तु स्वस्यैव चरणवत् कमलोल्लासं दधानः, जंघावच्छरधिगम्भीरः उदरवद्वलिविभ्रमशाली, नाभिवदात्मभूनिदानपद्मोपगूढः, भुजवत्सद्वृत्तशोभितः करवत् स चक्रनन्दकः, वक्षःस्थलवत् कान्तया श्रियोल्लसितः, कण्ठवत्सन्मालालंकृतः -' (पृ)२)

'भारतचम्पू' काव्यस्य गद्यं यथा-

---

१ 'काव्यप्रकाश प्रथमोल्लास द्वितीयकारिका

'ततस्ते वन्याशनैर्धन्या धारितवसुधासुधाशनाकृतयः प्रावृषमिव बकबलाक्रान्तां पातालभुवमिव प्रत्यहं प्रवर्धमानबलिशोकार्मघुराज्यसीमामिव सूर्यतनयाऽनुकूलप्रतिष्ठां रविरथाद्घुरमिवैक चक्रां पुरीं क्रमादाक्रम्य कस्यचिद् गृहमेधिनो गृहमध्यमेत्य सुखमध्यवात्सुः ।।'

एवं श्लेषेण निबध्यमानापि नायकस्य स्वकरचरणाद्युपमा 'श्रीनिवासविलास' चम्पूकारस्य यदि न रुचिरा, तर्हि 'भारतचम्पू' कारस्य-पुरीवर्णने योजिता श्लिष्टोपमा अतीव हृद्या । तथा श्लेषनिबन्धनाय संरम्भं प्रवृत्तोऽपि 'श्रीनिवासविलासचम्पू' कारस्य निगुम्फस्य संगतिमपि नापेद्यते, यतो हि 'नायके शरधिगम्भीरत्वस्य संगतावपि जंघायां तस्य नास्ति संगतिः कथंचित्, एवं शब्दश्लेषनिबन्धप्रवृत्तस्य तस्य 'नाभिवदात्मभूनिदानपद्मोपगूढः' इत्युपमानिगुम्फो यदि न शब्दश्लेषस्तर्हि प्रक्रमभंगः, यदि च टीकाकारानुसारम् 'आत्मभू-पद्म' ति शब्दानेकार्थत्वमादाय शब्दश्लेषस्तर्हि एकार्थस्य संगतावप्यपरार्थस्यासंगतिस्तिष्ठत्येव । जंघोदरादिषुशरधिगम्भीरादिविशेषणानां च लिंगविपर्ययेणैवान्वय इत्यन्यत् ।

'श्रीनिवासविलासचम्पू' काव्ये कवेर्नायिकचाटुकारित्वंतन्नर्मसचिवत्वं कौतुकपूर्णवाक्केलिकारित्वं वा श्लेषेषु अतिशयोक्त्यादिषु च दृश्यते। श्लेषवर्णिका तादृशी दृष्टैव गवगुम्फिता, सम्प्रति पद्यनिबद्धातिशयोक्तिवर्णिकादृश्यतां वेंकटकवेः, विरहे करयुगलतापं वर्णयन् लिखति कविर्यथा-

'यस्मिंस्तामरसभ्रमेण मिलितैर्भृंगैः पतंगायितं
संस्पृष्टैर्मणिपञ्जकीरनिकरैः संपातिपक्ष्यायितम् ।
केली पुत्रिकयाऽपि दिव्यरमयश्रीरामकान्तायितं
लेपार्थं कलितैश्चचन्दनरसैरामोदधूपायितम् ।।' ३।५५

अत्र नायिकाकरयुगलतापेन भृंगकीरकेलिपुत्रिकादीनां ज्वालालीढदीप्तत्वं वर्णयति कविः ।

'भारतचम्पू' कारश्च - यथा-

'युद्धारम्भभटार्भटीपिशुनतामुद्भामयन्तस्तदा

निःस्वाणादिमजैत्रवाद्यनिनदा निर्धूतशब्दान्तराः ।
भ्रान्तिदौष्टुभिवाऽतिदूरपदवीसंपादितामम्बुधे-
र्वेलाशैलमहागुहासु विविशुर्व्याप्तासु धाराधरैः ।।' ६।१४।

यथा च -

'तीक्ष्णैः प्रत्यर्थिमल्लैरपहृतशिरसां हस्तिपानां शरीरा-
दुत्क्रान्ताः प्राणवाताः करिमदपयसां सौरभीमुद्वहन्तः ।
पायं पायं कपोलस्थलकुचकलशस्वेदवारिप्रवाहं
चक्रुः संमर्दभाजां दिवि सुरसुदृशां तालवृन्तस्य कृत्यम् ।।' ६।२६

स्वकाव्ये क्रमशः पटहारवस्य सागरपर्यन्तव्याप्तत्वं हस्तिपकप्राणवातानां च सुरसुन्दरीतालवृन्तकृत्यसंपादकत्वं वर्णयति । कविभ्यामुभाभ्यामपि अतिशयोक्तिप्रयोगः स्वस्ववर्णने विहितः, किन्तु स यदि 'श्रीनिवासविलासचम्पू'निर्मातारस्य मिथ्यात्वबोधनेन नायिकोपहासायैवपरिणमति तर्हि 'भारतचम्पू'कारस्य अपेक्षितमतिशयं प्रत्याययन् रुचिरत्वं सम्पादयति वर्णनस्य ।

अलं मुधा विस्तरेण, विश्लेषणेनैतावतैव काव्ययोरनयोस्तारतम्यं स्फुटीभवत्येव ।

(५) अनन्तभट्टकालिक्यः परिस्थितयः

अनन्तभट्टकालिकपरिस्थितीनामवलोकनाय एतद् विज्ञातव्यम्, यत् - विविधपरिस्थितीनां बोधिकाया विविधा उपलब्धयो भारतचम्पूकाव्ये प्राप्यन्ते ता मूलतो द्विविधाः सन्ति, विशेषाः सामान्याश्च । तत्र युधिष्ठिरादिमहाभारतीयविशेषपात्रसम्बन्धित्वेन वर्णिताः तदतिरिक्तसामान्यपात्रसम्बन्धित्वेन वर्णयितुमशक्याया राजसूयादिकार्याणां उपलब्धयः प्रा

प्यन्ते,तास्तु महाभारतकालिकीमेव परिस्थितिं बोधयन्ति, यस्या प्रदर्शनस्य नात्रावसर:, महाभारतीयसमीक्षायामेव तस्या: प्रदर्शयितुमुचितत्वात् । किन्तु यानि कार्याणि महाभारतीय प्रमुखपात्रातिरिक्तसामान्यजनसम्बन्धित्वेन - वर्णितानि, अथवा तत्सम्बन्धित्वेन वर्णयितुं शक्यानि युधिष्ठिरादिगतत्वेनापि वर्णितानि,तै: अनन्तभट्टकालिकी परिस्थिति: सुतरामनुमातुं शक्या। यतो हि युधिष्ठिरादि सम्बन्धित्वेन वर्णितानि तदीयानिविशिष्टानि कार्याणिराजसूययागादीनि महाभारतकालिकीमेव परिस्थितिं बोधयन्तु, - किन्तु तैरपि यानि गुरुजनवन्दनादीनि सामान्यजनसम्बन्धित्वेन वर्णयितुं-शक्यानि कार्याणि कृतानि, तेषां प्रकारास्तुदेशकालादिपरिस्थित्यनुसारिणो विविधा भवितुं शक्नुवन्त्येव । तथैव तदतिरिक्तसामान्यजनसम्बन्धित्वेन अतिथिजनसत्कारादि कार्याणां प्रकारा देशकालानुसारिणोविविधा-भवितुं शक्नुवन्ति । अत: सामान्या: कार्यव्यवहारा: भारतचम्पूकाव्ये देश-कालानुसारिणो निबद्धास्तल्लेखनकालिकीमेवपरिस्थितिं बोधयन्ति ।

अत्र तैस्तै: सामान्यव्यवहारैर्विबुध्यमानाकविकालिक्योधार्मिकसामाजिकराजनैतिकादिपरिस्थितय: क्रमश: उपस्थाप्यन्ते । तत्र-

(१) धार्मिकी परिस्थिति:

अनन्तभट्टसमये मुहूर्तानां परिपालनं सावधानतया क्रियतेस्म । तत्र विवाहमुहूर्तस्यानुसरणं यथा-

तस्या: सखीषु सकलास्वपि तत्वदेषु  
वेगाद्विभूषितवतीषु विवाहवेषै: ।  
कालक्षया सहनवृद्ध पुरोहितानां  
कोपस्य पात्रमभवत्कुचशिल्पकर्त्री ।। २।६६

अत्र कुचशिल्पेन मुहूर्तातिक्रमणसंभावनया पुरोहितानां कोपो दर्शित: ।

तदानीं होमवेदिकाः कुशैः परिस्तीर्यन्तेस्म, यथा-

' पूतपार्श्वैर्कुशांकुरैः पुरस्तान्मणिकुट्टिमे ।
प्राज्ज्वलतस्य धौम्यस्य प्रतिबिम्ब इवाऽनलः ।।' २।६८

अत्र होमवेदिकां परितः कुशपरिस्तरणं प्रदर्शितम् ।

एवमेव वैदिकविध्यनुसारिणः समिधां होमाः, वरवध्वोरग्निपरिक्रमणं वध्वा अश्मारोहणम् लाजाहोमश्च, कविसमये जायमानं वैदिकविधीनां सम्यक् परिपालनं बोधयन्ति ।

इदानीं शवस्पर्शे कदाचित् प्राक्तराद्यौनकमपिदोषं पश्यन्ति, किन्तु कविसमये सोऽयं दोषः परिहरणीयो मन्यतेस्म, यथा-

' तं विकृष्य पुरसीम्नि निशीथे
तत्क्षणात् कुणपमर्शनि दोषम् ।
मार्ष्टुकाम इव मारुतसूनु-
मातुरन्धिमुप सेवितुमागात् ।।' २।५३

अत्र शवस्पर्शे दोषो दर्शितः ।

(२) सामाजिक परिस्थितिः

---

कविसमये कालज्ञानं ज्यौतिषिकजनकृतघण्टानादेनक्रियतेस्म, यथा-

' दीप्रैश्गारमणिभिर्दिवसायमानां
निश्चिन्वते मनसि यत्र निशां युवानः ।
कातान्तिकैरखिलकालनिवेदनाय
घण्टामणेरभिहतस्य घनारवेण ।।' १।६

अत्र कालज्ञानाय कातान्तिकानां घण्टानादो दर्शितः ।

कृतापूर्वकार्यस्य जनस्य महाजनैः क्रियमाणोऽभिनन्दने मन्त्रादातप्रयोगः क्रियतेस्म यथा-

' भवनमेत्य तदागृहमेधिनः

पवनजे प्रवणीकृत-मूर्धनि ।

प्रयुयुजे समभाशिषमव्रतैः

प्रमुदितः पुरि तत्र महाजनः ।।' २।५५

अत्र राघास-हनुमीमित्याभिनन्दने मन्त्रादातप्रयोगो दर्शितः ।

तदानीं शुभशकुनानां दर्शने साफल्यविश्वासो विधीयते स्म यथा-

' पयसा परिपूरितौ घटौ पथिपश्यन् पथिपाकशासनिः ।

कमलाङ्गकनीयसी-कुचौ कल्याभासकरस्थिताविव ।।' ३।५२

यथा वा -

' इति वाचमुपश्रुतिं द्विजातेर्हृदि कृत्वा सुधयेव निर्मितां ताम् ।

पथिमूलुरसधमव्यमाजः प्रतिर्ऽग्निलपुरं प्रतस्थिरे ते ।।' २।६०।

अत्र पयः-पूरितघटदर्शनेनउपश्रुतिवाक्श्रवणेन च मनोरथ-पूर्तिः संभाव्यते ।

तदानीं पुत्रोत्पादनं धर्मसाधनाय मन्यतेस्म , यथा-

' साधयेयमिति धर्मसंग्रहं संदधाति मिथुनं परस्परम् ।

आश्रये परमनेकजन्मनोरावयोरजनि पापसंग्रहः ।।' २।४०

अत्र धर्मसाधनाय पुत्रोत्पादन-प्रयासो दर्शितः ।

तदानीं द्विजा जीविकायैराज्ञां दानानि उपलभन्तेस्म, यथा-

' भोक्तुमन्नमपि सूपसमग्रंदोग्धुमप्यभिनवप्रसवा गाः ।

लप्स्यते द्विजगणोऽपि नतस्माद्वत्सलाद् दुहितुरुत्सवकाले ।।' २।५८

अत्र दानप्राप्त्यै द्विजानां राजोपस्थानं दर्शितम् ।

तदानीमतिथिसत्कारो महाजनानुसरणं च प्रीत्यै भवति स्म, यथा-

' यथाऽतिथ्यविधौ प्रीतः स पुरस्कुरुते स्म तान् ।

तथाऽध्वगमने तोऽपि तं प्रश्रयवशंवदाः ।।' २।६६

अत्र अतिथिसत्कारो महाजनानुसरणं च दर्शितम् ।

तदानीं स्त्रियः नासायां मौक्तिकं दधतिस्म, यथा-

' अधिनासिका-शिखरमाकलितं नवमौक्तिकं नरपतेर्दुहितुः ।

'शुशुभे मुखाम्बुरुहमध्यचरस्मित हंसिका जनिनभण्डमिव ।।' २।८६

अत्र स्त्रियाँ नासया मौक्तिकधारणं दर्शितम् ।

कर्णयोस्ताटङ्कं धारयन्तिस्म, यथा-

'ताटङ्के सरलमणिप्रभातरङ्गैरस्या मुखमभितस्तदा व्यभाताम् ।
मूर्तत्वंप्रकटमुपेत्य जागरूके वर्णौ द्वेन यन विपाठ्यौ रिवान्ते ।।' २।९१

अत्र वर्तुलाकारताटङ्कधारणं दर्शितम् ।

चरणौ लाक्षारागेण रञ्जयन्तिस्म, यथा -

'मातङ्गीडा मददां पुराङ्गनस्यास्तदा भाविषु वाल्लभेषु ।
एवं विचिन्त्येव भयेन पादे लाक्षाकृतं धाम पपात तन्व्या: ।।' २।९५

अत्र पदयो: लाक्षाद्रवेण रञ्जनं दर्शितम् ।

कुचयो रचिकश्मीरजादिरागेण पुष्पवल्ल्यादिरचनया मण्डनं रचयन्तिस्म, यथा-

'तस्या: सखीषु सकलास्वपि तत्पर्यङ्कं
वेगाद्विभूषितवतीषु विवाहवेषै: ।
कालदाघाऽसहनवृद्धपुरोहितानां
कोपस्य पात्रमभवत्कुचशिल्पकर्त्री ।।' २।९६

अत्र केशरद्रवेण स्त्रिया: कुचमण्डनं दर्शितम् ।

मृगमदतिलकं च धारयन्तिस्म, यथा-

'मृगमदतिलकं रराज तन्व्या
मुखशशिना महसा कलाङ्कितायाः ।
चिकुरमिषजुषो ऽपराधशान्त्यै-
नमितमपत्यमिवाऽन्धकारबन्धा: ।।' २।९९

अत्र स्त्रिया: कस्तूरिकातिलकधारणं दर्शितम् ।

तदानीं चोलस्त्रीषु स्वास्थ्याय शरीरप्रसाधनाय च शरीरे हरिद्रोद्वर्तनं प्रचलितमासीत्, यथा-

'अरुणां प्रचारादतिवर्तमानमालोकमालोकमसौपयोधिम् ।
तटेन गच्छंस्तरसोपलेभे चोलीहरिद्रासुरभीन् समीरान् ।।' ३।३४

अत्र चोलदेशस्त्रीणां हरिद्रोद्वर्तनं दर्शितम् ।

तदानीं स्त्रीषु पुरुषाणां सम्मुखे लज्जया मौनस्य शाठ्यामुखावरणस्य चाऽभाव आसीत्, यथा-

'निर्कुञ्चिते तेन धृता निजाङ्के विपञ्चिकामौनमवाप्य तस्थौ ।
पाञ्चालिकावन्दनवादशैलीमाधुर्यमाकर्ण्य विलज्जितेव ॥' ३।६

अत्र वन्दने स्त्रियाः वाक्प्रयोगो दर्शितः ।

तदानीं पितृवन्दने तच्चरणस्पर्शो विधीयते स्म, यथा-

'नाकमेत्यथ पुरङ्कितदोष्णा नाथको दिविषदामतिहृष्टः ।
नामफाल्गुन इति ब्रुवता स्वं नन्दनेन जगृहे पदयुग्मे ॥' ५।१

अत्र पितृवन्दने तच्चरणस्पर्शो दर्शितो हस्तेन

मातृवन्दने च 'पितुर्दशगुणं माता गौरवेणाऽतिरिच्यते' इति स्मृत्यनुसारं तच्चरणयोः शिरसैव स्पर्शो विधीयते स्म, यथा-

'आनतस्य पदयोरथ जिष्णोराशिषोऽनुपदमिन्द्रपुरन्ध्री ।
पारिजातकुसुमस्य परागैः फालसीमनि ललाम चकार ॥' ५।७

यथा च -

'स्वेदाम्बुभिर्निटिलजैः पदयोः पवित्रीमाद्री चकार सतया सह चापपाणिः
मोदाम्बुभिर्नयनजैस्तमियं च मौल्यौ विस्मेरचेतसि कुलालवधूसमाजे ॥' २।८४

उभयत्रापि अत्र मातृवन्दने तच्चरणस्पर्शः शिरसैव विहितो दर्शितः ।

गुरौ सभक्ति प्रणामो विधीयते स्म , यथा-

'पार्थमेव पुरतो निधाय ते कौरवास्तदनुसन्निधौ गुरोः ।
भक्तिनिर्भरनमन्निजं शिरः पार्थरस्तु परिभूति लज्जया ॥' २।११

अत्र गुरुवन्दने शिरोनमनं दर्शितम् ।

महर्षिषु विनयभूमा प्रदर्श्यते स्म , यथा-

'दृष्ट्वा नृपो देवमुनिं विनीतो मौलिव्रजां धूलिमधूलिवृन्दैः ।
सपक्ष्माघायतदङ्घ्रियुग्मं विपक्ष्मात्मानमयं व्यतानीत् ॥' ३।[illegible]

यथा च -

'तत्राऽथते सत्यवतीसुतस्य पादारविन्दात्प्रविसृत्वरीभि: ।
नखप्रभाभिर्नवपुष्पपंक्तीर्जटालतानां जनयाम्बभूवु: ।।' ४।५२
अत्र महर्षिवन्दने तत्पदयो: शिरोनमनं दर्शितमुभयत्रापि ।
तदानीं पुरोधस:स्वकार्ये पटवो भवन्ति स्म, यथा-
'विधिचोदनासुमणिदीपपट्टिका परित: स्फुरत्प्रतिकृतेश्च सुभ्रुव:।
उभयोर्विवेचनविधौपुरोधस: स्खलनं बभूव न तु मन्त्रतन्त्रयो: ।।' २।१०३
अत्र तदान्तीतनपुरोहितानां मन्त्रतन्त्रेषु स्खलनाभावो दर्शित: ।

(३) राजनैतिकी परिस्थिति:

कविनाऽनन्तभट्टेन चम्पूभारते महाभारतकथानां तथा संक्षेपो व्यधीयत, येन तदीयपात्राणां प्रमुखप्रमुखा एव घटनास्तत्र संकलिता अभूवन् । तथपि यत्र क्वचित् प्रमुखविशेषघटनातिरिक्ता: सामान्याचारा: कविना तत्पात्रसम्बन्धित्वेन वर्णिता: , सोऽपि कविकालिकराज्ञां प्रत्यक्षीकृता: सद्व्यवहारा: सदाचारा एव स्व कविना लोकशिक्षार्थं संकलिता: वेदितव्या:। तत्र राज्ञां यथाकालं स्वधर्मानुष्ठानम् , यथा-
'भगीरथपथानुसारिणी' तरङ्गिणीमुपगम्य तत्र पवित्रासु वीचिषु-सायन्तननियमाय कश्चेऽघमर्षणीर्जपन् मज्जनमकार्षीत् ।४।७।गद्ये ।'
यथा च -
'धर्मजन्मा तत:कर्म निर्माणाद्धर्मसोचितम् ।
सभां स भासुरां पौरैर्भूपैश्चापाद्यवेदिभि: ।।' ४।३२।
अत्र राज्ञ: सायं प्रात: कार्मिकं स्वधर्मानुष्ठानविधानं दर्शितम् ।
राज्ञां ब्राह्मणेषु विनयस्तद्वन्दनंच यथा-
'दृष्ट्वा मधुरस्मितोऽथ विजय: कृत्वासनादुत्थितिं
नत्वाङ्घ्री समवेक्ष्य भृत्यमिह मां ब्रह्मन् सहस्वदाणाम् ।
गावस्ते स्वयमाव्रजेयुरधुनेत्याश्वास्य दस्यून् पुर:
प्राविक्षन् मनसाततस्तु नृपते: शस्त्राय गेहं स्वयम् ।।' ३।१८

यथा च -

यथा च -

' द्विजप्रणामेषु नृपस्य लग्ना भूरेणुराजिर्भुज सीम्नि रेजे ।
' एकाधिकद्वादशहायनेषु दितिः कृशाङ्गी विरहादिवास्य ।।' १२।२७

अत्र द्विजप्रणामेषु पदयोः शिरोनमनं साष्टाङ्गपातश्च प्रादर्श्यत।

राजमृगया संरम्भो यथा-

' गहनमस्तशरारुमृगव्रजं कृतवताऽप्यमुनाजविवाजिना ।
मृगिरे हरयो मदशालिनो मनुजपेन गिरीशदरीशयाः ।।' १।२५

अत्र राज्ञो मृगयायै वाजिनमारूह्य गिरिदरीषु परिभ्रमणं सिंहान्वेषणं च दर्शितम् ।

नृपाणां विजितेभ्यः करादानम्, यथा-

' जग्रहनिग्रहपरः परश्रियां करैः कराग्रेण करेणुचंक्रमः ।
कुन्तीं शकुन्तीशरथो यथा रमां समुद्रकाञ्चीं च समद्रकन्यकाम् ।।१।१५

अत्र विजितनृपेभ्यः करग्रहणं दर्शितम् ।

नृपाणां दानपरता, यथा-

' अन्तर्भवत्कृष्णमृगाजिनाङ्कैः सुनिर्मलैः षोडशदानकीर्तैः ।
खण्डैरमुष्येन्दुकलाखिलात्रा मृषायमञ्चैरजनीतिवार्ता ।।' १।१४

अत्र राज्ञोदानपरतादर्शिता ।

नृपाणांप्रजारञ्जनं सर्वोपरिकार्यमासीत्, यथा-

' चित्रं चरित्रं जगतीतलेऽस्यनश्लाघयामासनरेषु को वा ।
स यत्स्वयं पाण्डुरपि स्वकेन गुणेन रक्तानकरोद समस्तान् ।।' १।१३

अत्र नृपस्य प्रजारञ्जनकार्यं प्रामुख्येन दर्शितम् ।

महोत्सवे राज्ञां महाराजायोपायनसमर्पणं तस्य च तान् प्रतिसत्कारभूमा यथा -

' --- समापिते सवनकर्मणि निर्मितावभृथाप्लवनमुपदात्वेन दत्तपूर्वाणि वित्तान्युत्तमर्णानिव पुनर्द्विगुणमिवग्राहितान् सर्वानुर्वीपतीन् प्रस्थापितवन्तं पौरवं तम् ---' ४।१६। गद्य ।

अत्र राज्ञां महाराजाय तदुत्सवे उपायनसमर्पणानि तेन च तेषां सत्कारातिशयः कृतो दर्शितानि ।

नृपाः स्वदुर्गप्राकारं परितः परिखां निर्मापयन्ति स्म, यथा-

"पङ्केरुहाणि परिखामवतीर्य यस्यां
प्राकारभित्तिमभितः परिवेष्टयन्ति ।
अन्तःस्थितिं विदधतामबलाजनाना-
मास्यानि केलिसलिलानि विलासभासा ॥" २।११

अत्र दुर्गप्राकारभित्तिमभितः परिखारचना दर्शिता ।

तदा युद्धे प्रयुज्यमानानि वाद्यानि, यथा-

"शङ्खान्दध्मुस्ताडयन्ति स्म भेरीश्चक्रुः पर्वतांश्चापनादान् विचक्रुः ।
सिंहादीनां क्षोभदां लालनीयैः युद्धारम्भे ते द्वयेऽपि प्रवीराः ॥२।१०६

अत्र युद्धे भेरीशङ्खवाद्यप्रयोगो दर्शितः ।

तदानीं युद्धे अवर्तिनलिकास्त्रप्रयोगो भवतिस्म, यथा-

"कालाम्बुदालिनलिकात् क्षणदीप्तिवर्त्या
संधुक्षितात्सपदि सध्वनि निःसरद्भिः ।
वर्षाश्मसीसगुलिकानिकरैः कठोरै-
र्धाराभियातिमवधीद् घनकालयोधः ॥" ३।५४

अत्र वर्तिकादीप्यमानानां नलिकास्त्राणां प्रयोगो दर्शितः ।

तदा युद्धे रथगजवाजिपदातीनामुपयोगो भवतिस्म तथा युद्धे समान एव योधनाय गृह्यते स्म , यथा-

"द्विरदं द्विरदस्तुरगं तुरगो रथिकं रथिकः पदगं पदगः ।
इतरेतरमेत्य रणं विदधे दिविनारदविस्मयनाकलहम् ॥" २।११०

यथा च -

धन्वी धानुष्कमारादसिभृतमसिमान्कुन्तिनं कुन्तधारी
चक्रास्त्रं चक्रहेतिर्गदिनमपि गदापाणिरन्योन्यमेत्य ।
स्वस्वास्त्राणां प्रयोगे दृढपरिचितमो हन्तृवध्यत्वशैली

साधारण्ये प्रतिष्ठामभिविदधुरमी द्वन्द्वयोधाग्रगण्या: ।।' ६।३१

अत्र समानवाहनानां समानशस्त्रास्त्राणामेव च तदानीं परस्परं युद्धं भवति स्मेति दर्शितम् ।

(६) भारतचम्पूकाव्यस्य व्याख्या ग्रन्था:

भारतचम्पूकाव्यस्य विद्वद्भिर्विहिता बह्व्यो व्याख्या उल्लिखिता: प्राप्यन्ते, तासु काश्चन अप्राप्या:, काश्चन च प्राप्या अपि अपूर्णा जीर्णशीर्णाश्च, काश्चन च पुन: पूर्णा मुद्रिता उपयोजनीयाश्च सन्ति ।

तत्र यास्तासामुल्लेखमात्रं प्राप्यते, न तु स्वरूपतस्ता: प्राप्या:, तासां परिचयोऽधस्तादुपस्थाप्यते -

१ सत्यमङ्गलरत्नखेट श्रीनिवासदीक्षितपुत्रेण राजचूडामणिना रचिता टीका, यस्या राजचूडामणिकृते 'काव्यदर्पण' नाम्नि अलंकार ग्रन्थ एव उल्लेख: प्राप्यते । (१)

२ मानवेदनामकदाक्षिणात्यविद्वद्भिरचिता टीका, यस्या उल्लेख: कृष्णमाचारियेण स्व ग्रन्थे कृतोऽस्ति (२)

३ मल्लादिलक्ष्मणस्वामिकृताटीका,

४ कुमारतातार्य कृता टीका,

५ अज्ञातविद्वत्कृता टीका च ; एतासां तिसृणामुल्लेखो डा०छविनाथेन कृतोऽस्ति स्वनिबन्धे । (३)

---

१ 'THEODOR AUFRECHT CATALOGS CTLGRM' इति नाम्न: सूची ग्रन्थस्यप्रपार्टे १०१ सं० पृष्ठे ।

२- 'हिस्ट्री आफ क्लासिकल संस्कृतलिट्रेचर पृ० ५११ सं० ।

३- 'चम्पूकाव्यों का आलोचनात्मक एवं ऐतिहासिक अध्ययन पृ० १२१

याश्च प्राप्या अपि भारतचम्पू काव्यस्य टीकाः अपूर्णा जीर्णशीर्णा वा सन्ति , तासां परिचयोऽधास्तादुपस्थाप्यते ।-

१ पीताम्बरसूरिकृता टीका तृतीय चतुर्थ सप्तमस्तबकेषु उपलभ्यमाना, या पूनास्थ 'भण्डारकर ओरियन्टल रिसर्च इन्स्टीट्यूट' पुस्तकालये-विद्यमानाऽस्ति हस्तलिखिता (१)

२ श्रीनिवासकृता वृत्तिः, यस्याः प्रथमस्तबकस्य प्रारम्भिक सप्तदशपत्राणि सन्ति, या च " वाराणसेय संस्कृतविश्वविद्यालयस्य सरस्वतीभवन' ग्रन्थालये सुरक्षिता विद्यते हस्तलिखिता । (२)

३ वेदान्तदेशिक पुत्रनरसिंहाचार्य विरचिता " सरस्वती विलास" नाम्नी टीका, तालपत्राङ्किता जीर्णशीर्णा च " वटोदरस्थ प्राच्यविद्या मन्दिरे' सुरक्षिताऽस्ति । (३)

४ नृसिंहसूनु नरहरिविरचिता पदचन्द्रिकाख्याव्याख्या, तालपत्राङ्किता जीर्णशीर्णा वटोदरस्थ प्राच्यविद्यामन्दिरे सुरक्षिताऽस्ति । (४)

५ नृसिंह-रचितायाः टीकायाः ५,६,८,९ स्तबकाः, ये तालपत्राङ्किता जीर्णशीर्णाश्च वटोदरस्थ प्राच्यविद्यामन्दिरे सुरक्षिता विद्यन्ते(५)

६ नृसिंहाचार्यविरचितायाः सरस्वती विलास" नाम्नी टीकायाः तृतीयः स्तबकः यो मद्रपुरस्थराजकीय पुस्तकालये सुरक्षितोऽस्ति (६)

७ कुरविराम-कृताटीका या मद्रपुरस्थराजकीय पुस्तकालये सुरक्षिता वर्तते । (७)

---

१ - भण्डारकरसूचीग्रन्थे अनुक्रमसं० ५०६ ए०बी०सी० १८८७-९१ ।

२ - सरस्वतीभवनसूचीग्रन्थे अनुक्रमसं० ४१२४४ ।

३ - प्राच्यविद्यामन्दिरसूचीग्रन्थानुक्रमसं० ६६९८ ए ।

४- प्रा०वि०म० सूचीग्रन्थानुक्रम सं० ६५९७ बी ।

~~५- प्राच्यविद्यामन्दिर सूची ग्रन्थानुक्रम सं० ६६२२,७०९७ ।~~

६- मद्रपुर सूचीग्रन्थानुक्रम सं-११२६।

७ - मद्रपुरीयसूचीग्रन्थानुक्रम सं० २१४,५१९,५९६ ।

~~७- प्रा०वि०म० सूचीग्रन्थानुक्रम सं० २९०६ ।~~

सम्प्रति प्राप्यासां मुद्रितव्याख्यानां परिचयोऽधस्तादुपस्थाप्यते।
मुद्रित व्याख्यासु -

(१) गजानन कृता व्याख्या

एका गजाननकृता 'अन्तःप्रवेशिका' नाम्नी व्याख्या प्रायेण अप्रचलिता वटोदरस्थ प्राच्यविद्यामन्दिरे द्रष्टुं शक्या । (१) सा टीका नाम्ना व्यपदिष्टाऽपि टिप्पणीमात्ररूपामन्तुं शक्या न व्याख्या । कतिचित्पद्यैः-सह व्याख्यायास्तस्या निदर्शनानि अत्रोपस्थाप्यन्ते यथा-

'अथोल्लास्य कुरूनेतान् हरिर्मार्त्स्यपुराधयौ ।
मन्दार प्रमुखान् कल्पान् वसन्त इव नन्दनात् ।।' ७।७४

पद्यस्यैतस्य व्याख्या 'उल्लास्य हर्षयित्वा' एतावन्मात्रा कियत् पर्याप्यते इति विचारणीयम् ।

यथा च -

'ततः सुराधीश्वरसूनुमुक्त ब्रह्मास्त्रभासाभृशधिक्कृतेन ।
अस्त्रेण सार्धं गुरुनन्दनस्यमन्दायमानद्युतिराससभानुः ,, १०।४१

पद्यस्यैतस्य व्याख्या 'सुराधीश्वरः इन्द्रः भाः तेजः द्युतिः कान्तिः भानुः सूर्यः' इति कतिचित्पदानां पर्यायोपस्थापनरूपा वाक्यार्थविबोधनाय कियत्प्रभवतीति विद्वद्भिराकलनीयम् ।

यथा च -

'जले मत्स्याम् दधानोऽपि स्थलेमवत्स्यान् विलोकितुम् ।
आगतोऽब्धिधरिवाभीकः कुरूणां ददृशे ततः ।।' ७।१६

पद्यस्यैतस्य व्याख्या 'अब्धिःसमुद्रः अनीकं सैन्यं ततः युद्धप्रान्ते-ति- इति । अत्र 'अब्धिशब्दस्तु क्लिष्टःपर्यायदानयोग्यश्चमन्यते, द्विरु-

---

१ प्रा०वि०म० सूचीग्रन्थानुक्रम सं० २६०६

पान्तो व्याख्या सापेक्षोऽवश्यपर्यायदानयोग्यो 'मत्स्य' शब्दश्चोपेक्ष्यते पर्यायदाने । एवं गजाननेन सर्वत्र कतिचित्पदपर्यायोपस्थापनमात्रेणैव सम्पादितं मन्यते टीकाकार्यम् ।

(२) रामचन्द्रबुधेन्द्र व्याख्या

द्वितीया व्याख्या राचन्द्रबुधेन्द्र कृता प्रचलिताऽस्ति । अस्यां व्याख्यायां उपयुक्ताः पर्याय शब्दाः, कोष प्रमाणवाक्यानि, शब्दानां व्युत्पत्तयः, व्याकरण प्रमाण सूत्राणि, पौराणिक कथानामपेक्षिताः सूचनाः, अलंकारध्वन्यादि विवरणानि च अपेक्षितानि दीयन्ते बुधेन्द्रेण। व्याख्यायामस्यां नृसिंह विरचितायाः व्याख्याया अपि बहुषु स्थलेषु कृताऽस्ति समीचीना आलोचना । किन्तु व्याख्यायामस्यां क्वचिदपशब्दा अपि प्राप्यन्ते, तत्रैकं यथा-

'अस्य थोल्लस्य कुन्तेतान् हरिमल्लिस्यपुराध्यो ।
मन्दारप्रमुखान् कल्पान् वसन्त इव नन्दनात् ।।' ७।७४

अत्र व्याख्यायाम् 'उल्लास्य' इति पदस्य पर्यायपदं 'सन्तोषयित्वा' इति समस्तमपि क्त्वान्तमुपात्तं बुधेन्द्रस्य 'समासेऽनञ्पूर्वे क्त्वो ल्यप्' इत्यनुशासन विरुद्धमेव ।

क्वचिदर्थोपस्थापनमप्ययुक्तमुपलभ्यते, यथा-

'प्रधनेऽद्भुतेऽपि निशिनारददृष्टेः प्रथमेतरा व्यलसदीति रुदग्रा ।
वनिता अपि त्रिदशनाथ नगर्यां वरणाश्रुं चिकुर एव बबन्धुः ।।' १९।८२

अत्र बुधेन्द्रेण 'प्रथमेतरा द्वितीया ईतिः आनन्दबाष्पाणां (वृष्टिः) व्यलसत्' इति व्याख्यायते, तदयुक्तम् 'अतिवृष्टिरनावृष्टिर्मूषकाः शलभाः शुकाः प्रत्यासन्नाश्च राजानः षडेता ईतयः स्मृताः' इतिस्मृत्यनुसारं द्वितीया ईतिः अनावृष्टिरूपा व्याख्यातव्या, रात्रौ युद्ध दर्शनाभावेन तज्जन्यानन्द बाष्पाणां वृष्टेर्नारदे अभावात् ।

क्वचित् यत्तच्छब्दाभ्यां परामर्शनीयमपि न परामृश्यतेऽस्याम्, यथा-

'इन्द्रात्मजातेन सुतेन स तेन गन्तुमीष्टे तुलामीश्वर एक एव ।
तृणायकृत्वा निजजीवनं यो युद्धाय तेन स्पृहयन्नुदस्थात् ।।' ११।२५

अत्र तयच्छब्दौ प्रथमान्तावपि तृतीयान्तावपि च । तत्र प्रथमान्त तच्छब्दस्य प्रथमान्तेनेश्वरशब्देन तृतीयान्त तच्छब्दस्य च तृतीयान्तेन इन्द्रात्मजातशब्देनैवाऽन्वयो युक्तः सामानाधिकरण्यात्, एवं यः ईश्वरः प्रथमान्त तच्छब्देनान्वितः, स एवेश्वरः प्रथमान्त यच्छब्देन परामर्ष्टुं शक्यः, न तु तृतीयान्त यच्छब्देन, यश्च इन्द्रात्मजातस्तृतीयान्त तच्छब्देनान्वितः, स एवेन्द्रात्मजातस्तृतीयान्त यच्छब्देन परामर्ष्टुं शक्यः, न तु प्रथमान्त यच्छब्देन, सामानाधिकरण्याभावात् । किन्तु एतद्विपरीतं बुधेन्द्रस्तृतीयान्त तच्छब्देनाऽन्वितमिन्द्रात्मजातं प्रथमान्त यच्छब्देन परामृशति, प्रथमान्त तच्छब्देनान्वितमीश्वरं च तृतीयान्त यच्छब्देन परामृशति । यथा-

'यतः य इन्द्रात्मजातः निजं जीवनं जीवितं तृणाय कृत्वा तृणप्रायं मन्वानः, येन शंभुना सह युद्धाय स्पृहयन् अभिलषन् ।' इति । शल्येन-स्वभागिनेयस्याऽर्जुनस्य ईश्वरापेक्षयापि महत्वाधिक्यस्यात्र प्रतिपिपादयिषितत्वात् तदेतद्व्याख्यानमसंगतमेव ।

क्वचित् तत्त्वार्थाकलनेऽप्यत्र दृश्यते जातो व्यामोहः, यथा-

'तत्रादृष्टौ करेऽस्या विविधवनभवं कन्दमूलोपहारं
दातुं लज्जापयोधैस्तलमभिमृगुर्मदारा मुनीनाम् ।
यस्य स्पर्शानुभावादविरतमुदितैः पायसैरेव दिव्यैः
किंचिद् भाण्डं वनान्ते तनुरतिथिजनस्याऽतनोदन्यथार्थाम् ।।' ५।७४

अत्र 'अन्यथार्थाम्' इति पदं 'तनुम्' इत्यस्य विशेषणं तन्वा एव अन्यथार्थत्वं बोधयति, तेन 'तनुम् अन्यथार्थाम् भिन्नरूपाम् अर्थात् अतनुं पीनाम्' इति पर्यवस्यति । भाण्डमिति पदविशेषणेन 'किंचिद्' पदेन 'अन्यथार्थाम्' इति कथंचिदप्यन्वेतुं न शक्नोति । किन्तु बुधेन्द्रोऽत्र व्यामुह्यन् लिखति व्याख्यायां, यथा- किंचित् अतिस्वल्पमपि भाण्डं अर्कदन्तं पात्रं वनान्ते अतिथिजनस्य तनुं शरीरं अन्यथा किंचित्विरुद्धः अर्थः महत्वात्मकः य

स्यास्तथोक्तां अतनोत् चक्रे ।' इति । अत्र बुधेन्द्रस्य दृष्टिः तन्वा विपरीतरूपत्वम् अर्थात् अतनुत्वं तनुगत- तनुत्व-प्रतियोगिकभेद विशिष्टत्वात्मकं तन्वां न पश्यति, पश्यति च ' अन्यथार्थाम्' इति तनुविशेषण पदानन्विते- भाण्डविशेषणकिंचित् पदार्थे ।

अत्र भाण्डविशेषणं किंचित्-पदमपि तस्य सामान्येन परामर्शायैव न तु भाण्डस्य अति स्वल्पत्व बोधनाय, तद्बोधनस्यात्राप्रयोजकत्वात् ।

क्वचिदर्थ प्रतिपादनेऽनौचित्यमपि दृश्यतेऽस्याम् । यथा-

' स्वस्य चेष्टा कथानया द्वितीयर्तुगुणज्ञया ।
न बभूवे तयोस्तत्र नयनानन्दिनोर्मिथः ।।' ३।६०

अत्र द्वितीयर्तुः कः ? इति विचारणीयम् । न तावद् ग्रीष्मः,- तस्य द्वितीयत्वे विनियामकाभावात् । न च वसन्ते सृष्टि स्मरणेन तद्वितीय ऋतुर्ग्रीष्म एवेति चेत् , व्यवहारे तथा प्रसिद्ध्यभावात् । प्रत्युत ' हेमन्तः- शिशिरोऽस्त्रियाम् , ------षडमी ऋतवः पुंसिमार्गादीनां युगैः क्रमात्' इति कोष प्रसिद्ध्यनुसारं शिशिरस्यैवद्वितीयत्वापातात् । मैवम्, पद्येऽत्र नद्या द्वितीयर्तुगुणज्ञता निवार्यते प्रदर्श्यते च प्रथमर्तुगुणज्ञता , प्रथमर्तुश्चात्र नदीवर्धकत्वेन तत्सम्बद्धो वर्षर्तुरेव , अत एव बुधेन्द्रः स्वयमपि वक्ति स्वव्याख्यायामेव ' वर्षासु सरिदिव तत्कथा ववृध इत्यर्थः' । इति । एवं यदि वर्षर्तुरेव नदी सम्बद्धत्वेन प्रथम ऋतुः , तर्हि ततो द्वितीयर्तुः शरदेव, तद्गुणो नदी कार्श्यकरत्वम्, तज्ज्ञया स्वचेष्टा कथानया न बभूवे अर्थात् चेष्टाकथानया क्षीणया न बभूवे , इति द्वितीयर्तुरत्र शरदेव पर्यवस्यति । अत एवोक्तं महा कविनाऽपि ' सरितः कुर्वतीगाधाः पथश्चाश्यान कर्दमान् ऋतुर्विडम्बयामास तं शक्तेः प्रथमं शरत्' इति । अत्र शरदो नदी क्षायकत्वं स्पष्टमुक्तम् । एवं सत्यपि बुधेन्द्रो पद्यमिदं व्याचक्षाणो लिखति, यत् - ' तयोः कृष्णार्जुनयोः स्वस्यान्योन्यस्यचेष्टा कथया वृत्तान्तकथनेनैवनया द्वितीयस्य ऋतोर्ग्रीष्मस्य गुणं शोषणं जानातीति ज्ञया न बभूवे न भूतम् ।' इति । तदेतदनुचितमेवार्थ प्रतिपादनम् ।

क्वचिदलंकारादिनिरूपणेऽनौचित्यम्, यथा-

" चित्रं चरित्रं जगतीतलेऽस्य न श्लाघयामास नरेषु को वा ।
स यत् स्वयं पाण्डुरपि स्वकेन गुणेन रक्तानकरोत् समस्तान् ।।" १।१३

अत्र व्याख्यायामुच्यते यत् - " श्लेषानुप्राणितो विरोधाभास - स्तदनुप्राणितस्तद्गुण इति श्लेष विरोधाभास संकर तद्गुणयोरङ्गाङ्गिभावेन संकरः ।" इति । तदसत् , " एकाधिकरणासंबद्धत्वेन प्रसिद्धयोरेकाधिकरण सम्बद्धत्वेन प्रतिपादनं विरोधाभासः" (१) इति विरोधाभासलक्षणानुसारं कयोरपि एकाधिकरणासम्बद्धत्वेन प्रसिद्धयोरेकाधिकरण सम्बद्धत्वेन प्रतिपाद नस्यात्राभावान्नात्र विरोधाभासः , नापि च " स्वगुणत्यागपूर्वकं स्वसन्निहित वस्त्वन्तरसम्बन्धिगुणग्रहणं तद्गुणः(२) इति तद्गुणलक्षणानुसारम त्र कस्यापि स्वगुणत्यागपूर्वकवस्त्वन्तरसम्बन्धिगुणग्रहणप्रतिपादनाभावात्-न तद्गुणः । अपितु अत्र - पाण्डु शब्दवाच्यराजविशेष-धावल्यगुणविशिष्टयोः रक्तशब्दवाच्यानुरागाऽऽरुण्यविशिष्टयोश्च श्लेषमूलकाभेदाध्यवसायेन पाण्डोः स्वकीयपाण्डुत्वगुणेन समस्तानां रक्तत्वापादन-प्रतिपादनेन कार्य-कारणयोः संसर्गस्या+(३)ऽननुरूपत्वप्रतिभासनात् " अननुरूपसंसर्गो विषमम्" इति लक्षणानुसारमत्र विषमालंकारः । तेन न पाण्डुचरित्रस्य चित्रत्वस्योपपादनात् " प्रकृतार्थोपपादकत्वेन विवक्षितोऽर्थः काव्यलिङ्गम्" इति (४) लक्षणानुसारं काव्यलिङ्गालंकारः । तेन च पाण्डोरितरराजापेक्षयोत्कर्षप्रतीत्या " उपमानादुपमेयस्य गुणविशेषवत्त्वेनोत्कर्षो व्यतिरेकः" इति (५)लक्षणानुसारं व्यतिरेकालंकारस्यात्र ध्वननाद् व्यतिरेकालंकारध्वनिः । तेन-च कविगतरतिभावस्य ध्वननाद् भावध्वनिः । उक्तालंकारध्वनीनां चाङ्गाङ्गि

---

१ रसगंगाधरस्य ५७० सं० पृष्ठे । (२) रसगंगाधरस्य ६६१ पृष्ठे
३ रसगंगाधरस्य ५६५ सं० पृष्ठे
४ रसगंगाधरस्य ५२७ सं० पृष्ठे
५ रसगंगाधरस्य ४६६ सं० पृष्ठे र

भावेन संकरो ।

एवं सत्यपि भूरिप्रयासलिखिता बुधेन्द्रस्य व्याख्येयं जिज्ञासूनां ग्रन्थबोधकत्वादुपादेयैव । अलंकारध्वन्यादिप्रतिपादनं तु अस्यामिवनान्यस्यां कस्यांचिदपि व्याख्यायामवलोक्यते ।

क्वचिदसंगतपाठस्वीकारोऽपि प्राप्यते , यथा-

'शबरत्वजुष:परस्य पुंस: शशिखण्डान्नुशकारसंविधानम् ।
भजति स्म तदा शिखण्डभावं भगवन्मस्तकभूषणं यदेष: ।।' ४।७०

अत्र बुधेन्द्रेण गृहीत: 'परस्य' इति पाठोऽसंगत: । भगवत: कवि कृतशबरत्वोपपादन विरुद्धत्वात् । भगवत: शबरत्वस्वीकारे तस्य शशिखण्डस्तु शिखण्डो जात: शशिखण्डस्य शिखण्डत्वे अवशिष्टस्तदीयशकारस्य च 'वर' शब्देन संयोगे भगवान् 'शबरो' जात: इति कवेरभिप्राय: । बुधेन्द्रानुसारं -'पर' शब्द पाठाङ्गीकारे तु शशिखण्डशकारस्य 'पर' शब्देन संयोगे भगवत: 'शपर' ता सिध्येत् , न तु 'शबर' ता । अतोऽनुचित एव 'पर' शब्दपाठाङ्गीकार: उचितश्च तत्स्थाने'शबरत्वजुषोवरस्यपुंस:' इति ।

क्वचिदसद्व्याख्यानमप्युपलभ्यते , यथा-

'स सिंहनादे सरित: कुमारे चापं समाकृष्यशरैर्विमुक्तै: ।
परान् वरीतुं प्रथमं प्रवृत्ते वरान् वरीतुं ववलेऽप्सरोभि: ।।' ६।३३

अत्र परान् शत्रून् वरीतुं वारयितुम्' इत्यादिव्याख्याति बुधेन्द्र:,- तदसत्,वृ धातोर्वरणार्थत्वात् न तु वारणा(निवारणा)र्थत्वात् । 'परान् शत्रून् वरीतुं लक्ष्यीकर्तुम्' इति तूचितम् ।

यथा च -

'आलापकालसमपल्लविताक्वणितासौरभ्यपातिमधुरुपारवसंकुलस्य ।
तंत्रीस्वनस्य रमितौ तरुणीस्वनस्यजानाति यत्र चतुरोऽपिनतारतम्यम्।।१।८

अत्र बुधेन्द्रो व्याख्याति 'पल्लवितायाः कुसुमितायाः इति यावत्, अन्यथा सौरभ्यानुपपत्ते: इति भाव: ।' तदसत् ,पल्लवितस्य कुसुमितत्वावाचकत्वात् । न च तथा व्याख्यानाभावेसौरभ्यानुपपत्तिरितिवाच्यम्, तरुणीजनस्य आलापेन मुखसौरभोद्गमलाभे तदनुपपत्तेरभावा----

त् । पल्लवितास्वनविशिष्टाकृता अंकवीणा यया तस्या सौरभ्यम् इत्यादि च व्याख्येयम् , अन्यथा तन्त्रीस्वनोपलब्धेरनुपपत्तिः । "उपेत्यतांपाण्डुरुदार विक्रमः प्रजामनः पल्लवयन् प्रशासनात्" (१।१२) इत्यादि चम्पूभारतीयपद्यस्य "पल्लवयन्" पदमिवात्र "पल्लवित" शब्दोऽपि लाक्षणिकः । यथा तत्र "पल्लवयन् रंजयन्" इति लक्षणाया तादृशोऽर्थः, तथाऽत्रापि "पल्लवित" शब्दस्य लक्षणया "स्वनविशिष्टा कृता" इत्यर्थः सूपपादः, तरुण्यामुखसौरभो पलब्ध्या तस्याः पद्मिनीत्वस्य ध्वनिरप्यत्रावगन्तव्यः ।

सेयं व्याख्या सोहमयीस्थे निर्णयसागर मुद्रणालये मुद्रितास्ति।
(यस्यां बुधेन्द्रः प्रतिमावधानो 'कुविकुलचन्द्र रामचन्द्रे ? लेनोल्लिख्यते)

(३) आचार्य रामचन्द्रमिश्र व्याख्या

---

भारतचम्पूकाव्यस्य तृतीया व्याख्या प्राचुर्येण प्रचलिता आचार्यरामचन्द्रमिश्रकृतास्ति । यद्यपि आचार्येण स्वकीया व्याख्या बुधेन्द्रव्याख्यां पुरस्तान्निधायैव लिखितास्ति , तथापि बुधेन्द्रव्याख्यापेक्षया तदीया व्याख्याऽऽधिक्येन समीचीनास्ति । यतो हि बुधेन्द्रमनुकुर्वन्नपि आचार्योऽयं तद्व्याख्यानं यत्र नाऽरोचत,तत्रासौ स्वरुच्यनुसारिणीं रुचिरां व्याख्यामकरोत् , अलंकारादिप्रतिपादनमपि च बुधेन्द्रस्य यत्र नास्य हृदयंगमंजातं तत्र-तद्यदि दुष्करमपश्यदसौ, तदातदत्यजत् सुकरं च यत्र तत्रासूचयत् । अथापि बुधेन्द्र मनुकुर्वतोऽस्याऽपि अलंकार प्रतिपादने व्याख्यायां नाऽसंगतयो द्रष्टुं शक्यन्ते । यथा -

उपर्युक्तस्य "चित्रं चरित्रं जगतीतलेस्य" (१।१३) इत्यादिपद्यस्य व्याख्यायां आचार्यो बुधेन्द्रप्रतिपादितस्य तद्गुणस्योल्लेखं त्यक्त्वापि तद्वत् विरोधाभासं तूल्लिखत्येव - "अत्र विरोधाभासोऽलंकारः , आभासत्वे विरोधस्य विरोधाभास इष्यते" इति लक्षणात् । इति तदेतद् विरोधाभासप्रतिपादनमप्यनुचितमेवेति दर्शितमेवोपरि ।

अपरंच उपर्युक्तस्य "इन्द्रात्मजातेन स तेन" (११।२५) इत्यादिप

घस्य व्याख्यायामपि बुधेन्द्रवत् आचार्योऽपि यत्तच्छब्दाभ्यां परामृश्यमपरामृश्यं अपरामृश्यं परामृशति । "यः अर्जुनः येन शिवेन सह" इति, तदेतद प्यनुचितमेवेति प्रतिपादितमेवोपरि ।

अन्यच्च उपर्युक्तस्य "स्वस्यचेष्टा कथानया" (३।६०) इत्यादिपद्यस्य व्याख्यायामपि आचार्यो बुधेन्द्रमनुकुर्वन् "द्वितीयर्तोः ग्रीष्मस्य" इति लिखति । अग्रे च ग्रीष्मस्य द्वितीयर्तुत्वं चोपपादयन् यत् लिखति "लङ्कानगर्यामुदयाच्च भानोस्तस्यैव वारे प्रथमं बभूव मधोः" इति भास्कराचार्योक्तिदिशा वसन्ते सृष्ट्यादिस्मरणेन ग्रीष्मर्तोः द्वितीयर्तुरूपता बोध्या" इति तदसांगत्यमपि दर्शितमेवोपरि ।

इतरच्च "ससिंहनादे सविधः कुमारे" (६।३३) इति पद्यस्य व्याख्यायां बुधेन्द्रवदाचार्योऽपि "परान् शत्रून् वरीतुं वारयितुम्" इति लिखति तद् वृ धातो वारणार्थ (निवारणार्थ) कत्वाभावादनुचितमेवेति प्रतिपादितमेवोपरि । वरीतुं लक्ष्यीकर्तुमिति सूचितम् ।

अन्यच्च "आलापकालसमपल्लविताङ्कवीणा" (१।८) इत्यादिपद्ये बुधेन्द्रवदाचार्योऽपि वीणायाः पल्लवितत्वं संजातपल्लवत्वंमन्यते, यथा - "पल्लवितायाः संजातपल्लवायाः (वसन्तरागे गीयमाने शुष्ककाष्ठेऽपि पुष्पाणि पल्लवाश्च जायन्ते इति संगीतविद्याप्रसिद्धिमनुरुध्यैत्थमुच्यते । अङ्कवीणायाः" इत्यादि । किन्तु वीणायाः पल्लवितत्वकथनेन पुष्पोद्गमोऽपि कथं तस्यां मन्यते ? यदि सौरभ्यानुपपत्तेः वीणायां पुष्पोद्गमोऽपि मन्तव्य इति चेत्, तर्हि तथानुक्त्वा "आलापकालसमपुष्पयुताङ्कवीणा" इति "आलापकालसमजातसुमाङ्कवीणा" इति वा पठित्वा तस्यां पुष्पोद्गम एव कथं नोक्तः ? वस्तुतस्तु आलापकालेनायिकाया मुखात् सौरभोद्गमोजात, इति न सौरभ्यानुपपत्तिः । पल्लवितशब्दस्य च लक्षणया स्वनविशिष्टा कृतेत्यर्थः, तेन तन्त्रीस्वरोपलब्धेरपि नानुपपत्तिः अन्यथा तन्त्रीस्वनोपलब्धेरनुपपत्तिः स्यादेवेत्यादि प्रतिपादितमेवोपरि ।

अथापि आचार्यस्य व्याख्या अधिकं शुद्धा समीचीना उपयोगिनी च । सेयं व्याख्या वाराणसीस्थे चौखम्बामुद्रणालये मुद्रितास्ति ।

## (४) नारायणसूरिकृताटीका

भारतचम्पूकाव्यस्य चतुर्थी टीका नारायणसूरिखण्डीपाडूविरचितोपलभ्यते । अस्याः प्रचलनं नास्त्यधिकम् , किन्तु आचार्य रामचन्द्रमिश्रटीकावत् नाधिकविस्तरमुररीकुर्वाणापि अपेक्षितलेखमत्यजन्ती ,सरला रुचिरा अधिकोपयोगिनी चास्ति । टीकेयं कदाचित् सूरिणा बुधेन्द्रस्य विस्तृतां क्वचिदसंगताम् क्वचिदस्फुटां, क्वचिच्च जटिलाम् अत एव छात्राणामहृदयग्राहिणीं टीकां विलोक्य चम्पूभारतस्य सरलस्य रुचिरस्य च व्याख्यानस्यापेक्षां विलोक्य विरचिता स्यादिति संभाव्यते । अथ सम्प्रति कानिचननिदर्शनान्यत्र तत उपस्थाप्यन्ते , यथा-

'सव्यसाचिहननायशरासे संहिते रविभुवा भुजगास्त्रे ।
नन्दनद्वितयवत्त्वममंस्त स्वस्य कल्पकवनेन सहेन्द्रः ।।' ११।४८

'कर्णेन सव्यसाचिनः अर्जुनस्य हननाय भुजगास्त्रे शरासे धनुषि संहिते सति कृतसंधाने सति इन्द्रः कल्पकवनेन कल्पवृक्षवनेन सह स्वस्य नन्दनद्वितयमेवास्तीत्यमंस्तमन्यते स्म । अद्यावधि जयन्तार्जुनौ वनं चेति नन्दनत्रितयमासीदिदानीमर्जुनवधेद्वयमेवावशिष्टमिति निश्चितवान् । अनेनास्त्रस्यापरिहार्यत्वं द्योत्यते ।'

एवं व्याख्येयं संक्षिप्ता सरला रुचिरा चास्त्येव । यथा च -

'शबरत्वजुषोवरस्य पुंसः शशिखण्डान्नुशकारसंविधानम् ।
भजतिस्म तदा शिखण्डभावं भगवन्मस्तकभूषणं यदेषः ।।' ४।७०

'शबरत्वं जुषते भजतेऽसौ शबरत्वजुट् तस्य वरस्य श्रेष्ठस्य पुंसः शिवस्य शशिखण्डात् पदात् शकारसंविधानं नु शकारयोगः किमु ? कुत एतदिति- चेत् तदा शबरत्वधारणसमये भगवतः शिवस्य मस्तकभूषणं एव शशिखण्डः शिखण्डभावम् अवशिष्टशिखण्डत्वं भजते धारयति । अयं भावः - सदाशिवस्य- वरपुरुषत्वमासीत् , तदामस्तके शशिखण्ड आसीत् । यदा शबररूपं तदा म-

स्तके शिखण्डी मयूरपिच्छमासीत् । तस्मात् बवयोरभेदात् वरपुरुषेण भगवता यदा शबरत्वं स्वीकृतम् तदा मस्तकभूषणशशिखण्डात् वरपदस्य शकारयोगेन शबर इति संज्ञा जाता मस्तकभूषणस्य अवशिष्टशिखण्ड इति संज्ञाजातेति ।

व्याख्यायामस्यां तत्त्वबोधनप्रयासे सत्यपि संक्षेपः सरलता चास्ति । अत्रभगवतः शबरत्व साधनाय जातायाः कविकल्पनाया अनुकूल एव ' वरस्य ' इति पाठोऽपि व्याख्याकृता स्वीकृतोऽस्ति ।

यथा च -

' स्वस्य चेष्टा कथानद्या नयनानन्दिनोर्मिथः ।
न बभूवे तयोस्तत्र द्वितीयर्तुगुणाज्ञया ।। ' ३।६०

' तत्र मिथः परस्परं नयनानन्दिनोः नयनसुखदायिनोः तयोः कृष्णार्जुनयोः स्वस्वचेष्टानां स्वस्वचरित्राणां कथैवनदी तया द्वितीयर्तोः ग्रीष्मर्तोः गुणस्य जलशोषकरणरूपगुणस्य ज्ञया ज्ञाज्ञया न बभूवे न जातम् । कथानदी-शुष्का न जाता , परस्पर स्वस्वचरित्र कथनं न समाप्त मिति यावत् । अनेन-स्नेहातिशयो द्योत्यते ।'

व्याख्यायामस्यां ' द्वितीयर्तोः ' इति पदस्य ' ग्रीष्मर्तोः इति व्याख्यां कुर्वता नारायणसूरिणा कदाचित् बुधेन्द्रस्य व्याख्यायां द्वितीयर्तोर्ग्रीष्मत्वं प्रतिपादितमवलोक्य उपपन्नत्वं चावधार्य स्वयं तदुपपादनमकृत्वा बुधेन्द्रवत् झगिति उक्तपर्यायदानमात्रमक्रियत, तेन बुधेन्द्र व्याख्यावलोकनं सूरेः सिद्ध्यति । अथापि व्याख्येयं बुधेन्द्रस्य आचार्यस्य च व्याख्यापेक्षया कियती संक्षिप्ता सरला रुचिरा चेति स्पष्टं भवेदेवतदवलोकिनां सुधियाम् । इत्यलं-विस्तरेण + व्याख्यायामस्यां ' दिगन्तरलुठत्कीर्तिः ' इत्यादि ' उन्मीलदम्बुज ' इत्यादि च पद्यद्वयं चम्पूभारतकर्तुः कवेरनन्तभट्टस्य प्रशस्ति वर्णनपरं ग्रन्थद्वादशस्तबकस्यैवान्तिमम्(३३-३४) द्वात्रिंशत् त्रयस्त्रिंशत्तमपद्यद्वयरूपेण ग्रन्थघटकत्वेन मुद्रितमस्ति, तेनोक्त पद्यद्वयस्यापि ग्रन्थकारकृतत्वं सूच्यते । व्याख्येयं-मोहमयीस्थे चन्द्रप्रकाशमुद्रणालयेऽस्ति मुद्रिता वडोदरप्राच्यविद्यामन्दिरे सुरक्षितास्ति(१)(टिप्पणी पर पृष्ठे)

भारतचम्पूसमीक्षणे आलोचकमत विमर्श:

एवं भारतचम्पूकाव्यस्य मुद्रितानाममुद्रितानाम्, पूर्णानाम-पूर्णानाम्, प्राप्यानामप्राप्यानां च बहुविधानां व्याख्यानां नैकविद्वद्भिरचितत्वस्योपलम्भात् विद्वज्जनप्रियत्वं सिद्धयति ।

## (७) आलोचकानां दृष्टौ चम्पूभारतम्

संस्कृत साहित्यस्येतिवृत्तं बहवो विद्वांस: स्वस्वरुच्यनुसार-मलिखन् । तेषु बलदेवोपाध्याय: ,द्विजेन्द्रनाथमिश्र: ,जयचन्द्रविद्यालंकार: , चन्द्रशेखरपाण्डेय: , विण्टरनिट्जश्च संस्कृतसाहित्यस्यविस्तृतमितिवृत्तं लिखितवन्तोऽपिभारतचम्पूकाव्यस्य स्पर्शमपिनाऽकुर्वन्, कदाचिदेतेषां दृष्टिगोचरतां भारतचम्पूकाव्यं नाऽऽयातंस्यात् , कतिचित् लेखकाश्च भारतचम्पूकाव्यविषये तद्विषयकविस्तरस्याकांक्षितत्वात्, तदीय पर्याप्ताध्ययनस्याऽकृतत्वात् ,तदध्ययनंकृतवन्तोऽपि च तदीयसौष्ठवरहस्यस्याऽऽकलयितुमशक्तत्वाच्च अतीवस्वल्पमपर्याप्तं च लिखितवन्त: ।

१ - तत्र ए०बी० कीथेन संस्कृतसाहित्यस्य विस्तृतमितिवृत्तंलिखितम् । तदनुवादो डा० मङ्गलदेवशास्त्रिणाविहित: । तस्मिन् भारत-चम्पूकाव्यस्य उल्लेखमात्रम् प्राप्यते । (२)

२ - वाचस्पतिगैरोला अपिस्वलिखिते संस्कृतसाहित्यस्य इतिहासे भारतचम्पूकाव्यस्यनाम्न उल्लेखमात्रं करोति । (३)

अनेन लेखकयोरेतयोश्चम्पूभारतविषये किमप्यधिकलेखनमनभीष्टमेवाऽऽसीदिति तल्लेखाभ्यां स्पष्टीभवति ।

---

पूर्वं पृष्ठस्यावशिष्टम् (१) प्रा० वि० मं० सूचग्रन्थानुक्रमसं० ४६१४ ।
(२) 'संस्कृत साहित्य का इतिहास' पृष्ठे ३६७ मिते ।
(३) 'संस्कृत साहित्य का इतिहास' पृष्ठे ६११ मिते ।

३ - हंसराजोऽग्रवालः स्वकीये " संस्कृतसाहित्येतिहासः " इतिनामके ग्रन्थे कतिचिदन्यचम्पूकाव्यैः सहभारतचम्पूकाव्यमपि हीनगुणं वर्ण-नानर्हं च प्रकटीकरोति , (१) तेन तस्य स्वोल्लिखितचम्पूग्रन्थानां सौष्ठवरहस्याकलनाशक्तत्वं स्पष्टीभवति , यतः तदुल्लिखित चम्पूनां सौष्ठवगुणास्यमहिमा सहृदयविद्वज्जनसंवेद्यता प्रसिद्धिश्च चकास्तितरां सुतराम् ।

४ - शान्तिकुमारनानूरामव्यासोऽपि स्वग्रन्थे " भारतचम्पू " काव्यस्य अतिशयोक्तीः स्वानभ्यस्ता मन्यमानः मार्मिकविद्वज्जनैः प्रशंसितस्य भारतचम्पूकाव्यस्य सूक्ति चमत्कारान् ग्रहीतुमशक्तं स्वं स्वयं प्रकटयति। (२)

५ - डा० भोलाशंकरव्यासश्च " संस्कृतकविदर्शन " नाम्नि स्वनिबन्धे " भारतचम्पू " काव्ये गद्यापेक्षयापद्याधिक्य मनपेक्षितमन्यते, तेनतस्य भारतचम्पूगतपद्यविषयिण्यरुचिः तथा च तस्य " भारतचम्पू " काव्यविषयकस्य समनोयोगमध्ययनस्याभावः स्पष्टीभवति । (३)

६ - वरदाचार्येणापि संस्कृतसाहित्यस्येतिवृत्तं न्यबध्यत ,तस्यानुवादो डा० कपिलदेवद्विवेदिना कृतः " संस्कृतसाहित्य का इतिहास " इतिग्रन्थरूपेण प्राप्यते, तस्मिन् " भारतचम्पू " काव्यान्तस्थितप्रशास्तिपद्यद्वयमाश्रित्य अनन्त भट्टं यशस्विनं मधुर काव्य प्रणेतारं च मन्यतेतेन परकीयसम्मतिमात्रमुल्लिखतो वरदाचार्यस्यापितदनध्ययनं स्पष्टम्। (४)

- - - - - - - - - - - - - - - - - - - - - - - - - -

(१) " संस्कृत साहित्येतिहासः " पृष्ठे २५ मिते।
(२) " संस्कृत और उसका साहित्य " ग्रन्थपृष्ठे १२६ मिते।
(३) " संस्कृत कविदर्शन " ग्रन्थस्य पृष्ठे ५१६ मिते ।
(४) " संस्कृत साहित्य का इतिहास " ग्रन्थस्य १८२ पृष्ठे ।

७ - डा० विनायकवामन करंबेलकरः स्वकीये इतिहासग्रन्थे भारतचम्पू काव्यं काव्यदृष्ट्या रमणीयं मन्यते, तेन लेखकस्य भारतचम्पूकाव्यविषयकमध्ययनं तदीयसौष्ठवाकलनं च स्पष्टीभवति। (१)

८ - आचार्य रामचन्द्रमिश्रः स्वकीये संस्कृत साहित्येतिहास इतिनामके ग्रन्थे। भारतचम्पूं काव्यदृष्ट्याश्लाघनीयां मन्यते। सहैव तदीयानां पद्यानां गद्यानांचमाधुर्यं श्लेषपूर्णत्वं च हृदयावर्जकम् प्रकटयति। मन्ये भारतचम्पवारामणीयकेनाकृष्टेनैवाऽनेन व्यधीयत व्याख्यानमपितस्याः। (२)

९ - डा० छविनाथत्रिपाठी "चम्पूकाव्य का आलोचनात्मक एवं ऐतिहासिक अध्ययन" नाम्नि स्वनिबन्धे भारतचम्पूकाव्यस्य विस्तृतामालोचनां लिखितवान्। यस्यामसौ भारतचम्पूकाव्यस्य लोकप्रियतां साधयति। काव्येऽसौ प्रकृतेश्चित्रणं नितान्तं भव्यं मनोरमं यथार्थं च कृतं मन्यते। वसन्तवर्णनं ललितमधुरं युद्ध वर्णनं चाद्भुततमं कृतं प्रकव्यति काव्ये परिस्थित्यनुसारं प्रसादमाधुर्यौजसांस्थितिं सरलतां सरसतामलंकाराणां च मनोहारिणींसुषमां समुल्लसन्तीं स्वीकरोति। कवेश्च परमं पाटवं प्रकटीकरोति। तेन भारतचम्पू काव्यस्य समनोयोगमध्ययनं तदीयं स्वीकर्तव्यं भवति। (३)

१० - एम०कृष्णमाचारियस्स्वनिर्मिते "हिस्ट्री आफ क्लासिकल संस्कृत लिट्रेचर नाम्नि निबन्धे अनन्तकवेः परमं प्रौढत्वं तदीय भारतचम्पू काव्यस्य च प्रभूततम सम्मानास्पदत्वं स्वीकरोति। (४)

---

(१) "संस्कृत साहित्य का सोपपत्तिक इतिहास" ग्रन्थस्य १९८पृष्ठे।
(२) "संस्कृत साहित्येतिहासः" ग्रन्थस्य १४७ पृष्ठे।
(३) ""चम्पूकाव्य का आलोचनात्मक एवं ऐतिहासिक अध्ययन" ग्रन्थस्य ११८,११९,१२०,१२१ पृष्ठेषु द्रष्टव्यम्।
(४) "हिस्ट्री आफ क्लासिकल संस्कृत लिट्रेचर" ग्रन्थस्य ५११ सं०पृष्ठे।

भारतचम्पू समीक्षणे आलोचकमत विमर्श :

एवं संस्कृतसाहित्येतिवृत्तलेखकेषु केचित् भारतचम्पूकाव्यस्य स्पर्शमपि न कुर्वन्ति, तर्हि केचित् स्पर्शं कुर्वन्तोऽपि समय लेखनेनैव कृतार्थमात्मानं मन्यन्ते, अपरे केचित् संसरम्भं तदालोचनायां प्रवृत्ता अपि तदीयरहस्याकलनाशक्तत्वात् विपरीतं लिखन्तः स्वकीयमज्ञानमशक्तत्वं च प्रकटयन्ति, तर्हि याथार्थ्येन विद्वांसः समनोयोगं च तदध्ययनं विहितवन्तः सहृदयाः केचित् तस्य प्रशंसां कुर्वन्तः श्लाघ्यतमत्वं विद्वज्जनप्रियत्वमुत्तमोत्तमत्वं च हृदयेन स्वीकुर्वन्तीत्यलं पल्लवितेन ।

(८) भारतचम्पूकाव्यस्य समीक्षायाः सार उपसंहारश्च

भारतचम्पूकाव्यस्य समीक्षा सम्प्रति पूर्णतां प्राप्तास्ति । सेयं समीक्षा साहित्यकदृष्ट्यैव लिखितास्ति, किन्तु भारतचम्पूकारस्य श्रीमतोऽनन्तभट्टस्य यः समयः पुरातत्वविदां विदुषां मध्ये विचिकित्साविषय एवासीत् , सोऽसावस्माभिर्निर्विचिकित्सतां प्रापितोऽस्ति। प्रतिस्पर्धा -

तु कयोश्चित् भिन्नसमयस्थितयोरपि माघभारव्यादीनामिव भवितुं शक्नोति, अतोऽभिनवकालिदासस्पर्धित्वेनाऽनन्तभट्टस्तत्समसमयो न निगदितुं शक्यः, किन्तु शत्रुता तु कयोश्चिदपि भवतु, समसमययोरेव संभवति, सा च शत्रुताऽभिनवकालिदासस्याऽनन्तभट्टेन सह अस्माभिरनन्तभट्टस्य समयनिर्देशावसरे साधितास्ति, तेन एकादशशतभवस्याऽभिनवकालिदासस्य समसमयताऽनन्तभट्टस्य सुतरां सिध्यतीति दर्शितं तथा।

प्राच्यैः पुरातत्त्वविद्भिः भारतचम्पूकाव्ये दक्षिणाञ्चलस्थ नदीपर्वतजनपदादिवर्णनं सुरुचिरतरं प्राप्य दक्षिणभारतीय पुस्तकालयेषु च भारत चम्पूकाव्यस्य हस्तलिखितपुस्तकानि बहुत्रोपलभ्य अनन्तभट्टस्य दक्षिणाञ्चलस्थ यत्किंचिज्जनपदवास्तव्यत्वं स्वीक्रियते, किन्त्वस्माभिरनन्तभट्टस्याभिनवकालिदासवैरविषयतां दर्शयद्भिर्दक्षिणापथप्रथितविधानगरवास्तव्यत्वमपि प्रकटीक्रियते। यतो हि अभिनवकालिदासो विधानगर नरपते राजशेखरस्य सभापण्डित आसीत्, राजशेखरसभापण्डितत्वेनाऽभिनवकालिदासस्य यदि विधानगरवास्तव्यता मन्तुं शक्यते, तदा तद्वैरभाजनस्याऽनन्तभट्टस्याऽपि विधानगरवास्तव्यतामन्तुंशक्येति दर्शितं तदीयदेशनिर्देशावसरे।

'कल्याणं वो' इत्यादि मङ्गलाचरणपद्यस्य प्राथमिकताविषयेऽपि विदुषां प्राचां मध्ये स्थितं मतभेदं निराकृत्यस्थापितास्ति तस्य प्राथमिकता, तेन चानन्तभट्टस्य भगवद्विनायकोपासकत्वं दर्शितमस्ति, तत्तन्निदर्शनैश्च तस्य वैदिकसनातनधर्मावलम्बित्वमपि प्रकटीकृतमस्ति।

ततोऽस्माभिर्भारतचम्पूकारस्य वेदवेदाङ्गादिविषयकं व्यापकं वैदुष्यं निदर्शनैस्तैस्तैः प्रतिपाद्य अभिनवकालिदासस्पर्धयैवाऽसौ तद्वत् चम्पूकाव्यं तदपि-तद्वदेव महाभारतीय वस्तुवर्णनपरं तद्वदेव च स्वग्रन्थस्य प्राथमिक मङ्गलाचरणपद्यस्य प्रथमपदं 'कल्याणम्' इत्येव च स्वीचकारेति दर्शितं यथावसरम्।

ततः संक्षिप्य काव्यस्वरूपं, तद्भेदान्, चम्पूकाव्यस्वरूपं च प्रदर्श्य-भारतचम्पूकाव्यस्य उत्पत्तिप्रकारमाकारमाधारं च प्रतिपाद्य तद्वर्णनशैल्याः कृताऽस्ति विवेचना। कतिचिदुदाहरणैः साधितमस्माभिः, यत् - अनन्तभट्ट

स्य वर्णनशैली संक्षेपपराचमत्कारपरिपूर्णा चास्ति । तस्याः संक्षेपपरत्वादेव काव्येऽस्मिन् समासाख्या प्रौढिः, श्लेषाः, श्लिष्टोपमाः, सहोक्तयः, तुल्ययोगिताः, दीपकालंकाराश्च संक्षेपसहायकाः बहुत्र प्राप्येरन् । तस्याश्चमत्कारपरिपूर्णत्वादेव च रसभावादिध्वनयोऽत्र यत्र तत्र प्राचुर्येणोपलभ्येरन् । यत्र च न रसभावादयस्तत्राऽर्थालंकाराणां यमकानानुप्रासानां वा विच्छित्तयस्तु विद्योतमाना भवेयुरेव । पौराणिकवत् केवलवृत्तविनिवेदनपरं पद्यं तु निदर्शनायाऽपि न क्वचित् प्राप्येत चम्पूभारते ।

ततः संक्षिप्य चम्पूभारतीयं कथावस्तु प्रदर्श्य तत्रत्य नायकनायकादीनां कृतास्ति विवेचना । तत्र वर्णितेष्वपि पाण्डुश्रीकृष्णभीमार्जुनादीनां नायकोचितगुणगणमणिमण्डितानां धीरोदात्त नरमहामणीनां मुदात्तेषु चरितेषु युधिष्ठिरस्यैव नायकत्वं द्रौपद्याश्च पञ्चपतिपत्नीत्वेऽपि सतीत्वादि गुणोपेतत्वेन नायिकात्वं स्थापितमस्ति ।

ततो युधिष्ठिरगतत्वेन वीरस्यैव रसस्य प्राधान्येन प्रतिभासमानत्वात् चम्पूभारते तस्यैव रसस्य प्राधान्येन रसभावादीनां चाऽन्येषां गौणत्वेनव्यवस्थितिः साधितास्ति ।

ततः समीक्षायामस्यां चम्पूभारतीय विषय वर्णनेषु कविना प्रयुक्तानां गुणानामलंकाराणां रसभावादिध्वनीनां प्रकाशनं तेषामौचित्यानौचित्यप्रतिपादनं च विहितमस्ति । तत्र प्रलम्भव्यज्यमानानामलंकाराणां तैर्व्यज्यमानानामलंकारान्तराणां च ध्वनीनामपि कृतमस्ति प्रदर्शनम् । यादृक् नाऽन्यत्र क्वापि केनापि कृतमुपलभ्यते, अलंकारध्वनीनामपि यावती उपलब्धिर्भारतचम्पूकाव्ये भवति, दर्शिता चास्माभिर्यथा, तथा रसगङ्गाधरे ध्वन्यालोकेऽन्यत्रापि कुत्रचिन्नविलोकिता भवति, तदेतत् सूचनिकाद्वारा समीक्षायां विनैवायासं द्रष्टुं शक्यम् । स्थले स्थले च सातिशयचमत्कारपूर्णेन वर्णनेन कवेर्व्युत्पत्तिपरिपाकस्य प्रतिभावैभवस्य चापि प्रतीतिपथमवतरतो विहितास्ति संसूचना । विवेचनेनानेन प्रकटीभवति चम्पूभारतस्य वास्तविकं महत्त्वम् ।

तदग्रे भारतचम्पूकाव्ये उपयुक्तानां छन्दसां प्रयोगे औचित्यानौचि-

त्ययोर्विचारोऽस्ति विहितः । छन्दसां प्रयोगाय महाकविनाक्षेमेन्द्रेण स्व
कीये सुवृत्ततिलकनाम्निग्रन्थे विहितो विषयनिर्देश एव अद्यावधि प्राप्यते , कि
न्तु तन्निर्देशेऽव्याप्त्यतिव्याप्तीनां दृग्गोचरीभूतत्वात् छन्दसां प्रयोगाणा
मौचित्यानौचित्यपरीक्षणाय नवीनैवैकासरणिरुद्भाविताऽस्ति विचारेऽस्मि
न् । तदनुसारमत्र भारतचम्पूकाव्ये प्रयुक्तानां सर्वेषां छन्दसां अन्यदीयानां च
केषांचिच्छन्दसां प्रसङ्गानुसारमौचित्यानौचित्यविचारोऽस्ति विहितः, मन्ये
सोऽयं भागोऽपिच्छन्दःशास्त्रविषये नूतनपरीक्षासरणिप्रकाशकत्वात् भवेद्विदु
षां विशेषतो विनोदावहः ।

तदग्रे "गच्छतःस्खलनं क्वापि भवत्यनवधानतः" इत्याभाणकानुसा
रं मानवस्वभावसुलभोऽनन्तभट्टस्यस्खलनदोषोऽपि भारतचम्पूकाव्ये यत्र तत्र प्र
तीतिपथमवतरन् संकलितोऽस्ति । संकलनेनैतेन नैतदवगन्तव्यं कदाचिद् यत् अन-
न्तभट्टस्य व्युत्पत्तिपरिपाके न्यून्यमासीत् । अनन्तभट्टो महान् विद्वान् प्रति
भाशाली भाषायां छन्दःसु च प्रगाढाधिकारवान् सिद्धसारस्वतीकः शीघ्रकविरा
सीदित्यस्माभिर्निदर्शनैरनेकैः साधितमस्ति । शीघ्रकवयश्च संरम्भवशात् झटिति
झटिति लिखन्तःपठन्तश्च स्थितां क्वचित् त्रुटिंनाऽवदधति । एकदा स्थिता
च सा त्रुटिः चमत्कारि काव्यसाज्जातान्नाऽवधानदानं विनापुनःप्रकटीभवति।
अवधानदानं च शीघ्रकवीनां स्वभावविपरीतमेव । अत एकदा या त्रुटिः काव्ये
स्थितिमलभत्, सा सार्वदिकत्वायैवातिष्ठत् । एवमनन्तभट्टोऽपि काव्यनिर्मा
णे संरम्भेण वेगेन च प्रवृत्तः स्वकाव्ये स्थितास्त्रुटीः काश्चिद् यदि निभाल-
यितुं नाशक्नोत् तर्हि तत् स्वाभाविकमेवाऽऽसीत् ।

ततो भारतचम्पूकाव्यस्य तत्पूर्ववर्तिकाव्यैः सह विहितास्ति तुलना
त्मिका समालोचना । यस्यां भारतचम्पूकाव्यात् पूर्ववर्तिचम्पूकाव्येषु विशि
ष्टानां प्रसिद्धानामेव च चम्पूकाव्यानां समालोचनायै कृतोऽस्ति परामर्शः ।-
त्रिविक्रमभट्टस्य नलचम्पूः ,सोमदेवस्ययशस्तिलकचम्पूः ,हरिचन्द्रस्यजीवन्धरचम्पूः
भोजराजस्यरामायणचम्पूः , अभिनवकालिदासस्य च भागवतचम्पूः विशिष्टाः-
प्रसिद्धाः आलोचकैः प्रशंसिता एव च सन्ति, किन्तु भारतचम्पूकाव्येन सह कृता
यत्

यामेतदालोचनायां ज्ञास्यन्तिविद्वांसो यत्- पूर्ववर्तिचम्पूकाव्येभ्यो भारतचम्पूकाव्यं कियति उच्चतरेस्तरेस्थितमस्तीति ।

ततो भारतचम्पूकाव्यस्य तत्परवर्तिचम्पूकाव्यैः सहापि विहिताऽस्ति तुलनात्मिकाऽऽलोचना । यस्यां भारतचम्पूकाव्येन सह तिरुमलाम्बाया वरदाम्बिकापरिणयचम्पूकाव्यस्य, रामानुजाचार्यस्य रामानुजचम्पूकाव्यस्य, नारायणभट्टस्य राजसूयप्रबन्ध-पाञ्चाली स्वयंवरचम्पूकाव्ययोः, मित्रमिश्रस्य आनन्दकन्दचम्पूकाव्यस्य, वेंकटेशस्य च श्रीनिवासविलासचम्पूकाव्यस्य कृतास्ति समालोचना । भारतचम्पूकाव्यात् परवर्तिचम्पूकाव्येषु मन्ये विशिष्टानि प्रसिद्धानि च चम्पूकाव्यान्येतान्येव । समालोचनयाऽनया प्रकटीभवति, यत्- नैतेषु किमपि चम्पूभारतमतिशेते, अपितु तदग्रे क्षुल्लकान्येव प्रकटीभवन्त्येतानि ।

अनया पूर्वापरवर्तिचम्पूकाव्यैः सह कृतया भारतचम्पूकाव्यस्य तुलनात्मिकालोचनया कोऽपि महानुत्कर्षो महिमा प्रकटीभवति चम्पूभारतस्य ।

ततो भारतचम्पूकाव्यस्य पात्राणां सामान्याचारैः ज्ञायमानाः काश्चिकालिक्यः परिस्थितयः प्रमाणैर्दर्शिताः सन्ति । तेन स्यादेवपुरातत्त्वरसिकानां विदुषां विनोदः ।

ततो भारतचम्पूकाव्योपरिसमुपलभ्यमानानां व्याख्याग्रन्थानां परिचयः, तत्प्रकारप्रदर्शनं च व्यधीयत । उपलभ्यमानैर्बहुभिस्तैर् व्याख्याग्रन्थैर्भारतचम्पूकाव्यस्य विद्वज्जनप्रियत्वं विपुलादरपात्रत्वं महत्त्वं च प्रकटीभवति ।

तदग्रे च चम्पूभारतोपरि अद्यावधिप्रकाशितानां समालोचकसम्मतीनां कृतमस्ति संकलनं, तेनापि प्रकटीभवेदेव भारतचम्पूकाव्यस्य महत्त्वम् ।

उपसंहारः

------

समीक्षयैतया वयं तु इममेव निष्कर्षं प्राप्नुमो, यत् - अनन्तभट्ट एकादशशताब्दीभवोदक्षिणाञ्चलस्थविद्यानगरवास्तव्यो वैदिकधर्मावलम्बी गणनायकोपासकः प्रतिभावैभवसम्पन्नो भाषायाश्छन्दसां नैकाधिपत्यशाली सिद्धसरस्वतीको महान् पण्डितः कविश्चासीत्, यस्य भाषायां प्रवाहः, यथावस

रं समुचितानां छन्दसां गुणानाम् अलंकाराणां च प्रयोगा:, रसानां भावानां च व्यञ्जने परमा प्रौढि: नवनवा रुचिराश्च कल्पना: हठादाकर्षन्ति रसिकजन मनांसि । भारतचम्पूकाव्यं च चम्पूकाव्येषु सर्वोत्तमं काव्यं, ये पठन्ति, पाठयन्ति, अनुशीलयन्ति च तत्, ते सहृदया: सुधियो भाग्यशालिनो नूनम् । अत आशास्महे यत् -

'ये स्रोतस्यवगाहितुं सुविमले वाञ्छन्ति सारस्वते,
ये काङ्क्षन्ति रसस्थलातुमखिलान् स्वादान् रुचानिर्भरान् ।
ये लष्यन्ति च तस्य वक्रिमवृता लीला: समालोकितुं,
तेऽभ्यस्यन्तु सरस्वतीं सुकृतिनोऽनन्तस्य नित्यं मुदे ।।१।।'

'यावल्लक्ष्मीर्हरेरङ्के गौरी वामे च धूर्जटे: ।
प्रीत्यै तावत् सतां मध्ये भात्वनन्तसरस्वती ।।' २ ।।'

-0-0-0-0-0-0-0-0-0-0-0-0-0-0-0-0-0-0-0-0-0-0-0-0-0-0-0-0-0

भारद्वाजेन गार्ग्येण शैन्येन प्रवरैर्युतात् ।
गोत्रर्षे: प्रापयो जन्मसारम्भरायणनामकात् ।। १
माध्यन्दिनयजुर्वेदाध्येता विजयदेवजित् ।
बभूव सुकृती तस्मात् निगमागमपारग: ।। २
चित्रकूटे मेदपाट महीपेन्द्र पुरोहित: ।
सत्यदापाती विप्राणां बन्धु: सरसल: कवि: ।। ३
तद्वंश्येषु चतुर्विंश: प्राज्ञ आसीच्चतुर्भुज: ।
काङ्करोलीश्वराचार्यस्नेह सम्मानभाग् बुध: ।। ४
रामकृष्णास्तस्य पुत्रो राधाकृष्णाश्च सन्नुत: ।
तत्सूनुस्तत्सुतो नैकग्रन्थनिर्माणकारक: ।। ५
स्ववर्क्षिसेवारतो लक्ष्मीनारायणपुरोहित: ।
तन्माता पाविनी भूरिदेवी काश्यपवंशजा ।। ६
तदाचार्या: सदानन्दका मार्कण्डेयमिश्रजित् ।
पुरुषोत्तमशर्मा च चतुर्वेदी दयाघना: ।।' ७

शास्त्रेषु कृपया बोधं तैरसौ प्रापितः श्रमैः ।
विश्रान्तो राज्यसेवातः स्वर्गिरं सेवते गृहे ।। ८

तज्जन्म वैक्रमे वर्षे बाणाङ्गग्रहभूमिते ।
तिथौ कार्तिकपूर्णायां तथा चादित्यवासरे ।। ९

श्रीमद्द्वारवतीपतेः पुरि जनिं वृद्धिं च यातः स तु ,
श्रीनाथस्य पुरे च साधुमहिते शास्त्रेषु बोधं गतः ।
सेवां देवगिरां मुदा निजगृहे तन्वन् समीक्षामिमां
चम्पूभारतकाव्यगां व्यरचयत् साहित्यदृष्ट्या शुभाम् ।। १०